श्रीगजाननः

अथ

# गद्यात्मकरामायणम्

श्री

अयं ग्रंथोऽध्यात्मरामायणाधारेण

गोडबोल इत्युपाव्हेन बल्लाळसूनुना कृष्णशर्मणा

विरचितः

स च

कुर्वपुरे ( कुरुंदवाडनगरे ) “ भाऊनाना ”

इत्याख्यमुद्रणालये मुद्रितः

द्वितीयावृत्तिः

शकनृपसमाः १८१५

THE

# PROSE RAMAYAN

COMPILED

from the

## ADHYATMA RAMAYAN

BY

KRISHNAJI BALLAL GODBOLE

( Registered for copy-right under Act XXV of 1867 )

---

Printed at the " BHAU NANA " Press.

KURUNDVAD.

1894

---

( All rights reserved )

---

Price 12 Annas

श्रीगजाननः

अथ

# गद्यात्मकरामायणम्

---0---

अयं ग्रंथोऽध्यात्मरामायणाधारेण

गोडबोल इत्युपाव्हेन बल्लाळसूनुना कृष्णशर्मणा

विरचितः

स च

कुर्वपुरे ( कुरुंदवाडनगरे )"भाऊनाना"

इत्याख्यमुद्रणालये मुद्रितः

द्वितीयावृत्तिः

शकनृपसमाः १८१५

मूल्यं पादोनरूपकः

अयं ग्रंथः

श्रीमद्राजपूजितशौर्यौदार्यप्रथित-

पटवर्धनकुलोत्पन्नविद्वन्मान्यकवये

हरिहरसूनवे गणपतरावाख्याय

तथा

तस्य बांधवाय

विनायकपुत्राय हरिहररावाख्याय

तयोर्भृत्येन

परमविनयेन तदनुज्ञया

समर्पितः

कृष्णशर्मा

# PREFACE

The study of Sanskrit has, in these days, attained such a prosperous state in the curriculum of the University of Bombay that Sanskrit may be said to occupy the most prominent position among all the second languages recognized by the University. More than half the number of students appearing for Arts Examinations take Sanskrit for their second language and in the Matriculation, where in addition to the classical language vernaculars are also allowed, the largest number of candidates appears to be of those who choose Sanskrit for their second language. Besides the necessity of taking Sanskrit to a Hindu student who wishes to continue his College-course for Arts Examinations, he is advised by all around him to choose it for its undeniable charms, and truly speaking, we find very few students who take Marathi from their fourth standard in High schools. But look to the highest class, and we are surprised to see many ( though not a majority ) who take Marathi.

Whence can this change arise ? Some of the students at least feel the difficulty of remembering the difficult and numerous grammatical forms, and if they should depend upon literature-portion very little can be done by them in that direction without much aid from others. They have either to construe Sanskrit verses which is a great difficulty with ordinary students, or they should turn to prose works like Panchtantra. It being very difficult to understand Sanskrit poems, and being very soon disgusted with Panchtantra they find no other way to continue their course. The other Sanskrit prose books like Dashkumar and Kadambari are too difficult for them. Then in the end they leave Sanskrit. Thus then it appears to be a necessity that easy prose Sanskrit books should be brought before the public. They should neither be difficult nor tiresome. An attempt in this direction is recently made by the author of Kadambarisar, who has aided the beginners very much by shortening the long sentences and curtailing the labyrinth of long and

numerous compounds. As an humble attempt in the same direction the author brings the following pages before the public. He is quite sure those who have mastered the two books of Dr. Bhandarkar will find no difficulty in understanding the following pages. The story is familiar to almost all students and thus they have a kind of pre-notion in understanding the book, which makes it more easy and at the same time unweari-some. There are indeed some few words which are not ordinarily known and almost a complete glossary of such words is attached at the end. There was no necessity of annotation, because the author has spared no pains in putting down a plain easy construction. He does not claim, of course, originality in the work. He has reduced only the metrical constructions of the Adhyatmaramayan to plain prose, the only merit being that by such a prose order the work will be presented in a clean and more systematic form, repetitions usual with epic-writers being avoided, vague expressions being left out and the loose ones made compact. The passages on Vedant and such other abstruse subjects are omitted and the matter of the story given in a concise form. The work will thus be found to serve as an excellent readable text suited to the requirements of young students. Another important use of the work will be to supply in a short space all the general information about persons, places and events in the Ramayan. Besides here will be found expressions and constructions suited to the Historical, Didacctic Narrative and descreptive composition, which will help the students in their attempts at translation and original composition.

Being compelled by circumstances to have the book printed in a press very newly established the author is aware that many typographical mistakes are found in the book, but for that he is unable to do anything else except appending an errata. There might be other mistakes also which have escaped notice, and which are indeed as troublesome to the author himself as to the readers, but

for these the author expects indulgence from the readers.

In the end the author will feel satisfied if the students in general find this little book easy and therefore make general use of it in the course of their study.

The author connot sufficiently thank his friends and patrons for the help they gave in some form or other.

KURUNDVAD
15th Jonuary 1888.

K. B. GODBOLE.

## Preface to the second Edition.

The success attained by the first edition, though it came from the press in no very creditable form ( both inwardly and outwardly, ) as the number of misprints it contained was considerably large, and the number of grammatical mistakes it contained vied with it, emboldens the author to issue the second edition in the present form. The favourable opinions expressed by learned men, whose experience in teaching Sanskrit in Govt. Schools extends over a long time encouraged him to appear before them again. He has spared no pains to revise this work thoroughly and give it as unimpeachable a charactor as he could, still he himself craves the indulgence of the public, begging of them at the some time to kindly point out the mistakes that might have still lurked in and escaped his notice, so that if there be an occasion to bring out a third edition, it will be a great help to him. A few more verses are quoted at the end of chapters where it appeared their presence would not be felt amiss. The auther cannot conclude these few lines without expressing his heartfelt gratitude towards his benefactors and friends whose timely assistance was of great service. He cannot but hope that the students of Sanskrit who keenly feel the want of easy Prose reading books will reward his labours by making use of the work now before them.

KURUNDWAD
20th March 1894 K. B. GODBOLE

# उपोद्घात.

आमचा हा हिंदुस्थानदेश सुवर्णरत्नादि संपत्तीनें जसा परिपूर्ण होता तसा विद्याकलादिकांनीं ही पूर्ण होता ; परंतु जसा लक्ष्मीचा ओघ पश्चिमेकडे वळला तसा सरस्वतीचा ही वळला, आणि गीर्वाणभाषेचें महत्व पाश्चिमात्यांच्या तोंडून श्रवणकरून माना डोलविण्याची वेळ आली. हाल्लीं एकंदर थोरथोर सरकारी व खासगी शाळांतून जसा इंग्रजीचा अभ्यास झपाट्यानें चालला आहे तसा जरी नव्हे, तरी त्याच्या खालोखाल देशभाषांशिवाय अन्यभाषेचा अभ्यास ह्मटला. तर संस्कृताचा चालू आहे. असें ह्मणण्यास फारशी हरकत दिसत नाहीं ; व तो याहो पेक्षां अधिक चालावा हें च इष्ट आहे. याचीं कारणें येथें सांगत बसण्याचें प्रयोजन नाहीं. जसजसा हिंदुराजांच्या राज्यांचा ऱ्हास होऊं लागला तसतसें संस्कृतभाषेचें दैन्य वृद्धि पाऊं लागलें, त्या योगानें केवढें नुकसान झालें तें सांगून पुरवणार नाहीं. पूर्वकालीन चतुःशास्त्री पंडितांच्या गोष्टी राहूंद्या, परंतु अगदीं आलीकडे आलीकडे पुण्यामुंबईतील जी पहिली शास्त्रीमंडळी कालवशात् नाहींशी होत चालली आहे, तिच्या जागीं दुसरी त्या तोडीची कितीशी येत आहे ! थोड्यादिवसांखालीं कैलासवासी झालेल्या सांगलीच्या भिकूशास्त्रीबाबासारखे काशीपर्यंत शोधीत गेल्यास किती सांपडतील याचा विचार केला म्हणजे आर्यभूमातेच्या कोणत्या ही सुपुत्रास रडूं आल्यावांचून रहाणार नाहीं. असो, या गत गोष्टींबद्दल शोक करणें व्यर्थ आहे. त्या ध्यानांत ठेऊन पुढील कार्य साधण्याविषयीं तत्पर असलें तरच उपयोग.

सध्या शाळांत चालू असलेली संस्कृताध्ययनाची रीत व पूर्वापार चालत आलेली जुन्या शास्त्रीमंडळीची शिकविण्याची रीत, यांची तुलना करून पाहिली असतां भाषाज्ञान होण्यास खरी उपयोगी व सुलभ कोणती याविषयीं वाद रहाणारच नाहीं. लहान मुलांनीं मूळाक्षरें पाठ केल्यावर त्यांस वाचतां येऊं लागण्यास उपयोगीं अशीं जशीं शाळाखात्याकरितां मुद्दाम तयार करविलेलीं पहिलें दुसरें इत्यादि क्रमिक पुस्तकें आहेत तशीं डॉक्टर भांडारकर यांचीं दोन पुस्तकें झाल्यानें त्यांत पारंगत होणारास व्युत्पत्तिमार्ग आक्रमण करणें किती सुलभ व सुखावह झालें आहे याचा अनुभव हाल्लीं सार्वत्रिक आहे. परंतु चालतां यऊं लागलें तरी एकदम मोठी मजल मारतां येत नाहीं, किंवा गिरिशिखरारूढ होतां येत नाहीं. त्यास सरळ मा

र्ग आक्रमण्याची शक्ति अभ्यासानें मजल दरमजल अधिक संपादावी लागते. त्या प्रमाणेंच रघुकिरातादि महाकाव्यें किंवा शाकुंतलादि नाटकें या मनोहर कविकृतींचा रसास्वाद घेऊन तल्लीन होण्यास मध्यंतरीं हितोपदेश पंचतंत्र, अशा गद्यग्रंथांचें अवलेकन अवश्य आहे. परंतु त्यांची संख्या फार लहान असल्यानें डा० भांडारकरांच्या मार्गोपदेशिकेंतून कशी तरी पारपडलेली मंडळी पुढें किती टेंकीस येते आणि मंदिरांत:प्रवेशिकेस आरंभ करून फार काल झाला नाहीं तोंच तीस वंदन करून मागें सरते, याचा अनुभव अधीत आणि अध्यापक या उभयतांस चांगला असेल. आमच्या सहाध्यायी मंडळीपैकीं पुष्कळांची स्थिति अशी झालेली पाहून आमचा असा पक्का ग्रह होऊन गेला व कांहीं नूतन मित्रमंडळी ही त्याच मताची असल्यानें हा ग्रंथ रचण्यास आरंभ करून त्यांस दाखविला तेव्हां त्यांणीं अभिनंदन केलें.

ह्या पुस्तकांत कर्त्यानें " माझें " असें ह्मणण्यास एक वाक्य ही नाहीं. सर्व कांहीं मूलाधारग्रंथांतीलच आहे. आधींच श्रीरामकथा मनोहर त्यांत पुराणकवीची वाणी रसाळ, शब्द सुलभ व त्यांची रचना सरळ पाहून यांतील अध्यात्म प्रकरण अज्जी गाळून बाकी राहिल्यास बराच संक्षेप देऊन गद्यरूप दिलें असतां विद्यार्थीजनांस अन्वयाची फारशी भानगड न राहिल्यानें शिकण्यास सुलभ असा ग्रंथ होईल व त्यांत भगवंताचें भक्तवात्सल्य, अपुत्रिकाच्या मनाची उद्विग्नता, पुत्रलाभाचा संतोष, प्रतिज्ञापालनाविषयीं प्राणांतिकनिर्धार, पुत्रधर्म, बंधुप्रेम, दंपतीवियोग, मित्रभाव, अतिथिसत्कार, शौर्य, औदार्य, धैर्य, इत्यादि नानाविध प्रसंगांचें व मनोवृत्तींचें चित्र रेखलेलें असल्यानें कथाभाग करुणवीरादि रसांनीं युक्त झाल्यानें त्यास मनोहरत्व ही येईल असें वाटून हा प्रयत्न केला आहे. त्या प्रमाणें त्याचा उपयोग होईल तर कर्त्याचे हेतु सफल झालेच ह्मणावयाचे.

गीर्वाणभाषादेवीचें ग्रंथभांडार पाहूं गेलें तर फारच थोर आहे परंतु त्यांत गद्यग्रंथरत्नांची संख्या कमी. त्यांत ही सुलभ, विद्यार्थ्यांच्या उपयोगीं असें पंचतंत्र व हितोपदेश यांशिवाय दुसरे नाहींतच असें वाटतें. असते तर मोठमोठे पाश्चात्य पंडित तेवढ्यांवरच परिश्रम कां करीत बसतील व आमच्या शाळांतून त्यांवांचून अन्य शिकविण्यास बंदी असेल कीं काय ? आलीकडे झालेलें इसापनीतीचें भाषांतर कोठें कोठें शिकवितात, परंतु त्याची खरी

योग्यता पाहिली तर भट्टीकाव्याबरोबरीची आहे. शिवाय या तीनही ग्रंथां- तील विषय पाहिले तर संगतवार मनोहर गोष्टी आहेत असें नाहीं. त्यामुळें वाचतांना मनाची धांव पुढें न झाल्यानें कंटाळा आल्यावांचून रहात नाहीं. आलीकडे दुसरें नवीन झालेलें पुस्तक ह्मटलें तर कादंबरीसार यांत मूलग्रंथाप्रमाणें थोरथोर समास आणि लांब लांब वाक्यें नाहींत हें खरें, तरी त्याची रचना मुळाप्रमाणेंच प्रौढ असल्यानें त्याचा नूतनाभ्यासीजनास फारसा उपयोग होत नाहीं. या प्रमाणें गद्यग्रंथांची वस्तुतः स्थिति असल्यानें प्रस्तुतचा ग्रंथ तरी उपयोगी ठरेल तर कर्त्यास सहजच आनंद होईल.

मुंबई ईलाख्यांतील एकंदर शाळांकडे नजर फिरविली असतां स्वभाषे खेरीज अन्य भाषेवर विद्यार्थ्यांचे परीश्रम ह्मटले तर इंग्रजी खालोखाल संस्कृतावरच चाललेले अधिक आढळतील. परंतु बी. ए एम्. ए. पर्यंत मजल मारलेल्या मंडळींत, ते कालेजांत शिरतेवेळीं जितपत इंग्रजी बोलतात तितपत तरी कालेज सोडतेवेळीं संस्कृत बोलतां येणारे शेंकडा किती सांपडतील? फारच थोडे ह्मणण्यास हरकत नाहीं. याचें कारण पाहूं जातां आह्मांस तर असें वाटतें कीं त्यांनां वाचण्यास गद्यग्रंथांची कमताई हेंच असावें. परंतु कालेजांतून देशभाषा हद्दपार होऊन व संस्कृताच्या अभ्यासास विशेष तेजी आल्यास इतकीं वर्षें झालीं तरी हा प्रकार असाच रहावा काय? स्वतंत्र ग्रंथ नकोत परंतु इंग्रजींतील Lamb's Tales from Shakespear प्रमाणें सुलभ मनोहर गद्यग्रंथ पदवीधर विद्वन्मंडळीनें मनावर घेतल्यास तयार होणार नाहींत काय? तूर्त तर नूतनाभ्याशांनीं आहे यांतच निर्वाह करून घेतला पाहिजे. संस्कृत भाषेचें व्यारण ह्मणजे एक स्वतंत्र शास्त्र आहे तें येण्यास श्रम फार लागतात. डा० भांडारकरांचे पुस्तकांवरून शब्दांचीं रूपें सिद्ध करतां येऊं लागलीं किंवा जीं ग्रंथांत आढळतील त्यांच्या शुद्धाशुद्धतेचा निर्णय करतां येऊं लागला तरी बोलण्यांत तशीं तोंडानें भराभर निघण्यास दृढाभ्यास झाला पाहिजे. तो होण्यास गद्यग्रंथांचें वाचन पुष्कळ झालें पाहिजे. आह्मांस इंग्रजी काव्यग्रंथांवरूनच शिकावें लागलें तर स्थिती कशी होईल तें मनांत आणून विद्वानांनीं लहान थोर नानाप्रकारचे गद्य ग्रंथ रचण्याचें मनावर घ्यावें अशी त्यांस विनंती आहे. तशा ग्रंथरचनेस साहित्य भरपूर आहे, परंतु त्याचा उपयोग केला तर. तसा ते करीपर्यंत **खद्योतो द्योतते तावद्यावन्नो दयते शशी** या न्यायानें आमच्या सारख्या

आल्पज्ञांस ही स्वकृति प्रसार करण्यास आवकाश सांपडेल, तो त्यांणीं साधावा.

———— :o:o: ————

# द्वितीयावृत्तीची प्रस्तावना.

या ग्रंथाची प्रथमावृत्ति छापून प्रसिद्ध करण्यांत जी घाई झाली ती मुळें तींत अतिशय चुका व अशुद्धें राहून गेलीं. त्याकारणानें त्याचा विद्यार्थीजनांस जसा उपयोग व्हावयाचा तसा झाला नाहीं. असें असतां ही पुष्कळ हायस्कुलांत त्याचा खप चाललाच होता. यावरुन द्वितीयावृत्तीची अवश्यकता सहज दिसून आली. प्रथमावृत्तीचे वेळीं पुष्कळ मोठमोठया शाळांतील संस्कृताध्यापकांनीं जीं अनुकूल मतें दिलीं त्यांवरून ही द्वितीयावृत्ति काढण्यास उत्तेजन आलें. प्रथमावृत्तींत असलेले सर्व दोष काढून टाकण्याकडे फार लक्ष पुरविलें आहे. इतकें केल्यावर आतां कोठें चूक किंवा अशुद्ध राहिलें नसेल असें नाहीं. याजकरितां विद्वज्जनांस अशी प्रार्थना आहे कीं जें त्यांच्या नजरेस येईल तें त्यांणीं कृपाकरून कळवावें ह्मणजे तृतीयावृत्ति काढण्याचा योग आल्यास त्यापासून चांगला उपयोग होईल.

पुस्तक तपासून शुद्धकरण्यास मित्रमंडळीकडून व छापून काढण्यास यजमान श्रीमंत राजश्री उभयरायसाहेब कुरुंदवाडकर यांजकडून चांगलें सहाय झालें त्याबद्दल त्यांचे उपकार मानल्याशिवाय कसें राहवेल.

कुरुंदवाड
तारीख २० माहे मार्च सन १८९४ इ०

कृ. ब. गोडबोले.

—०()०—

## ॥ श्रीगजाननः प्रसन्नोऽस्तु ॥

### ॥ श्रीभवानीशंकराभ्यां नमः ॥

### ॥ श्रीसीतारामचंद्राभ्यां नमः ॥

---

### ॥ अथ गद्यात्मकं रामायणं रच्यते ॥

## ॥ बालकांडः ॥

---

॥ अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये ॥
॥ मनोगिरां विदूराय दक्षिणामूर्तये नमः ॥ १ ॥

सूत उवाच । कदाचिन्नारदो योगी परानुग्रहवांछया सकलाँल्लोकान्पर्यटन्सत्य-लोकमुपागमत् । तत्र सभायां मूर्तिमद्भिश्चतुर्भिर्वेदैरनेकैर्मुनिभिश्च परिवेष्टितं स्तूयमानंच कमलासनस्थं चतुर्मुखं ब्रह्माणं दृष्ट्वा दंडवत्प्रणम्य तस्यसमीपमुपाविशत् । तस्य भक्त्या संतुष्टः पितामह उवाच मुने यदि किंचित्प्रष्टुकामोऽसि वद । एवं तस्य वच आकर्ण्य मुनिर्ब्रम्हाणमब्रवीत् जगन्नाथ सर्वं शुभाशुभं पूर्वमेव त्वत्तो मया श्रुतं । इदानीमेकमेव श्रोतव्यमस्ति । तद्यद्यपि रहस्यं तथापि यदि मयि तेऽनुग्रहोऽस्ति ब्रूहि । घोरे कलियुगे प्राप्ते सर्वे नराःपुण्यविवर्जिता दुराचाररताः सत्यवार्तापराङ्मुखाः परापवादनिरताः परद्रव्याभिलाषिणः परस्त्रीसक्तमनसः परहिंसापरायणा देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयो मातृपितृद्वेष्टारःस्त्रीदेवाःकामकिंकराश्च भविष्यंति । विप्रा लोभग्रस्ता वेदविक्रयजीविनो धनार्जनार्थमभ्यस्तविद्या विद्यामदविमोहितास्त्यक्तस्वजातिकर्माणः परवंचकाश्च प्रायशो भविष्यंति । तथा क्षत्रिया वैश्याश्च स्वधर्मत्यागशीला भविष्यंति । तद्वच्छूद्राश्च ब्राम्हणाचारतत्परा भविष्यंति । स्त्रियः प्रायशो भ्रष्टाः पत्यवज्ञाकारिण्यः श्वशुरद्रोहिण्यश्च भविष्यंति । न संशयोऽत्र । एतेषां नष्टबुद्धीनां परलोकप्राप्तिः कथं भवेदिति मम चित्तं सततं चिंताकुलं वर्तते । येन ल-

घूपायेनैषां परलोकगतिर्भवेत्तमुपायमाख्याहि । भवान्सर्वं वेत्त्येव ।

इत्यृषेर्वाक्यमाकर्ण्य कमलासनःप्रत्युवाच । मुने त्वया साधु पृष्टं । तदुत्तरमहं वक्ष्ये । सादरं शृणु । पुरा भक्तवत्सला पार्वती विनयान्विता त्रिपुरारिं श्रीरामतत्वं पप्रच्छ । गिरिशस्तस्यै प्रियायै तद्गूढं व्याख्यातवान् । तदध्यात्मरामायणमिति स्मृतं पुराणोत्तममस्ति । जगद्धात्री पार्वती तत्पूजयित्वा दिवानिशमालोचयंती सांप्रतमानंदमग्ना तिष्ठति । प्राणिनामदृष्टवशाद्यदा तल्लोके प्रचरिष्यति तदा तस्याध्ययनमात्रेण जनाः सद्गतिं यास्यंति । ब्रह्महत्यापुरःसरं पापं जगति यावदध्यात्मरामायणं नोदियात्तावद्विजृंभेत । कलिमहोत्साहस्तावदेव निःशंकं प्रवर्तेत । क्रूरा यमभटा निर्भयाः संचरेयुः । सर्वाणि शास्त्राणि परस्परं विवदेरन् । अध्यात्मरामायणं यावन्नोदियात्तावज्जगति रामस्वरूपं महतामपि दुर्बोधं विद्येत । हे मुनिसत्तम अध्यात्मरामायणसंकीर्तनश्रवणादिजं फलं कार्त्स्न्येन वक्तुमहं न शक्नोमि, तथापि पुरा मां शिवेनोक्तं तस्य माहात्म्यं किंचित्त्वां वक्ष्ये । तच्चितं समाधाय शृणु । यो भक्तिसंयुक्तोऽध्यात्मरामायणतः श्लोकं वा श्लोकार्धमपि पठेत्स तत्क्षणात्पापात्प्रमुच्यते । योऽनन्यधीः सन्नध्यात्मरामायणं भक्त्या प्रत्यहं यथाशक्ति वदेत्स जीवन्मुक्तो भवेत् । यो मर्त्योऽध्यात्मरामायणं यदृच्छयान्यतोऽनादरादपि शृणुयात्सोऽपि पापात्प्रमुच्यते । योऽध्यात्मरामायणमदूरतो नमस्करोति स सर्वदेवतार्चनफलं प्राप्नोति । अध्यात्मरामायणं पुस्तकेऽशेषतो लिखित्वा यो रामभक्तेभ्यो दद्यात्तस्य सर्ववेदेष्वधीतेषुच सर्वशास्त्रेषु व्याकृतेषुच यत्फलं तत्संभवेत् । हे मुने यः सुसमाहितःसन् श्रीरामहृदयं पठेत्स ब्रह्मघ्नोऽपि त्रिभिर्दिनैरेव पूतात्मा भवेत् । हे नारद शंकरः श्रीरामगीतामाहात्म्यं कृत्स्नं वेत्ति, गिरिजा तदर्धं वेत्ति, अहं तदर्धं वेद्मि, तत्ते किंचित्प्रवक्ष्यामि । मया कृत्स्नं वक्तुं नशक्यते । श्रीरामगीता यत्पापं न नाशयति तल्लोके क्वापि कदाचन न नश्यति । रामेणोपनिषत्सिंधुमुन्मथ्य गीतासुधोत्पादिता । सा च लक्ष्मणाय मुदार्पिता । तां पीत्वा नरोऽमरो भवेत् । पूर्वं कार्तवीर्यवधेच्छया धनुर्विद्यामभ्यसितुं महेशस्यांतिके वसञ्जमदग्निसुतः पार्वत्याधीयमानां रामगीतां श्रुत्वा प्रयत्नतो गृहीत्वा तस्याःपठनान्नारायणकलामगात् । विना दानं विना ध्यानं विना तीर्थावगाहनं नरो रामगीतामधीत्य तदनंतफलं लभेत । हे नारद किं बहुनोक्तेन, श्रुतिस्मृतिपुराणेतिहासागमशतान्यध्यात्मरामायणस्याल्पामपि कलां नार्हंति ।

अध्यात्मरामचरितस्य मुनीश्वराय ॥
माहात्म्यमेतदुदितं कमलासनेन ॥
यः श्रद्धया पठति वा शृणुयात्स मर्त्यः ॥
प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥ १ ॥

इत्यादिविस्तरतः प्रस्तावं कृत्वा ब्रह्मणा यन्नारदायोक्तं शिवोदितमध्यात्मरामायणनामोत्तमं पुराणं तदंतर्गतश्रीरामचरितकथाभागो गद्यरूपेण कथ्यते ॥

इति गद्यात्मकरामायणे बालकांडे प्रथमः सर्गः १

यःपृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः ॥
संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ॥
निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां ॥
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥

अथ कदाचित्कैलासाग्रे रविशतविमले मंदिरे रत्नपीठे संविष्टं सिद्धसंघैः सेवितं त्रिनयनं देवं वामांकसंस्था गिरिवरतनया देवी पार्वती भक्तिनम्रा सती सकलमलहरमानंदकंदमिदं वाक्यमब्रवीत् । पार्वत्युवाच । हे देव हे जगन्निवास नमोस्तुते । त्वं सर्वात्मदृगसि । अतः पुरुषोत्तमस्य सनातनत्वं तत्वं च पृच्छामि । यदत्यंतं गोप्यं तदपि महानुभावा भक्तान्कथयंति । अहो देव, अहं तव भक्तास्मि । त्वं मे प्रियोऽसि । अतो यन्मया पृष्टं तद्वद । इति प्रियया पृष्टः परमेश्वरस्तस्यै श्रीरामहृदयं कथितवान् । तच्छ्रुत्वा पार्वती पुनरुवाच । जगत्प्रभो भवदनुग्रहान्मे संदेहग्रंथिर्विच्छिन्नः । अहं कृतार्थास्मि, धन्यास्मि । हे देव त्वन्मुखाद्गलितं भवापहं रामतत्वामृतरसायनं पिबंत्या मे मनो न तृप्यति । श्रीरामकथास्त्वत्तो मया संक्षेपतः श्रुताः । इदानीं ता विस्तरेण श्रोतुमिच्छामि ॥

श्रीमहादेव उवाच । देवि तापत्रयापहं श्रीरामचरितमद्य प्रवक्ष्यामि शृणु । रावणादिसकलरक्षोगणानां भारेण त्रस्ता पृथ्वी गोरूपं धृत्वा देवमुनिजनैः साकमादौ ब्रह्मलोकं गत्वा रुदंती स्वयमुपगतं सर्वं दुःखं ब्रह्मणे नि-

वेदयामास । तदा पितामहो मुहूर्तं ध्यात्वा तस्या व्यसनकारणं तन्निवृत्त्युपायं-च हृदि विवेद । अनंतरं तया भूम्या तैर्देवैश्च वृतः क्षीरसमुद्रतीरं गत्वानंद-बाष्पैर्वृतः सन्हर्षगद्गदया गिरा सर्वज्ञमीश्वरं हरिं पुराणोद्भवैःस्तोत्रैर्भक्त्याऽस्त-वीत् । ततःसहस्रसूर्यसदृशप्रभस्तमो व्यपनयन्हरिः प्राच्यामाविरासीत् । ज्ञान-हीनानां दुर्दर्शमिंद्रनीलप्रतीकाशं किरीटहारकेयूरकुंडलकटकैर्विभ्राजमानं स्व-र्णयज्ञोपवीतेन स्वर्णपीतांबरेण श्रीवत्सप्रभया चान्वितं शंखचक्रगदापद्मवनमाला विराजितं पद्मलोचनं श्रिया भूम्याच सहितं गरुडोपरिसंस्थितं स्तुवद्भिःसनका-द्यैः पार्षदैः परिवेष्टितं स्मितास्यं तं ब्रह्मा कथंचिद्दृष्टवानपिच भो देवदेव य-त्ते पदं मुमुक्षुभिर्हृदि नित्यं चिंत्यते तत्प्राणबुद्धींद्रियादिभिर्नतोऽस्मीति प्रणम्य हर्षगद्गदया वाचा पुरुषसूक्तेन स्तोतुं समुपचक्रमे । तस्य स्तुत्या भक्त्याच तुष्टो भगवान्हरिर्ब्रह्माणं तव मुदे किं करवाणीति बभाषे । तदातिहर्षितो वेधास्तं प्रत्युवाच । भगवन् रावणनामा पौलस्त्यतनयो राक्षसानामधिपतिर्मद्दत्तवरदर्पि-तो त्रिलोकीं लोकपालांश्च बाधते । मया तस्य मृतिर्मानुषेण कल्पिता । अतः प्रभो त्वं मानुषो भूत्वा तं देवरिपुं जहि ।

श्रीभगवानुवाच । पुरा कश्यपमुनिर्मां तपसा तुष्टाव । तेनाहं पुत्र-भावाय याचितः । मया तथेत्यंगीकृतं । इदानीं स दशरथो भूत्वा भूतले ति-ष्ठति । तस्य पुत्रतामेत्य शुभे दिनेऽहमात्मानं कौसल्यायां तस्येतरभार्ययोश्च चतुर्धा समुत्पत्स्ये । तदा योगमायापि सीतेति नाम्ना जनकस्य गृह उत्पत्स्य ते । तयासार्धमहं सर्वं भवत्कार्यं संपादयिष्यामि । इत्युक्त्वा भगवान्विष्णुर् तर्दधे ॥

अथ ब्रह्मा देवानब्रवीद्भगवान्विष्णुर्मनुष्यरूपेण रघोः कुले भविष्यति । यूयं सर्वेऽपि वानरेष्वात्मनस्तेजो निधत्तापिच यावत्स पृथिवीतले स्थास्यति तावत्तस्य साहाय्यं कुरुत । इति देवान्समादिश्य पृथ्वीं समाश्वास्य च ब्रह्मा विज्वरःसन्स्वभवनं ययौ ।

**देवाश्चसर्वे हरिरूपधारिणः स्थिताः सहायार्थमितस्ततोहरेः**
**महाबलाः पर्वतवृक्षयोधिनः प्रतीक्षमाणा भगवंतमीश्वरं १**

इति रा० रा० बा० कां० द्वितीयः सर्गः २

श्रीमहादेव उवाच । अथ श्रीमान्सत्यपरायणः सर्वलोकेषु विश्रुतोऽ-

योऽध्याधिपतिर्वीरो राजा दशरथोऽनपत्यतादुःखेन पीडितः स्वकुलाचार्यं गुरुं वसिष्ठमेकदाभिवाद्याब्रवीत्स्वामिन्पुत्रहीनस्य मे सर्वं राज्यं दुःखाय कल्पते । मम सर्वलक्षणोपेताः पुत्राः कथं स्युः? ततो वसिष्ठस्तमब्रवीद्राजंस्त्वया चिंता न कार्या । अपरा लोकपाला इव सत्वसंपन्नाश्चत्वारः सुतास्तव भविष्यंति । शांताया भर्तारं तपोधनमृष्यशृंगमानीयास्माभिःसहितः पुत्रकामेष्टिं शीघ्रमाचर। स तथेत्युक्त्वर्ष्यशृंगमानीय वीतकल्मषैर्मुनिभिर्मंत्रिभिःसहितो यज्ञकर्म समारेभे । श्रद्धया हूयमानो तप्तजांबूनदप्रभो हव्यवाट् स्वर्णपात्रे पायसं गृहीत्वाविर्बभूव राजानमुवाच च । इदं देवनिर्मितं दिव्यं पुत्रीयं पायसं गृहाण । परमात्मानं पुत्रत्वेन लप्स्यसेऽत्र न संशयः । इत्युक्त्वानलो राज्ञे पायसं दत्वांतर्दधे । लब्धमनोरथो राजा तौ मुनिशार्दूलौ वसिष्ठर्ष्यशृंगौ ववंदेऽपिच ताभ्यामनुज्ञातः कौसल्यायै कैकेय्यैच तद्धविरर्धमर्धं ददौ । ततःपौत्रिकं चरुमिच्छंती सुमित्रा संप्राप्ता । तस्यै स्वभागादर्धं मुदान्विता कौसल्या ददौ । कैकेयीच स्वभागादर्धं प्रीत्या ददौ । एवं सर्वाः स्त्रियश्चरुमुपभुज्य गर्भसमन्विता राजमंदिरे स्वभासा देवता इव रेजुः । दशमे मासि कौसल्याद्भुतं पुत्रं सुषुवे ॥

मधुमासे सिते पक्षे नवम्यां पुनर्वस्वृक्षसहिते शुभे कर्कलग्ने चंद्रबुधव्यतिरिक्ते उच्चस्थे ग्रहपंचके पूषणि मेषं संप्राप्ते पुष्पवृष्टिसमाकुले काले नीलोत्पलदलश्यामः पीतवासाश्चतुर्भुजः स्फुरत्कुंडलमंडितः सहस्रार्कप्रतीकाशः किरिटी कुटिलालकः शंखचक्रगदापद्मवनमालाविराजितः कौस्तुभहारकेयूरनूपुरादिविभूषणः करुणारससंपूर्णः स्मिताननः परमात्मा जगन्नाथ आविरासित् । तं दृष्ट्वा हर्षाश्रुपूर्णनयना विस्मयाकुला कौसल्या तं नत्वा प्रांजलिरब्रवीत् । देवदेव नमोऽस्तुते । परमात्मन् शंखचक्रगदाधरोऽच्युतोऽनंतःपूर्णः पुरुषोत्तमो यस्य जठरे ब्रह्मांडानि परमाणव इव दृश्यंते स त्वं ममोदरे संभूत इति लोकेषु मम माहात्म्यं ख्यापयसि । भक्तेषु तव पारवश्यं मयाद्य दृष्टं । एतत्त्वद्रूपं मम मानसे सदावतिष्ठताम् । विश्वमोहिनी तव माया मां नावृणोतु । विश्वात्मन्नतस्तेऽलौकिकं रूपमुपसंहरापिच सुकोमलं बालभावं दर्शय । श्रीभगवानुवाच । यद्यत्तवेष्टं तत्तद्भवतु नान्यथा । भूमेर्भारापनुत्तये पुरा ब्रह्मणा प्रार्थितोऽहं रावणं हंतुं मानुषत्वमुपागतः । मां पुत्रमाभिकांक्षिण्या त्वया दशरथेनच पुराहं तपसाराधितस्तदंगीकृत्य मयाद्य तथा कृतं । एतद्रूपं यत्त्वया दृष्टं तत्प्राक्तनतपसःफलं । मम दर्शनं विमोक्षाय कल्पते । इत्युक्त्वा

बालो भूत्वा रुरोद । बालत्वेऽपींद्रनीलाभो विशालाक्षोऽतिसुंदर आसीत् ॥

अथ राजा दशरथः पुत्रोद्भवं श्रुत्वानंदमग्नो गुरुणासहारिष्टमाययौ । राजीवपत्राक्षं रामं दृष्ट्वा हर्षाश्रुसंप्लुतो गुरुणा जातकर्मादि कर्माणि कारयांचक्रे । अथ कैकेयी भरतमसूत । सुमित्रायां पूर्णेंदुमुखौ यमौ जातौ । तदा राजा ब्राह्मणेभ्यो ग्रामसहस्राणि सुवर्णानि रत्नानि वासांसि शुभाः सुरभीश्च मुदा ददौ । नामकरणे गुरुःप्राह, यस्मिन्मुनयो रमंते वा यो लोकान्रमयति स रामः । भरणाद्भरतः । लक्षणान्वितो लक्ष्मणः । शत्रुहंता शत्रुघ्नः । इत्येषां नामान्यन्वर्थानि भवंतीति । पायसांशानुसारतो लक्ष्मणो रामचंद्रेण शत्रुघ्नो भरतेन च द्वंद्वीभूय चरंतावास्तां । सर्वेऽपि बाललीलया चेष्टितैर्मुग्धभाषितैश्च पितरं स्वमातृश्च रमयामासुः । भाले स्वर्णमयं मुक्ताफलैर्युतमश्वत्थपर्णं, कंठे रत्नमणिसमूहे द्वीपिनखं, कर्णयोर्हेमघटितरत्न*मर्जुनशलाटुकं, पादयोः सिंजानमणियुक्तौ मंजीरौ, बाह्वोरंगदे, कट्यां स्वर्णसूत्रं च दधानं स्मितवक्रमल्पदशनमिंद्रनीलाभमंगणे तर्णकानुसरणेन रिंगमाणं सुतं दृष्ट्वा राजा दशरथः कौसल्या च मुमुदे । एकदा भोजनसमये राजादशरथो हर्षेण प्रेम्णाच रामेहीति वारंवारमाव्हयति । स क्रीडासक्तो नायाति । तदा तमानयेति राजा कौसल्यामाह । सा सस्मिता धावंत्यपि तं स्प्रष्टुं न शक्नोति । अनंतरं स्वयमायाति । कर्दमांकितेन पाणिनैकं कवलं गृहीत्वा पुनरेव पलायते । एवं बाललीलया हर्षयतस्तस्य कल्याणमुद्दिश्य विविधानपूपान्मोदकान्कर्णपूरान् शष्कुलिकाश्च कृत्वा माता मासि मासि वायनानि ददौ । तस्य चापल्यकारणात्तया गृहकृत्यं त्यक्तं । एकदासौ रघुनंदनो मातुःसमीपे गत्वा मातर्भोजनं देहीत्यब्रवीत् । तया कार्यसक्तया तन्न श्रुतं । ततः क्रोधेन गत्वा लगुडेन भांडान्यहन् शिक्यस्थं गव्यं नवनीतंच पातयामास, लक्ष्मणभरतशत्रुघ्नानाहूय तैः सह बुभुजे । सूदेन तद्दृष्ट्वा मात्रे कथितं । तदा तामागतां दृष्ट्वा सर्वैःपलायितं । कौसल्या धावमाना रघुनाथं करे जग्राह । तदा स बालभावमाश्रित्य मंदंमंदं रुरोद । ततो माता कोपं त्यक्त्वा गाढमालिंग्य ते सर्वेऽपि लालिताः । एवं भगवान्मायया बालो भूत्वा तौ दंपती रमयामास । अथ कालेन ते सर्वे कौमारं प्रतिपेदिरे । तदा वसिष्ठेनोपनीताः सर्वविद्याविशारदाः सर्वशास्त्रार्थवेदिनो बभूवुः । सलक्ष्मणो रामश्चापधरस्तूणबाणान्वितोऽश्वारूढो मृ-

---

* अर्जुनवृक्षस्य शलाटुकमपक्वफलं, तदाकारं भूषणं

गयायै वनं गत्वा दुष्टमृगान्हत्वा पित्रे न्यवेदयत् । अन्वहं प्रातरुत्थाय स्स्नातः पितरावभिवाद्य बंधुभिःसहितो भुक्त्वा मुनिभिःसह धर्मशास्त्ररहस्यान्यशृणोत् व्याकरोच्च ॥

**एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वं ॥**
**चक्रे विकारी परिणामहीनो विचार्यमाणे नकरोति किंचित्॥**

इति ग० रा० बालकांडे तृतीयः सर्गः ॥ ३ ॥

---

श्रीमहादेव उवाच । अथ कदाचिदनलप्रभः कौशिकमुनिः परमात्मानं जातं ज्ञात्वा रामं द्रष्टुमयोध्यामभ्यगात् । तं दृष्ट्वा राजा दशरथोऽचिरेण प्रत्युत्थायासने तं प्रतिष्ठाप्य वसिष्ठेन समागम्य यथाविधि पूजयित्वाभिवाद्यच भक्त्या प्रांजलिर्भूत्वाब्रवीत् । मुनींद्र तवागमनादहं कृतार्थोऽस्मि । त्वद्विधा यद्गृहं यांति तत्र सर्वाःसंपद आयांति । भगवन् यदर्थमागतोऽसि तद्ब्रूहि । त्वत्कार्यं निश्चयेन करोमि । तच्छ्रुत्वा महामतिर्विश्वामित्रः प्रीतः प्रत्युवाच । राजन्नहं पर्वणि संप्राप्ते देवान्पितॄन्यष्टुं यदारभे तदा मारीचः सुबाहुश्च तयोरनुचरा अपरे राक्षसाश्च नित्यं विघ्नं कुर्वंति । अतस्तेषां वधार्थं तव ज्येष्ठसुतं रामं भ्रात्रा लक्ष्मणेन सह प्रहिणु । तव श्रेयो भविष्यति । तदा राजा चिंतापरो भूत्वा गुरुमेकांते पप्रच्छ । गुरो किं करवाणि । मम मनो रामं त्यक्तुं नोत्सहते । बहुवर्षसहस्रांतेऽमरतुल्याश्चत्वारः पुत्रा उत्पादितास्तेषां रामोऽतिवल्लभो मे । स इतो गच्छतिचेदहं न जीवामि । यदि मुनिः प्रत्याख्यातो भविष्याति शापं दास्यति न संशयः । तस्मान्मम श्रेयः कथं भवेत् । येन मामसत्यं नस्पृशेत्तमुपायं ब्रूहि । वसिष्ठ उवाच । राजन्देवगुह्यं प्रवक्ष्यामि शृणु । रामो मानुषो नास्ति । भूमेर्भारावताराय पुरा ब्रह्मणा प्रार्थितः परमात्मा तव भवने कौसल्यायां जातः । त्वं पूर्वं ब्राह्मणः सुतः कश्यपनामासीः । कौसल्याचादितिनाम्नी देवमातासीत् । भवंतौ विष्णुपूजाध्यानैकतत्परौ बहुवत्सरमुग्रं तपस्तेपाते । तदा भक्तवत्सलो वरदो भगवान्प्रसन्नो भूत्वा वरं वृणीष्वेत्युवाच । त्वं मे पुत्रो भवेति त्वया याचितोऽसौ भगवान् रामो जातः । शेषो लक्ष्मणो भूत्वा राममन्वपद्यत । चक्रगरुडौ भरतशत्रुघ्नौ जातौ । योगमायापि सीतेति नाम्ना जनकगृहे जातास्ति । विश्वामित्रोऽपि रामाय तां योजयितुमागतः ।

राजन्नेतद्गुह्यतमं कदापि न वक्तव्यं । अतः प्रीतेन मनसा विश्वामित्रं पूजयित्वा रमानाथं राघवं लक्ष्मणेन सह प्रेषयस्व । वसिष्ठेनैवमुक्तो राजा दशरथः प्रमुदितांतर आत्मानं कृतकृत्यमिव मेने । अथ रामराम लक्ष्मणेति सादरं पुत्रावाहूयालिंग्य मूर्ध्न्यवघ्रायच कौशिकाय तौ समर्पयामास । ततोऽतिहृष्टो भगवान्विश्वामित्रः समीपं प्राप्तौ चापतूणीरबाणखड्गधरौ रामलक्ष्मणावाशीर्भिरभिनंद्य ताभ्यां सह ययौ ॥

ततः किंचिद्देशमतिक्रम्य स मुनी रामनाहूय ययोर्ग्रहणमात्रेण क्षुत्क्षामत्वाद्युपाधिर्न जायते ते देवनिर्मिते बलातिबले विद्ये तस्मै ददौ । ततस्ते गंगामुत्तीर्य ताटकावनं जग्मुः । तदा विश्वामित्रः सत्यपराक्रमं रामं प्राह । ताटका नाम कामरूपिणी राक्षस्यत्रास्ति । साखिलं लोकं बाधते । अतस्त्वमविचारयंस्तां जहि । रघुनंदनस्तथेति सगुणं धनुरादाय टंकारमकरोत् । तेन शब्देन वनमपूरयत् । तच्छ्रुत्वा घोररूपिणी ताटका क्रोधसंमूर्छिता राममभिदुद्राव । स तामेकेन शरेणाशु वक्षसि ताडयामास । घोरा सा बहु रुधिरं वमंती विपिने पपात । ततःशापात्पिशाचतां प्राप्ता रामप्रसादतो मुक्ता सा सर्वाभरणभूषितातिसुंदरी यक्षी रामं नत्वा प्रदक्षिणीकृत्य च तस्याज्ञया दिवं गता॥

ततोऽतिहृष्टः परिरभ्य रामं ।
मूर्धन्यवघ्राय विचिंत्य किंचित् ॥
सर्वास्त्रजालं सरहस्यमंत्रं ।
प्रीत्याभिरामाय ददौ मुनींद्रः ॥ १ ॥

इति ग० रा० बा० कांडे चतुर्थः सर्गः ४

---

श्रीमहादेव उवाच । तत्र रम्ये मुनिसंकुले कामाश्रमे कानन एकां रजनीमुषित्वा प्रभाते शनैः प्रस्थितास्ते सिद्धचारणसेवितं सिद्धाश्रमं गताः । तन्निवासिनो मुनयो विश्वामित्रेण संदिष्टा रामलक्ष्मणयोर्महतीं पूजां द्रुतं चक्रुः । श्रीरामः कौशिकं प्राह मुने दीक्षा प्रविश्यतां । तौ राक्षसाधमौ कुतः कदागच्छतस्तद्दर्शयस्व । तथेत्युक्त्वा स मुनिस्तपोधनैःसह यज्ञमारेभे । मध्यान्हे तौ कामरूपिणौ मारीचसुबाहू राक्षसौ रुधिरास्थीनि वर्षंतौ ददृशाते । रामोऽपि धनुरादायाकर्णांतं समाकृष्य द्वौ बाणौ संदधेऽपिच तौ तयोः पृथक्

पृथग्विससर्ज । तयोरेको मारीचं भ्रामयंश्छतयोजनादुपरि जलधौ पातयामास तदद्भुतमिवाभवत् । द्वितीयोऽग्निमयो बाणः सुबाहुं क्षणाज्जघान । तदनुयायिनोऽपरे राक्षसा लक्ष्मणेनाशु हताः । देवा रामलक्ष्मणयोः पुष्पाणि ववृषुः । देवदुंदुभयो नेदुः । सिद्धचारणास्तौ तुष्टुवुः । हर्षबाष्पाकुलेक्षणो विश्वामित्रः पूजार्हौ रघुनंदनौ भक्त्या संपूज्यालिंग्यांके निवेश्य पक्वफलादिभिर्भोजयित्वा मधुराभिः पुराणेतिहासकथाभिर्दिवसत्रयं निनाय ॥

चतुर्थेऽहनि संप्राप्ते कौशिको राममब्रवीत् । रामराम विदेहराजनगरे जनकगृहे महायज्ञं द्रष्टुं वयं गच्छाम । तत्र महासत्वं माहेश्वरं चापं पिनाकिना न्यस्तमस्ति, तद्द्रक्ष्यसि. जनकेन पूजयिष्यसे च । इत्युक्त्वा स मुनिस्ताभ्यां गंगासमीपस्थं गौतमस्य पुण्याश्रमं ययौ । तत्राहल्या तप आस्थिता । राजीवलोचनःश्रीमान् रामो दिव्यपुष्पफलोपेतपादपैः परिवेष्टितं तमाश्रमं मृगपक्षिगणैर्विवर्जितं दृष्ट्वा मुनिमुवाच । भगवन्निदं भास्वन्महाश्रमपदं शुभं भाति । पत्रपुष्पफलैर्युक्तं जंतुभिः परिवर्जितमपि मम चेत आल्हादयति । कस्येदं ब्रूहि । विश्वामित्र उवाच राम पुरावृत्तं शृणु । सर्वधर्मभृतां श्रेष्ठो लोकविश्रुतो गौतममुनिस्तपसा हरिमाराधयन् स्थितः । तस्य ब्रह्मचर्येण संतुष्टो ब्रह्मा लोकसुंदरीं शुश्रूषणपरायणां स्वकन्यामहल्यां तस्मै ददौ । गौतमस्तया सार्धमिहावात्सीत् । कदाचिद्गौतमे गृहान्निर्गत इंद्रस्तस्य वेषेणागत्य तां धर्षयित्वा त्वरितं निरगात् । मुनिरपि स्वगृहमागात् । तदा स्वरूपेणायांतं तं दृष्ट्वा परमकोपनः पप्रच्छ दुरात्मन्मम रूपधरोऽधमः कस्त्वं ? सत्यं ब्रूहि, नोचेत्तव शरीरं भस्मीकरिष्यामि नसंशयः । सोऽब्रवीद्देवराजोऽहं । कुत्सितेन चेतसा मया जुगुप्सितं कर्म कृतं । कामकिंकरं मां पाहि । गौतमःक्रोधताम्राक्षोऽब्रवीत् कामलंपट दुरात्मन् सहस्रभगवान्भव । इति दिविजाधिपं शप्त्वा स्वाश्रमं प्रविश्य वेपमानां प्रांजलिमहल्यां दृष्ट्वोवाच दुष्टे दुर्वृत्ते त्वमस्मिन्नाश्रमे शिलायां लीना भूत्वा निराहारातपानिलवर्षादिसंहिष्णुर्हृदि संस्थितं परमेश्वरं राममेकाग्रमनसा ध्यायंती दिवारात्रं परमं तप आस्थिता भव । अयं ममाश्रमो नानाजंतुविहीनो भविष्यति । एवमनेकेषु वर्षसहस्रेषु गतेषु श्रीमान् दाशरथी राम आगमिष्यति । स यदा त्वदाश्रयशिलां पादाभ्यामाक्रमिष्यति तदैव त्वं धूतपापा रामं भक्तितः संपूज्य परिक्रम्य नमस्कृत्य स्तुत्वा पापाद्विमोक्ष्यसेऽनंतरं मम शुश्रूषां यथासुखं करिष्यसि । इत्युक्त्वा गौतमो हिमवंतं गिरिं प्रागात् । तदाप्रादहल्या भूतानामदृश्या तत्र पादरजःस्पर्शं कांक्षंती पवनाशना दुष्करं तप आ-

स्थितास्ते । रघुश्रेष्ठ तां ब्रह्मणःसुतां मुनेर्भार्यामद्य पुनीहि । इत्युक्त्वा स मुनिपुंगवो राघवं हस्ते गृहीत्वोग्रेण तपसा स्थितामहल्यां दर्शयामास । रामः शिलां पदा स्पृष्ट्वा तां तपोधनामपश्यद्राघवोऽहमिति चाब्रवीत् । ततः पीतकौशेयवाससं चतुर्भुजं शंखचक्रगदापद्मधारिणं धनुर्बाणधरं स्मितवक्त्रं लक्ष्मणेन समन्वितं रमानाथं दृष्ट्वा हर्षविस्फारितेक्षणाहल्या गौतमवचः स्मृत्वा नारायणं ज्ञात्वार्घ्यादिभिर्विधिवत्संपूज्य दंडवत्प्रणिपत्य हर्षाश्रुनयना पुलकितसर्वांगा गद्गदया गिरेट् । अहल्योवाच अहो जगन्निवास तव पादाब्जलग्नरजःकणादहं कृतार्थास्मि । यत्पादपंकजं शंकरादिभिः सदा मृग्यते स साक्षादेव मम दृग्विषय आस्ते अतो मे पुराकृतभागधेयं फलितं । भो राम अहं मूढा योषित्ते तत्वं कथं जाने । तस्मादनन्यधीः शतशो नमस्क्रियां करोमि । देव मम यत्रकुत्रापि स्थितायास्त्वत्पादकमले सदा भक्तिरस्तु । हे भक्तवत्सल नारायण हृषीकेश नमोऽस्तुते ॥

भवभयहरमेकं भानुकोटिप्रकाशं ।<br>
करधृतशरचापं कालमेघावभासं ॥<br>
कनकरुचिरवस्त्रं रत्नवत्कुंडलाढ्यं ।<br>
कमलविशदनेत्रं सानुजं राममीडे ॥ १ ॥

इतिपुरतःस्थितं राघवं स्तुत्वा परिक्रम्य प्रणम्य च तेनानुज्ञाताहल्या पतिमाशु ययौ ॥

इति ग० रा० बा० कां० पंचमः सर्गः ॥ ५ ॥

---

अथ विश्वामित्रः प्राह । वत्सौ जनकनगरीं गच्छामः । क्रतुवरं दृष्ट्वा पश्चाद्युवामयोध्यां गंतुमर्हथः । इत्युक्त्वा ताभ्यांसह गंगामुत्तर्तुं प्रययौ । नौकारोहे रघुनंदनो नाविकेन निषिद्धः । गुह उवाच । भो नाथ आदौ ते पादपंकजे प्रक्षालयामि । तव पादयोर्मानुषीकरणक्षमं चूर्णमस्तीति कथा प्रथीयसी । काष्ठपाषाणयोः किमंतरं ! तव पादांबुजं विमलं कृत्वा पश्चात्त्वां परतीरं नयामि । नोचेत्तव पादधूल्या मम तरी सुयुवतिः स्याच्चेन्मे कुटुंबहानिर्भविष्यति । इत्युक्त्वा तेन पादौ क्षालितौ । ततस्ते परतीरं गता मिथिलां ययुः । कौशिकः प्रातर्मुनिवाटं समाविशत् । जनकस्तं प्राप्तमाकर्ण्य मुदान्वितः पूजाद्रव्याणि संगृह्य सोपाध्यायः समाययौ । अपिच दंडवत्प्रणम्य पूजयामास ।

स राजा सर्वलक्षणसंयुतौ सर्वा दिशो द्योतयंतावपरौ चंद्रसूर्याविव तौ राघवौ दृष्ट्वापि पप्रच्छैतौ नरशार्दूलौ देवसुतोपमौ नरनारायणाविव मनःप्रीतिकरौ कस्य पुत्रौ? तदा प्रीतः स मुनिर्जनकं प्रत्युवाच एतौ दशरथस्य पुत्रौ भ्रातरौ रामलक्ष्मणौ मखसंरक्षणार्थं मया पितुः पुरादानीतौ। आगच्छन्नतिविक्रांतो मया प्रेरितो राघवो मार्गे विश्वघातिनीं ताटकामेकेन शरेणाहन्। ततो ममाश्रमं गत्वा मे यज्ञविघातिनः सुबाहुप्रमुखान्राक्षसान्हत्वा मारीचं सागरेऽक्षिपत्। ततो गंगातटे गौतमस्य पुण्याश्रमे गत्वा तत्र शिलारूपां तस्य वधूमहल्यां पादपंकजरजःस्पर्शान्मानुषरूपिणीं कृत्वा नमस्कृत्य तया सम्यक्प्रपूजितस्तव गृहे पूजितं माहेश्वरं धनुर्द्रष्टुकाम आगतः। तत्सर्वं राजभिर्दृष्टमित्यनेन श्रुतं। राजेंद्र तच्छैवमनुत्तमं चापं रामाय दर्शय। स तदवलोक्य पितरं द्रष्टुमयोध्यां गंतुमिच्छति। मुनिनेत्युक्तो धर्मज्ञः स राजा पूजार्हौ तौ कुमारौ विधिदृष्टेन कर्मणार्चयामास। ततो मंत्रिणं संप्रेष्योवाच विश्वेशचापं शीघ्रमानय। रामो द्रष्टुकामस्तस्मै दर्शय ॥

मंत्रिणि गते राजा कौशिकमब्रवीत् यदि रामो धनुर्धृत्वा कोट्या गुणं समारोपयेदहं तस्मै मम कन्यां सीतां दास्यामि। कौशिकस्तथेत्युक्त्वा रामं सस्मितं संवीक्ष्याह एवं भवतु। अमिततेजसे राघवाय तच्चापाग्र्यं शीघ्रं दर्शय। मुनीश एवं वदति पंचसहस्रसंख्याका बलिनश्चापवाहका घंटाशतसमायुक्तं मणिभूषितं धनुर्गृहीत्वागताः। मंत्री तद्रामाय दर्शयामास। स तद्दृष्ट्वा प्रहृष्टात्मा दृढं परिकरं बध्वा वामहस्तेन गृहीत्वा लीलया तोलयन्नखिलराजसु पश्यत्सु गुणमारोप्य दक्षिणेन पाणिनेषदाकर्षयामास ततस्तद्बभंज। तदा दिशो विदिशः स्वर्गं मर्त्यलोकं रसातलंच पूरयन्महांश्छब्दोऽभूत्। दिवौकसो रामं कुसुमैराच्छादयंतः स्तुतिभिरीडांचक्रिरे। देवदुंदुभयो नेदुः। अप्सरोगणा ननृतुः। जनको धनुर्द्विधाभग्नं दृष्ट्वा रघूद्वहमालिंग्यातिहृष्टो जातः। अंतःपुराजिर आगताःसीतामातरो विस्मयं लेभिरे। स्वर्णवर्णा स्मितवक्त्रा सर्वाभरणभूषिता क्वणच्चरणनूपुरा दुकूलपरिसंवीता मुक्ताहारैः कर्णपत्रैरुपलक्षिता सीता दक्षिणकरे स्वर्णमयीं मालां गृहीत्वा रामस्य कंठे निक्षिप्य मुदं ययौ। ततः सर्वे राजदारा लोकाविमोहनं रामं दृष्ट्वा मुमुदिरे।

अथ सर्वशास्त्रविशारदो राजा मुनिमब्रवीत्। भो ऋषिवर्य कौशिक, दशरथाय पत्रं सत्वरं प्रेषय। कुमाराणां विवाहार्थं राजा दशरथः सदारःसपत्रः सामात्यः सपरिवारः शीघ्रमागच्छतु। स तथेति त्वरितपादक्रमान्दूतान्प्रे-

षयामास । ते गत्वा राजशार्दूलं रामश्रेयो न्यवेदयन् । रामकृतं धनुर्भंगं श्रुत्वा दशरथो महता हर्षेण मिथिलागमनार्थं मंत्रिणस्त्वरयामास । राजोवाच । गजाश्वरथपत्ति सर्वं मिथिलां गच्छतु । मम रथं शीघ्रमानय । अद्यैव गच्छामि । सदारो गुरुर्वसिष्ठोऽग्रे यातु । एवं सर्वान्प्रस्थाप्य राममातॄः समादाय महांतं रथमारुह्य स राजर्षिर्महत्या सेनया सार्धं त्वरितो ययौ

दशरथमागतं श्रुत्वा हर्षसमाकुलो राजा जनकः शतानंदपुरोधसा प्रत्युज्जगाम, तं संपूज्य प्रासादं निनाय च । सलक्ष्मणो रामः पितुश्चरणावाशु ववंदे । ततो हृष्टो दशरथो रामं वचनमब्रवीत् । राम फुल्लांबुजोपमं ते मुखं दिष्ट्या पश्यामि । मुनेरनुग्राहान्मे सर्वं शोभनं संपन्नं । इत्युक्त्वा तस्य मूर्धानमाघ्राय पुनः पुनरालिंग्य महता हर्षेणाविष्टो ब्रह्मानंदं मेने । ततो जनकेन सदारः ससुतः सुखी स सर्वभोगाढ्ये शोभने मंदिरे सन्निवेशितः । ततः स धर्मज्ञो राजा शुभे दिने समुहूर्ते लग्ने सभ्रातृकं रामं स्वगृहमानीय रत्नस्तंभसुविस्तोर सुविताने सुतोरणे मुक्तापुष्पफलान्विते सर्वशोभाढ्ये भेरीदुंदुभिनिर्घोषैर्गीतनृत्यैः समाकुले वेदविद्भिः स्वर्णभूषितैर्ब्राह्मणैः सुसंबाधे निष्ककंठीभिः सुवासिनीभिरावृते मंडपे दिव्यरत्नांचिते स्वर्णपीठे तं न्यवेशयत् । शतानंदः पुरोहितो रामस्योभयपार्श्वयोर्वसिष्ठं कौशिकंच स्थापयित्वा तौ यथाक्रममपूजयत् । ततः सभार्यो जनकोऽग्निं यथाविधि स्थापयित्वा प्रज्वाल्य च नानारत्नविभूषितां शोभाढ्यां सीतामानीयाग्रे कृत्वा रामंप्रति प्रायात् । तस्य पादौ विधिवत्प्रक्षाल्य तदपो मूर्ध्न्यधारयत् । ततः सीतां करे धृत्वा साक्षतोदकपूर्वकं पाणिग्रहविधानतो रामाय प्रीत्या ददौ । भो रघूत्तम, कमलपत्राक्षी स्वर्णमुक्तादिभूषिता मे सुता सीता तुभ्यं दीयत इतिब्रुवन्प्रीतेन मनसा तां रामकरेऽर्पयञ्जनको विष्णवे लक्ष्मीं समर्पयन्क्षीराब्धिरिव मुमुदे । ततः स औरसीं कन्यामूर्मिलां लक्ष्मणाय मुदा ददौ । तथा भ्रातुः कुशध्वजस्य कन्यके मांडवीश्रुतकीर्ती भरतशत्रुघ्नाभ्यां ददौ । एवं दारसंपन्नास्ते चत्वारो भ्रातरोऽपरे लोकपाला इव रेजुः । ततो जनको नारदेनाभिभाषितं स्वसुतोदंतं कौशिकवसिष्ठाभ्यां कथयामास ॥

जनक उवाच । यज्ञभूमिविशुद्ध्यर्थं लांगलेन कर्षतो मे सीतामुखाच्छुभलक्षणा कन्यका समुत्पन्ना । अहं तां पुत्रिकाभावेन प्रीत्याद्राक्षं । एकदा मयि विविक्ते संस्थिते योगीश्वरो नारदो *महतीं वीणां रणयन्नारायणस्तुतिं

* विश्वावसोस्तु बृहती तुंबरोस्तु कलावती । महती नारदस्य

गायन्नभ्यागात् । स मया पूजितः सुखमासीनो मामुवाच, तवाभ्युदयकारणं गुह्यं वचनं ब्रवीमि शृणु । परमात्मा हृषीकेशो भक्तानुग्रहकाम्यया देवकार्यसिद्ध्यर्थं रावणस्य वधाय च मायामानुषवेषधारी जातो राम इति ख्यातो दशरथगृहे चतुर्धा भूत्वास्ते । योगमायापि तत्र वेश्मनि सीतेति जाता । अतस्तां प्रयत्नेन राघवायैव देहि । इत्युक्त्वा स मुनिर्देवलोकं गतः । तदारभ्य सीता विष्णोर्लक्ष्मीरिति मुदा विभाव्यते । तां राघवाय कथं दद्यामिति चिंतासमाविष्टोऽहमेकं कार्यमचिंतयं । पुरा त्रिपुरदाहादनंतरमीश्वरेण मत्पितामहगेहे क्षिप्तमिदं धनुर्न्यासभूतमास्ते । सीतापाणिग्रहार्थं सर्वेषां माननाशनं तदेव पणविषयं कुर्यामिति विचिंत्य मया तथा कृतं । मुनिश्रेष्ठ त्वत्प्रसादाद्रामो धनुर्द्रष्टुमागतो मे मनोरथः फलितश्च । राम अद्य त्वां सीतयासहैकासनस्थं भ्राजमानं रविमिव यत्पश्यामि तन्मे जन्मसाफल्यं । त्वत्पादांबुधरो ब्रह्मा सृष्टिचक्रप्रवर्तकः । बलिस्त्वत्पादांबु धृत्वा दितिजाधिपोऽभूत् । त्वत्पादपांसुस्पर्शादहल्या भर्तृशापतः सद्य एव विनिर्मुक्ता । त्वत्तोऽधिरक्षिता कोऽन्यः।

यत्पादपंकजपरागसुरागयोगि ॥
वृंदैर्जितं भवभयं जितकालचक्रैः ॥
यन्नामकीर्तनपरा जितदुःखशोका ॥
देवास्तमेव शरणं सततं प्रपद्ये ॥ १ ॥

इति स्तुत्वा दुहितृवत्सलो जनको राघवाय दीनाराणां कोटिशतं रथानामयुतमश्वानां नियुतं दिव्यांबराणि मुक्तारत्नमयोज्ज्वलान्हारांश्च ददौ । तथा स राजा वसिष्ठादीन्भरतं लक्ष्मणं शत्रुघ्नं सभार्यं नृपं दशरथंच यथो चितवस्त्राभरणैः पूजयित्वा प्रस्थापयामास । सीतामातरः साश्रुलोचना रुदतीं तामालिंग्य वत्से नित्यं श्वश्रूशुश्रूषणपरा भव, पातिव्रत्यमुपालंब्य राममनुव्रता यथासुखं तिष्ठति शिक्षयामासुः ॥

प्रयाणकाले रघुनंदनस्य भेरीमृदंगानकतूर्यघोषः ॥
स्ववासिभेरीघनतूर्यशब्दैःसंमूर्छितो भूतभयंकरोऽभूत् १

इति रा० रा० बा० कां० षष्ठः सर्गः ॥ ६ ॥

---

स्यात्सरस्वत्यास्तुकच्छपी । इति वीणाविशेषाः ॥

अथ श्रीरामे मिथिलाया योजनत्रयं गते दशरथोऽतिघोराणि निमित्तानि ददर्श । तदा वसिष्ठं नत्वा पप्रच्छ मुनिपुंगव, विषमाणि निमित्तानि समंततो दृश्यंते । किमिदं ? वसिष्ठस्तं प्राह आगामि भयं सूच्यते । परं पुनःशीघ्रमेव तेऽभयं भविष्यति । मृगास्त्वां प्रदक्षिणं यांति पश्य । ते शुभसूचकाः संति। एवं वदतस्तस्य पांसुवृष्टिभिरर्दयन्सर्वेषां चक्षूंषि मुष्णन् घोरतरोऽनिलो ववौ । ततो ग्रजन्नग्रे विद्युत्पुंजसमप्रभं तेजोराशिमुपस्थितं ददर्श । अथ नीलमेघनिभः प्रांशुजटामंडलमंडितो धनुःपरशुपाणिःसाक्षात्काल इव दृप्तक्षत्रियमर्दनः कार्तवीर्यांतकः प्रतापवाञ्जामदग्न्योऽपरः काल इव दशरथस्याग्र आविरासीत्। तं दृष्ट्वा भयसंत्रस्तो राजार्घ्यादिपूजां विस्मृत्य त्रायस्वत्रायस्वेति ब्रुवन्दंडवत्प्रणिपत्य मे पुत्रप्राणान्प्रयच्छेत्याह । तमनादृत्य क्रोधात्प्रज्वलितेन्द्रियः स रामं निष्ठुरं वाक्यमुवाच । रे क्षत्रियाधम त्वं राम इति मे नाम्ना पृथिवीं चरसि, अतो मच्छत्रुरसि । यदि त्वं क्षत्रियोऽसि द्वंद्वयुद्धमाशु मे प्रयच्छ । किंतु यावत्ते परीक्षां न प्राप्स्ये तावत्त्वयि युद्धायोद्यतेऽपि त्वया सह न योत्स्ये । तत्पुराणं जर्जरं चापं भंक्त्वा त्वं मुधा कत्थसे । अस्मिन्मम वैष्णवे चापे गुणमारोपयसिचेत्त्वां तुल्यबलं विज्ञाय त्वया योत्स्ये । गुणारोपणे तवासामर्थ्ये त्वदीयान्सर्वान्हनिष्यामि । क्षत्रियांतकरोऽस्म्यहं । मां नजानासि किं ? इति तस्मिन्ब्रुवति वसुधा भृशं चचाल ॥

दाशरथी रामो भार्गवं रुषा वीक्ष्य तस्य हस्ताद्धनुराच्छिद्यांजसा गुणमारोप्य तूणीराद्बाणमादाय संधायाकृष्यच तमुवाच । ब्रह्मन्मम वचः शृणु । मम सायकोऽमोघः। तव पादयुगं वा तपोर्जितॉंल्लोकान्वा बाणस्य लक्ष्यं दर्शय। इत ऊर्ध्वमयं लोकः परो वा यथा त्वया गंतुं न शक्यते तथा करिष्यामि। किं कार्यं तच्छीघ्रं वद । एवं श्रीरामे वदति भार्गवो विकृताननः पूर्ववृत्तांतं स्मरन्निदं वचनमब्रवीत् । राम राम महाबाहो त्वां परमेश्वरमहं जानामि । बाल्येऽहं विष्णुमाराधयितुं चक्रतीर्थं गत्वा तपसा तमतोषयं । ततःप्रसन्नो देवेशो मामुवाच, ब्रह्मन् तपसो विरम । तव तपः फलितं । त्वं मच्चिदंशेन युक्तोऽसि। यद्वधार्थं तपसः श्रमः कृतस्तं पितृहणं कार्तवीर्यं जहि । ततस्त्रिःसप्तवारं क्षत्रियमंडलं हत्वा कृत्स्नां भूमिं कश्यपाय दत्वा शांतिमुपावह । अहं त्रेतामुखे दाशरथिर्भूत्वा परया शक्त्योत्पत्स्ये तदा मां द्रक्ष्यसि । ततस्त्वयि स्थापितं मत्तेजः पुनरादास्ये । तदा त्वं तपश्चरन्ब्रह्मणो दिनं भूलोके तिष्ठ । इत्युक्त्वा देवोंऽतर्दधे । मया सर्वं तथा कृतं । राम त्वं स एव विष्णुर्ब्रह्मणा-

र्थितो जातोऽसि । मयि स्थितं त्वत्तेजस्त्वय्यैव पुनराहृतं । प्रभो ब्रह्मादिभिर-लभ्यस्त्वं मया पुनर्दृष्टोऽसि । अद्य मे जन्म सफलं जातं । त्वत्पादयुगले मम भक्तिर्जन्मनि जन्मन्यस्तु । **नमोऽस्तु जगतां नाथ नमस्ते भक्तिभावन ॥ नमःकारुणिकानंत रामचंद्र नमोऽस्तुते ॥** देव परलोकजिगीषया यद्य-त्पुण्यं मया कृतं तत्सर्वं तव बाणनाश्यं भूयात् । पुण्यतीर्थगमनाय मे गतिं रक्ष । ततः प्रसन्नेन भगवता रामचंद्रेण तथेत्युक्तस्तं परिक्रम्य प्रणम्य तेन पूजितोऽनुज्ञातश्च महेंद्राचलमन्वगात् ॥

राजा दशरथः क्षत्रियकुलांतकं पराभूयायांतं रामं दृष्ट्वा हृष्टो मृतो-त्थितमिवागतमालिंग्यालिंग्य हर्षेण नेत्राभ्यां जलमुदसृजत् । ततः स्वस्थचितः प्रीतेन मनसा स्वपुरं ययौ । रामलक्ष्मणभरतशत्रुघ्ना स्वा-स्वा भार्या उपादाय स्वस्वमंदिरेषु रेमिरे । अथ युधाजिन्नामा कैकेयीभ्राता भरतमातुलो भरतं स्व-राज्यं नेतुमागतः । राजा तं संपूज्य भरतं शत्रुघ्नं चापि प्रेषयामास । देवी कौसल्या सीतया रामेण सह शच्या शक्रेणच देवमातेव शुशुभे ॥

साकेते लोकनाथप्रथितगुणगणो लोकसंगीतकीर्तिः ॥
श्रीरामः सीतयास्तेऽखिलजननिकरानंदसंदोहमूर्तिः ॥
नित्यश्रीर्निर्विकरो निरवधिविभवो नित्यमायानिरासो ॥
मायाकार्यानुसारी मनुज इव सदा भाति देवोऽखिलेशः ॥

इति रा० रा० बा० कां० सप्तमः सर्गः ॥ ७ ॥

इति बालकांडः समाप्तः

## ॥ अथ अयोध्याकांडप्रारंभः ॥

श्रीमहादेव उवाच । अथैकदा स्वांतःपुराजिरे सिंहासने सुखमासीनं सर्वाभरणसंपन्नं सीतया रत्नदंडचामरेण वीजितं तां तांबूलचर्वणादिभिर्विनोद-यंतं रामं द्रष्टुं नारदोऽम्बरादवातरत् । शुद्धस्फटिकसंकाशं दिव्यदर्शनं तं मु-निमतर्कितमुपायांतं दृष्ट्वा रामः सहसोत्थाय कृतांजलिः सीतयासह भूमौ शि-रसा ननाम । अपिच परमया प्रीत्या युत उवाच । मुनिश्रेष्ठ संसारिणां त-

च दर्शनं दुर्लभं । अस्मकं विषयासक्तचेतसां तु नितरां दुर्लभं । तादृशमपि यन्मयाप्राप्तं तत्पूर्वजन्मकृतपुण्यानां महत्फलं । मुनीश्वर त्वद्दर्शनादेव कृतार्थोऽस्मि । तत्र किं कार्यं मया कार्यं ब्रूहि तत्करवाणि ॥

अथ नारदो भक्तवत्सलं तं प्राह । राम लोकानुसारिभिर्वाक्यैर्मां किं मोहयसि विभो अहं संसारीति यत्त्वया प्रोक्तं तत्सत्यं । जगतामादिभूता या माया सा तव गृहिणी । त्वत्सन्निकर्षात्तस्यां ब्रह्मादयः प्रजा जायंते । लोकत्रयरूपगृहे त्वं गृहस्थ इत्युदाहृतः । त्वं विष्णुः जानकी लक्ष्मीः । त्वं शिवो जानकी शिवा । त्वं ब्रह्मा जानकी वाणी । राघव किं बहुनोक्तेन? लोके यावत्पुन्नामवाचकं तत्सर्वं त्वं । यावत्स्त्रीनामवाचकं तत्सर्वं जानकी । तस्माल्लोकत्रये युवाभ्यामन्यत्किमपि नास्ति । अहं त्वद्भक्तभक्तानां तद्भक्तानांच किंकरः । अतः प्रभो मामनुगृह्णीष्व । मा मां मोहयस्व । त्वन्नाभिकमलोत्पन्नो ब्रह्मा मम पिता । अतोऽहं तव पौत्रोऽस्मि । भक्तं मां पाहि ॥ इत्युक्त्वा बहुशो नत्वोवाच । राम अहं ब्रह्मणा त्वन्निकटे संदेशं वक्तुं प्रेरितोऽस्मि । त्वं रावणस्य वधार्थाय जातोऽसि । इदानीं राज्यरक्षार्थं पिता त्वामभिषेक्ष्यति । यदि त्वं राज्यासक्तो भविष्यसि रावणं न हनिष्यसि । भूभारहरणे त्वया प्रतिज्ञा कृता । त्वं सत्यप्रतिज्ञोऽसि, तस्मात्प्रतिज्ञातं वचः सत्यं कुरु । एतद्वदितं श्रुत्वा रामो नारदं सस्मितं प्राह । मुने अपि क्वचिद्देशे काले वा किंचिद्वस्तु मेऽविदितं विद्यते? यत्पूर्वं प्रतिज्ञातं तत्करिष्ये नसंशयः । किंतु कालापेक्षा वर्तते । सर्वभूभारभूतमसुरमंडलं क्रमेण हनिष्यामि । रावणस्य विनाशार्थं दंडकावनं श्वो गंतास्मि । तत्र मुनिवेषधरश्चतुर्दश समा उषित्वा सीतामोक्षमिषेण तं दुष्टं सकुलं नाशयिष्यामि । एवं रामेण प्रतिज्ञाते नारदः प्रमुमुदेऽपिच तं प्रदक्षिणात्रयं कृत्वा दंडवत्प्रणिपत्यानुज्ञां गृहीत्वा देवलोकं ययौ ॥

इति गद्यरामायणे अयोध्याकांडे प्रथमःसर्गः ॥ १ ॥

---

श्रीमहादेव उवाच । अथ कदाचिद्राजा दशरथो रहसि स्थितःस्वकुलाचार्यं वसिष्ठमाहूयेदमभाषत । भगवन् अखिलाःप्रजाः पौरा विशेषतो वृद्धा मंत्रिणः सर्वे रामं मुहुर्मुहुः प्रशंसंति । अहं वृद्धोऽस्मि । ततःसर्वगुणोपेतं ज्येष्ठं पुत्रं श्व एव राज्येऽभिषेक्ष्यामि । भवांस्तदनुमोदतां । संभाराः संभ्रियंतां । गच्छ राघवं मंत्रय । नानावर्णाः पताकाःस्वर्णमुक्तामयानि विचित्राणि तोरणानिच समंतत उच्छ्रियंतां । अथ राजा सुमंत्रं मंत्रिणमाहूयाब्रवीत्

मुनिस्त्वां यद्यदाज्ञापयाति तत्तत्समानय । श्वो रघुनंदनं यौवराज्येऽभिषेक्ष्यामि । स तथेत्युक्त्वा हर्षेण मुनिमभाषत किं करोमि तदाज्ञापय ॥

वसिष्ठ उवाच । श्वःप्रभाते स्वर्णभूषिताः षोडशाकन्यका मध्यकक्ष्यायां तिष्ठंतु । ऐरावतकुलोद्भवश्चतुर्दंतो गजः स्वर्णरत्नादिभूषितःसमायातु । नानातीर्थोदकैःपूर्णाःस्वर्णकुंभाःस्थाप्यंतां । भद्रपीठास्तरणार्थं नव त्रीणि वा वैय्याघ्रचर्माण्यानय । रत्नदंडं मुक्तामणिविराजितं श्वेतछत्रं दिव्यान्याभरणानि वस्त्राणि माल्यानि चानय । तत्र सत्कृताःकुशपाणयो मुनयस्तिष्ठंतु । प्रासादाजिरे वारमुख्या नर्तक्यो नृत्यंतु । गायका गायंतु । वेणुध्मास्तथा नानावादित्रकुशला वादयंतु । हस्त्यश्वरथपादाताः सायुधा बहिस्तिष्ठंतु । नगरे यानि देवतायतनानि तिष्ठंति तेषु नानाबलिभिरादृताः पूजाः प्रवर्ततां । नानोपायनपाणयो राजानः शीघ्रमायांतु । इति सुमंत्रमादिश्य श्रीमान्मुनिः स्वयं रथमारुह्य राघवस्यातिशोभनं भवनं जगाम । तत्र तिस्रःकक्ष्या अतिक्रम्य रथात्क्षितिमवातरत् । अंतःप्रविश्याचार्यत्वाद्द्वारपालैरवारितोऽतःपुरं प्रविष्टः ।

गुरुमागतं ज्ञात्वा रामस्तूर्णं प्रत्युद्गम्य भक्तिसंयुतः कृतांजालिर्दंडवत्प्रणनाम । अथ तं रत्नासने समावेश्य सीतया रत्नपात्रानीतेन जलेन पादौ प्रक्षाल्य तत्तीर्थं पत्न्यासह शिरसा धृत्वाब्रवीत् । गुरो तव पादांबुधारणाद्धन्योऽस्मि । श्रीरामेणैवमुक्तो मुनिः प्रहसन्नुवाच । गिरिजापतिस्त्वत्पादसलिलं मूर्ध्नि धृत्वा धन्योऽभूत् । मत्पिता ब्रह्मा त्वच्चरणोदकेन हताशुभः । इदानीं त्वं यद्भाषसे तल्लोकानामुपदेशकृत् । देवकार्यसिद्ध्यर्थं भक्तोद्धारार्थं रावणस्यवधार्थंच लक्ष्म्यासह जातं परमात्मानं त्वां जानामि । तथापि देवकार्यार्थं गुह्यं नोद्घाटयामि । भो राम त्वं गुरूणां गुरुः । देवपितृणां पितामहः । अहं तव शिष्योऽस्मि । यथा त्वं मायया सर्वं करोषि तथैवाहमनुविधास्ये । दूष्यजीवनं पौरोहित्यं विगर्ह्यमहं जाने । इक्ष्वाकूणांकुले परमात्मा रामो जनिष्यत इति पुरा ब्रह्मणा कथितं मया पूर्वमेव ज्ञातं । ततस्तव संबंधाकांक्षया तवाचार्यत्वसिद्धये गर्हितमपि पौरोहित्यमकार्यं । भो राम अद्य मे मनोरथः फलितः । त्वदधीना माया मां यथा नमोहयेत्तथा कुरु । यदि त्वं गुरुनिष्कृतिकामोऽसि एतदेव मे देहि । राम प्रसंगात्सर्वमप्यत्र मयोक्तं । किंतु न कुत्रचिदप्येतद्वाच्यं । प्रकृतमनुसरामः ॥

भो राम ! राजा दशरथस्त्वां यौवराज्येऽश्वोऽभिषेक्ष्यतीति त्वामामंत्रयितुमहं राज्ञा प्रेषितोऽस्मि । अद्य त्वं सीतयासार्धमुपवासं कृत्वा भूमिशायी

जितेंद्रियः शुचिर्भव । अहं राजसान्निध्यं गच्छामि । त्वं प्रातर्गमिष्यसि । इत्युक्त्वा रथमारुह्य द्रुतं गत्वा नृपं सर्वं कृतं न्यवेदयत् । गुरौ गते रामो लक्ष्मणं दृष्ट्वा प्रहसन्नब्रवीत् सौमित्रे यौवराज्ये श्वो मेऽभिषेको भविष्यति । अहं निमित्तमात्रमेव । कर्ता भोक्ता च त्वमेव मे बहिः प्राणः । अत्र विचारणा न कार्या । अथ रामो वसिष्ठेन यथाभाषितं तथाकरोत् ॥

यदा वसिष्ठस्य पुरो राज्ञा रामाभिषेचनमुपन्यस्तं तदैव तत्रस्थितः कश्चित्पुमान् गत्वा राममात्रे कौसल्यायै तथा सुमित्रायै तन्न्यवेदयत् । तच्छ्रुत्वा ते हर्षसंपूर्णे तस्मायुत्तमं हारं ददतुः । पुत्रवत्सला कौसल्या रामस्यार्थसिद्धये लक्ष्मीं देवीं पर्यचरत् । कैकेयीवशगो राजा प्रतिज्ञातं करिष्यति किमिति व्याकुलचित्ता सा दुर्गां देवीमपूजयत् । एतस्मिन्नंतरे स्वर्गे देवा दैवीं वाणीमचोदयन् । देवि भुवो लोकमयोध्यां गच्छ । ब्रह्मवाक्यतो रामाभिषेकविघ्नार्थं यतस्व । आदौ मंथरां दासीं ततः कैकेयीं प्रविश । ततो विघ्ने समुत्पन्ने पुनर्दिवमेहि । तथेत्युक्त्वा सा तथा चक्रे ॥

अथ कदाचित्त्रिवक्रा कुब्जा प्रासादाग्रमारूढा परितो नगरं समलंकृतं सर्वोत्सवसमायुक्तं दृष्ट्वा विस्मितावरुह्य धात्रीं पप्रच्छ मातर्नगरं किमर्थं समलंकृतं ? धात्री तामुवाच श्वो रामचंद्राभिषेचनं भविष्यति तेनाद्य पुरं सर्वतोऽलंकृतं । तच्छ्रुत्वा त्वरितं गत्वैकांते पर्यंकस्थां कैकेयीमब्रवीत् दुर्भगे मूढे किं शेषे ? महद्भयमुपस्थितं न जानीषे ? राज्ञोऽनुग्रहाद्रामस्य श्वोऽभिषेको भविष्यति । तच्छ्रुत्वा प्रियवादिनी कैकेयी सहसोत्थाय तस्यै रत्नभूषितं नूपुरं ददौ । अपिचाब्रवीत् हर्षस्थाने भयमागतमिति किं मंत्रयसे ? रामो मे भरतादधिकप्रियकृदस्ति । कौसल्यानिर्विशेषं पश्यन्मां सदा शुश्रूषते । मूढे रामात्तव किं भयमापन्नं तद्वद ॥

कुब्जोवाच । देवि शृणु । तव महद्भयमुपस्थितमिति यन्मयोच्यते तत्सत्यमेव । त्वां वाचा परितोषयन्कामुकःस राजा सदा प्रियवाक्यानि भाषते-तथाप्यतथ्यवादी स राममातुरेव बहुतरं हितं करोति । मनस्येतन्निधायैव तव सुतं मातुलकुले प्रेषयामास । सुमित्रायाः समीचीनं शुभं भविष्यति नसंशयः । यतो लक्ष्मणः सदा राममन्वेति स राज्यमनुभविष्यति । भरतो राघवस्याग्रे किंकरो भविष्यति, वा नगराद्विवास्यते वा प्राणैर्विमोक्ष्यते वा । त्वं तु दासीव कौसल्यां नित्यं परिचरिष्यसि । सपत्न्याः सकाशाद्यः परिभवस्ततो मरणमपि श्रेयः । अतो भरतस्याभिषेचने रामस्य वनवासार्थं चाद्य शीघ्रं य-

तस्य । हे राज्ञि तव पुत्रोऽभयस्थाने रूढो राज्ये दृढो भविष्यति । सर्वगु णोपेते रामे ज्येष्ठे सुते विद्यमाने कनीयसो मम पुत्रस्य कथं राज्यप्राप्तिर्भविष्यतीति चिंतायां सुनिश्चितमुपायमहं प्रवक्ष्यामि । पुरा देवासुरयुद्ध इंद्रेण स्वयं याचितो महारथो धन्वी राजा दशरथस्तस्य सहायार्थं त्वयासह जगाम । राक्षसैः सह युद्धं कुर्वतस्तस्य रथस्याक्षकीलश्छिन्नो न्यपतत् । स तन्नाविवेद । त्वं तु पतिप्राणपरीप्सया कीलरंध्रे हस्तं समावेश्य धैर्यतःस्थिता । ततः सर्वानसुरान्हत्वा यदा राजा त्वां ददर्श तदा परमाश्चर्यं लेभे । अपिच मुदान्वितस्त्वामालिंग्य यत्ते मनसि वांछितं तद्वरद्वयं वृणीष्वेत्यवदत् । तदा त्वयो क्तं राजन्यदि वरदोऽसि एतन्मम वरद्वयं त्वय्येव न्यासभूतं तिष्ठतु । यदा मेऽवसरो भूयात्तदा देहि । स तथेत्युक्त्वा मंदिरं व्रजेति त्वामुक्तवान् । एतत्सर्वं मया त्वत्त एव श्रुतं । अतः शीघ्रं क्रोधागारं प्रविश्य रुषान्विता सर्वाण्याभरणानि विमुच्य भूमावेव शयाना त्वं तूष्णीं तिष्ठ । शतशः प्रार्थितापि त्वदुक्तं करिष्यामीति प्रतिज्ञापर्यंतं राज्ञासह मावद ॥

इति मंथरोपदेशं श्रुत्वा दुःसंगाहितविभ्रमा कैकेयी तमेव तथ्यं मेनेऽपिच तामाह वक्रसुंदरि कुतस्त ईदृशी बुद्धिः ? अहं त्वामेवं बुद्धिसंपन्नां न ज्ञातवती । मम प्रियसुतो भरतो यदि राजा भविष्यति तदा ते शतग्रामान्प्रदास्यामि । त्वं मम प्राणवल्लभासि । इत्युक्त्वा कैकेयी सहसा कोपभवनं प्रविश्य सर्वाभरणानि रुषा विमुच्य समंततः परिकीर्यत्र भूमौ शयाना मलिना प्रोवाच कुब्जे शृणु । यावद्रामो वनं व्रजेत्तावदेवं शयिष्ये । तद्गमने तु प्राणांस्त्यक्ष्यामि । इत्युक्त्वा तथा करोत् । राज्ञि निश्चयेन वर्तस्व, तव कल्याणं भविष्यतीत्युक्त्वा कुब्जा गृहं ययौ ॥

धीरोऽत्यंतदयान्वितोऽपि सुगुणाचारान्वितोवाथवा ॥
नीतिज्ञो विधिवाददेशिकपरो विद्याविवेकोऽथवा ॥
दुष्टानामतिपापभावितधियां संगं सदाचेद्व्रजेत् ॥
तद्बुद्ध्यापरिभावितो व्रजति तत्साम्यं क्रमेण स्फुटं १
अतःसंगःपरित्याज्यो दुष्टानां सर्वदैवहि ॥
दुःसंगी च्यवते स्वार्थाद्यथेयं राजकन्यका ॥ २ ॥

इति रा० रा० अ० कां० द्वितीयः सर्गः ॥ २ ॥

श्रीमहादेव उवाच । ततो राजा दशरथः सानंदः कैकेयीमंदिरमाविशत् । तत्र प्रियामदृष्ट्वा किमेतदिति विव्हलो या नित्यं मयि मंदिरे प्राप्ते मामुपायाति साद्य किं नदृश्यत इत्यात्मन्येव संचिंत्यातिविषण्णेन मनसा दासीसमूहं पप्रच्छ कुतो वः स्वामिनी? प्रियदर्शना मत्प्रिया यथापूर्वं किं नायाति? ता ऊचुः सा रुषान्वितैकांते तिष्ठति । वयं तत्कारणं न विद्मः । देव त्वं तत्र गत्वा निश्चेतुमर्हसि । इत्युक्तो भयसंत्रस्तो राजा तत्र गत्वा समीपमुपविश्य पाणिना शनैर्देहं स्पृशन्नब्रवीत् सखि पर्यंकादीन्विहाय भूमौ किं शेषे? त्वं मां खेदयसे यतो नावभाषसे । अलंकारान्परित्यज्य मलिनवाससा भूमौ किमर्थं तिष्ठसि ब्रूहि । सकलं तव वांछितं विधास्ये । नारी वा पुरुषो वा यस्तवाहितकर्ता स मे वध्यो भविष्यति । देवि यत्ते प्रियकरं तन्ममाग्रतोऽवश्यं ब्रूहि । सुदुर्लभमपि तदिदानीं क्षणात्साधयिष्ये । त्वं मम स्वांतं जानासि । प्रियं मां स्वाधीनं ज्ञात्वापि खेदयसे । वृथायं परिश्रमः । कं ते प्रियकरं दरिद्रं धनिनं कुर्यां वा कं धनिनं तवाहितं क्षणमात्रेण निर्धनं कुर्यां वा कं वधिष्यामि वा वधार्हं कं विमोक्ष्यामि ब्रूहि । प्रिये किं बहुनोक्तेन, त्वदर्थं प्राणान्दास्यामि । यो मत्प्राणात्प्रियतरो रामस्तस्य शपथं करोमि । यत्त्वद्धितं तत्करोमि ब्रूहि ॥

इति ब्रुवाणं राघवेण शपथं कुर्वंतं राजानं सा शनैः शनैर्नेत्रे विमृज्य प्रत्यभाषत । राजन् यदि त्वं सत्यप्रतिज्ञोऽसि, यदि शपथं कुरुषे, मे याञ्चां शीघ्रमेव सफलां कर्तुमर्हसि । पूर्वं देवासुरयुद्धे त्वं मया परिरक्षितः । तदा तुष्टचेतसा त्वया मे वरद्वयं दत्तं । तन्न्यासभूतमेव मया त्वयि स्थापितं । तत्रैकेन वरेणैभिः संभृतसंभारैर्मम प्रियसुतं भरतं यौवराज्येऽभिषेचय । अपरेण वरेण रामो दंडकावनमाशु गच्छतु । तत्र मुनिवेषधरो जटावल्कलभूषणः कंदमूलफलाशनश्चतुर्दश वर्षाणि वसतु । अनंतरं पुनरायातु वा वने तिष्ठतु । रामः श्वः प्रभात एव गच्छतु । यदि स विलंबेताहं तवाग्रतः प्राणांस्त्यक्ष्यामि । त्वं सत्यप्रतिज्ञो भव । एतदेव मम प्रियं ॥

एतद्दारुणं रोमहर्षणं वाक्यं श्रुत्वा स महीपालो वज्राहतपर्वत इव भूमौ निपपात । किंचित्कालेन स नेत्रे उन्मील्य विमृज्यच मया दुःस्वप्नो दृष्टो वा चित्तविभ्रमो मे जात इति विचार्य व्याघ्रीमिव पुरःस्थितां पत्नीमालोक्योवाच । भद्रे किमिदं मम प्राणहरं वचो भाषसे ? रामस्ते कमपराधं कृतवान् ! त्वं तस्य शुभान्गुणान्ममाग्रेऽनिशं वर्णयसि, कौसल्यां मां समं पश्य-

न्सदा शुश्रूषत इति पूर्व ब्रुवंतीदानीमन्यथा भाषसे । तव पुत्रो राज्यं गृण्हातु । रामो मंदिरे तिष्ठतु । तस्मात्तव भयं नास्ति । मामनुगृण्हीष्व । इत्युक्त्वाश्रुपरीताक्षस्तस्याः पादयोर्निपपात । तदा कैकेयी रक्तांतलोचना सत्युवाच । राजेंद्र भ्रांतोऽसि किं ? प्रतिज्ञापूर्वमुक्तं स्वीयं भाषितं मिथ्या करोषि चेन्नरकस्ते भवेत् । यदि रामः प्रभातेऽजिनचीरयुक्तो वनं न गच्छेदहमुद्बंधनं वा विषभक्षणं कृत्वा तव पुरतो मरिष्यामि । त्वमिहलोके सर्वसभांतरेषु सत्यप्रतिज्ञ इति विकत्थ्येदानीं रामस्य शपथं कृत्वा मिथ्याप्रतिज्ञो नरकं प्रयाहि । इति प्रिययोक्तो दीनो दुःखार्णवमग्नो मूर्छितो नृपो मृतक इव भूमौ विसंज्ञः पतितः । एवं दुःखार्तस्य तस्य सा रात्रिः संवत्सरोपमा गता । अरुणोदयकाले वंदिनो गायनाश्च जगुः । तान्सर्वान्निवार्य कैकेयी रुषान्विता स्थिता ॥

ततः प्रभातसमये ब्राह्मणाः क्षत्रिया वैश्या ऋषयः कन्यकाः पौराजानपदाश्च मिलिताः । वसिष्ठेन यथाज्ञप्तं तथा सर्वं तत्र तत्र स्थितं । स्त्रियो बाला वृद्धा नराश्च रात्रौ निद्रां न लेभिरे । पीतकौशेयवाससं सर्वाभरणसंपन्नं मदनसुंदरमभिषिक्तं रामं श्वेतच्छत्रधरेण लक्ष्मणेन समन्वितं गजारूढं समायांतं कदा द्रक्ष्यामः प्रभातं कदा भवेदिति सर्वे पुरवासिन उत्सुकधियो बभूवुः । इदानीं राजा किमर्थं नोत्थित इति चिंतयन्सुमंत्रः कैकेयीमंदिरं प्रायात् । जयशब्देन वर्धयन्स्वस्वामिनं कैकेयींच शिरसा प्रणमंस्तमतिखिन्नं दृष्ट्वा तां समपृच्छत्, देवि वर्धस्व, राजा अन्यथा किं दृश्यते ? कैकेयी प्राह स रात्रौ निद्रां न लब्धवान् । राम राम रामेति राममेवानुचिंतयन्प्रजागरेणास्वस्थ इव लक्ष्यते । त्वं रामं शीघ्रमिहानय । सुमंत्र उवाच । भामिनि राजवचनमश्रुत्वा कथं गच्छामि ? मंत्रिणस्तद्वाक्यं श्रुत्वा राजाब्रवीत् रामं द्रष्टुमिच्छामि तं शीघ्रमानय । इत्युक्तः सुमंत्रस्त्वरया गत्वा राममब्रवीत् भो राम मयासार्धं पितुर्गृहं शीघ्रमागच्छ । राजा त्वां द्रष्टुमिच्छति । इत्युक्तो रामो लक्ष्मणेन समन्वितः संभ्रमाद्रथमारुह्य त्वरितमाययौ । मध्यकक्ष्यायां वसिष्ठादीन्पश्यंश्चक्षुषैव तान्संमानयान्पितुः समीपं गत्वा तस्य चरणौ ननाम । तदा राजा राममालिंगितुं समुत्थाय बाहू प्रसार्य दुःखात्पपात् । हाहंतेति रामस्तं शीघ्रमालिंग्यांके न्यवेशयत् । तं मूर्छितं दृष्ट्वा सर्वा योषितश्चुक्रुशुः । किमर्थं रोदनमिति ज्ञातुं वसिष्ठोऽपि समाविशत् । दुःखस्य किं कारणमिति रामे पृच्छंति कैकेयी तमब्रवीत् त्वमेम कारणं । तस्य दुःखोपशांतये त्वया किंचित्कर्तव्यं, तत्त्वां

वक्तुं स लज्जते । पूर्वं मम वरद्वयं दत्वा सत्यप्रतिज्ञापाशेन संबद्धं तं त्वं त्रातुमर्हसि । पुन्नाम्नो नरकात्त्रायते पितरं यः स पुत्रः । अतस्त्वमेनं सत्यप्रतिज्ञं कुरु । एवं तयोदितं श्रुत्वा रामः शूलेनाभिहत इव व्यथितः कैकेयीं प्राह किं मामेवं प्रभाषसे ? अहं पित्रर्थं जीवितं दास्ये विषं पिबेयं सीतां त्यक्ष्यामि कौसल्यां तथा राज्यं त्यजामि । यः पुत्रोऽनाज्ञप्तोऽपि पितुः कार्यं कुरुते स उत्तम इत्युदाहृतः । उक्तः करोति चेत्स मध्यमः । उक्तोऽपि नैव कुरुते स मल इत्युच्यते । अतः पिता यद्यदिच्छति तत्तत्करोमि । सत्यं सत्यं करोम्येव । रामो द्विर्नाभिभाषते । इति रामप्रतिज्ञां श्रुत्वा सा वक्तुं प्रचक्रमे । राम त्वदभिषेकार्थं ये संभाराः संभृतास्तैरेव मम पुत्रो भरतोऽभिषेच्यः । अपरेण वरेण त्वं चीरवासा जटाधरः सन्पितुराज्ञया शीघ्रं वनं प्रयाहि । तत्र मुन्यन्नभोजनश्चतुर्दश समा वस । एतदेव पितुःकार्यं त्वं कर्तुमर्हसि । श्रीराम उवाच । भरतस्यैव राज्यं स्यात् । अहं दंडकां गच्छामि । एतद्रामवचनं श्रुत्वा दशरथ उवाच । राम स्त्रीजितं भ्रांतहृदयमुन्मार्गपरिवर्तिनं मां निगृह्य राज्यं गृहाण । तत्पापं न भवेन्मामनृतं नैव स्पृशेत् । इत्युक्त्वा दुःखसंतप्तो हा राम हा राम प्राणवल्लभ मां विसृज्य घोरं वनं कथं गंतुमर्हसीति रामं समालिंग्य मुक्तकंठं रुरोद । रामः सजलपाणिना तस्य नयने विमृज्य तमाश्वासयामास । राजन् किमर्थं खिद्यसे ? मेऽनुजो राज्यं शास्तु । अहं तव प्रतिज्ञां निस्तीर्य पुनः पुरमायास्यामि । वने वसतो मम राज्यात्कोटिगुणं सौख्यं भवेत् । त्वत्सत्यपालनं देवकार्यं चापि भविष्यति । एवं वनवासो महागुणः । इदानीं गंतुमिच्छामि । मातुर्हृज्ज्वरो व्येतु । अभिषेकार्थमागताः संभाराः संह्रियंतां । जननीं समाश्वास्य जानकीमनुनीय आगत्य तव पादौ वंदित्वा सुखेन वनं यास्ये । इत्युक्त्वा परिक्रम्य मातरं द्रष्टुमाययौ । तदा कौसल्यैकाग्रमनसा विष्णुं ध्यायंती मौनमास्थिता रामं न ददर्श ॥

**अंतस्थमेकं घनचित्प्रकाशं ॥**
**निरस्तसर्वातिशयस्वरूपं ॥**
**विष्णुं सदानंदमयं हृदब्जे ॥**
**सा भावयंती न ददर्श रामं ॥ १ ॥**

इति रा० रा० अ० कां० तृतीयः सर्गः ३

श्रीमहादेव उवाच । ततः सुमित्रा रामं दृष्ट्वा कौसल्यां बोधयामास । सा रामनाम श्रुत्वैव दृष्टिं बहिः प्रसार्य मुदान्विता तमंके न्यवेशयत् मूर्ध्न्यवघ्रायांगं पस्पर्श, पुत्र सुरसमन्नं भुंक्ष्वेतिच प्राह । तदा रामोऽब्रवीत् मातर्न मे भोजनावसरः । अहं शीघ्रं दंडकागमने प्रस्थितः । कैकेयीवरदाने सत्यसंधः पिता भरताय राज्यं मह्यं दंडकारण्यंच ददौ । तत्राहं मुनिवेषधृक् चतुर्दश समा उषित्वा शीघ्रं पुनरागमिष्यामि । त्वया चिंता न कार्या । तच्छ्रुत्वा सा मूर्छिता पपात । कालेनोत्थिता सुदुःखिता राममाह यदि त्वं वनं सत्यं यासि चेन्मामपि नय । त्वद्विहीनाहं जीवितं कथं धारयिष्यामि ? यथा गौर्वत्सं त्यक्त्वा कुत्रचिन्न तिष्ठति तथैव प्राणेभ्योऽपि प्रियं त्वां त्यक्तुं न शक्नोमि । राजा भरताय राज्यं सर्वस्वं वा प्रयच्छतु । त्वां वनवासाय किमर्थमाज्ञापयति ? त्वया तस्य कैकेय्या वा किमपराद्धं ? राम तव यथा पिता गुरुस्तथाहमपि गुरुः । यद्वा ततोऽधिका [ पितुर्दशगुणं माता गौरवेणातिरिच्यत इति श्रुतेः ] त्वं वनं गंतुं पित्राज्ञप्तः । अहं त्वां वारये । मद्वाक्यमुल्लंघ्य यदि यास्यसि तदाहं प्राणांस्त्यक्ष्यामि ॥

कौसल्यावचनं श्रुत्वा लक्ष्मणोऽपि रुषोवाच । भ्रातः भ्रांतमनसमुन्मत्तं कैकेयीवशवर्तिनं पितरं बध्वा भरतं तद्बंधुं मातुलानपिच निहन्मि । त्वमभिषेकार्थं यत्नं कुरु । धनुष्पाणिरहं तत्र विघ्नकारिणो निहन्यां । इतिब्रुवंतं सौमित्रिमालिंग्य राम उवाच रघुशार्दूल शूरोऽसि, ममार्यंतहिते रतोऽसीति सर्वं जानामि । किंतु पराक्रमस्य समय इदानीं नास्ति । अथ तं सदुपदेशैः सांत्वयित्वा रोषान्निवर्तयामास । मातरमपि तथैव सांत्वयित्वा पितृवचनं सत्यं करोमि, वनवासो मया वृत इति कैकेय्यै प्रतिज्ञातं, तस्माद्गंतुमनुमोदितुमर्हसीत्युक्त्वा दंडवत्पादयोरपतत् । सा तमुत्थाप्यांके समावेश्याशीर्भिरभिनंदयत् । ब्रह्मविष्णुशिवादयः सर्वे देवास्त्वां सदा रक्षत्विति ब्रुवंती पुनः पुनरालिंग्य प्रस्थापयामास । लक्ष्मणो रामं नत्वाह । तव सेवां कर्तुमहं पृष्ठतो यास्यामि तदादिश । मामनुगृण्हीष्व नोचेत्प्राणांस्त्यजामि । तस्य भावं ज्ञात्वा शीघ्रमायाहीति रामोऽवदत् ॥

अथ रामः सीतां समाधातुं तस्या मंदिरं प्रतस्थे । पतिमागतमालोक्य हृष्टा सीता तस्मायासनं दत्वा पप्रच्छ देव किरीटादिविवर्जितः किमागतोऽसि ? श्वेतच्छत्रं कुतो न दृश्यते ? वादित्राणि किं न वाद्यंते ? इति पृष्टः सस्मितमब्रवीत् । देवि राज्ञा मे दंडकारण्ये राज्यं दत्तं, अतस्तत्पालना-

र्थं शीघ्रमद्यैव वनं यास्यामि । त्वं श्वश्रूसमीपगा मे मातुः शुश्रूषां कुरु । इति ब्रुवंतं श्रीरामं सीता भीताब्रवीत् । महात्मना पित्रा ते वनराज्यं किमर्थं दत्तं? ततो रामस्तां सर्वं वृत्तांतं कथयित्वोवाच शीघ्रं गच्छामि विघ्नं माकुरु । तद्रामवचनं श्रुत्वा प्रीतिसंयुता जानक्युवाच । अहमग्रे गमिष्यामि, त्वं पश्चादेष्यसि । मां विना गंतुं तव नोचितं । रामस्तामाह प्रिये हिंस्रमृगाकुलं वनं त्वां कथं नेष्ये ? तत्र घोररूपा मानुषभोजिनो राक्षसाः संति । सिंहव्याघ्रवराहाः समंततः संचरंति । भोजनार्थमपूपानि व्यंजनानि वा कदाचन न विद्यंते । कट्वम्लफलमूलानि भोज्यानि । काले काले तान्यपि दुर्लभानि । सुगमो मार्गः कुत्रापि नास्ति । यत्र मार्गो दृश्यते तत्रापि स शर्कराकंटकान्वितः । दंडकासंज्ञितं वनं गुहागव्हरसंबाधं झिल्लीदंशादिभिर्युतं बहुविधभयस्थानं । अपिच शीतवातातपादिभिरसह्यं । पादचारेण गंतव्यमस्ति । राक्षसादीन्दृष्ट्वा त्वमचिराज्जीवितेन हास्यसे । तस्माद्भद्रे गृहे तिष्ठ । मां पुनः शीघ्रं द्रक्ष्यसि ॥

इति रामभाषितं श्रुत्वा सीता किंचित्कोपसमन्विता प्रत्युवाच । धर्मज्ञो दयापरस्त्वं धर्मपत्नीं पतिव्रतां मां कथं त्यक्तुमिच्छसि ? वने त्वत्समीपे स्थितां मां को वा धर्षयेत् ? फलमूलादिकं यद्यत्तव भुक्तावशिष्टं तन्मेऽमृततुल्यमेव, तेन तुष्यामि । त्वयासह संचरंत्या मे कुशाः काशाः कंटकाश्च पुष्पास्तरणतुल्या भविष्यंति । अहं त्वां नैव क्लेशये किंतु तव कार्यसाधिनी भवेयं । कश्चिज्ज्योतिःशास्त्रविशारदो मां बाल्ये वीक्ष्य प्राह पत्यासह ते विपिने वासो भविष्यतीति । स द्विजोऽद्य सत्यवादी भूयात् । त्वयासह वनं गमिष्यामि । मां त्यक्त्वा यदि गच्छसि तवाग्रतः प्राणांस्त्यक्ष्यामि । इति तस्या निश्चयं ज्ञात्वा रामोऽब्रवीत् । देवि मयासह वनमागच्छ । तव हाराद्याभरणान्यरुंधत्यायाशु प्रयच्छ । सर्वं धनं ब्राह्मणेभ्यो दत्वा वनं गच्छामः । इत्युक्त्वा लक्ष्मणेन द्विजानाहूय रामः कुटुंबवद्भ्यः श्रुतशीलवद्भ्यो ब्राह्मणेभ्यो गवां वृंदानि धनानि वस्त्राण्याभरणानिच मुदा ददौ । लक्ष्मणः सुमित्रां कौसल्याहस्ते न्यासीचकार । ततो धनुष्पाणिः समागत्य रामस्याग्रे स्थितः ॥

**श्रीरामःसहसीतया नृपपथे गच्छञ्छनैः सानुजः ॥**
**पौरान् जानपदान्कुतूहलदृशःसानंदमुद्वीक्षयन् ॥**
**श्यामः कामसहस्रसुंदरवपुः कांत्या दिशो भासयन् ॥**

पादन्यासपवित्रिताखिलजगत्प्रापालयं तत्पितुः ॥ १

इति ग० रा० अ० कां० चतुर्थःसर्गः ॥ ४ ॥

---

श्रीमहादेव उवाच । जानकीलक्ष्मणान्वितं श्रीरामं मार्ग आयांतं दृष्ट्वा दशरथस्य कैकेय्यै वरदानानि श्रुत्वा दुःखसमावृता द्विजाः परस्परं वीक्ष्योचुः । राजा दशरथः प्रियं सुतं स्त्रीहेतोरत्यजत् । तस्य कामिनः सत्यवत्ता कुतः ? कैकेयी रामे पूर्वमत्यंतं वत्सलापि दुष्टा जाता । अतो हे जना अस्मिन्देशे नस्थातव्यं । सभार्यः सानुजो रामो यत्र गंतुमिच्छति तत्राद्यैव गच्छामः । पादचारेण गच्छंतीं जानकीं सर्वे पश्यंतु । लोकैकसुंदरी सा परपुरुषैः पूर्वं कदाचिद्दृष्टावा ? रामोऽपि गजाश्वादिविवर्जितः पादचारेण गच्छति तं पश्यत । असौ सर्वस्वविनाशिनी राक्षसी कैकेयी नाम्ना जाता । पादचारिणोः सीतारामचंद्रयोर्दुःखं भवेत् । इति दुःखाकुले साधुवृंदे वामदेवोऽब्रवीत् । सीतां वा रामं वा मानुशोचत । एष रामःपरो विष्णुः । जानकी लक्ष्मीः । एष लक्ष्मणः शेषस्तमन्वेतीति तत्वतो वच्मि । स जगन्नाथ इदानीं रावणादीन्राक्षसान्हंतुं गच्छाति । अतस्तमुद्दिश्य चिंतां त्यजत । राम रामेति ये मनुजा जपंति तेषां मरणादिभयानि न भवंति । का पुनस्तस्य दुःखशंका ? इत्युक्त्वा स मुनिर्विरराम । तस्य बोधतस्ते द्विजा रामं विभुं ज्ञात्वा मोहं जहुः । इदं रहस्यं गोपनीयमित्युक्त्वा वामदेवस्तैः सह प्रययौ ॥

रामः पितुर्गेहं समाविश्य कैकेयीमब्रवीत् । वयं त्रयो वनं गंतुं कृतधिय आगताः । पिता नः शीघ्रमाज्ञापयतु । इत्युक्ता सा सहसोत्थाय तेभ्यश्चीराणि प्रददौ । रामस्तु वस्त्राण्युत्सृज्य वन्यचीराणि पर्यधारयत् । लक्ष्मणोऽपि तथाचक्रे । सीता तन्नविजानती चीरं हस्ते गृहीत्वा लज्जया रामस्य मुखमैक्षत । रामस्तद्गृहीत्वा तां पर्यवेष्टयत् । तद्दृष्ट्वा सर्वे राजदारा रुरुदुः । वसिष्ठस्तद्रुदितमाकर्ण्यागतो रुषा कैकेयीं भर्त्सयन्प्राह दुर्वृत्ते त्वया राम एव वनवासे प्रवर्तितः । सीतायै चीरं किं प्रयच्छसि ? यदि सा पातिव्रता भक्त्या राममन्वेति दिव्यांबरधरा सर्वाभरणभूषिता पातिं रमयतु । राजा सुमंत्रमाह रथमानय । ते रथमारुह्य गच्छंतु । इत्युक्त्वा रामं सीतां लक्ष्मणं चालोक्य दुःखाद्भूमौ निपतितो रुरोद । सीता रथमारुरोह । रामोऽपि पितरं प्रदक्षिणीकृत्यारोहत् । लक्ष्मणः खड्गयुगुलं धनुस्तुणीयुगंच गृहीत्वा रथ-

मारुह्य सारथिं नोदयामास। सुमंत्र तिष्ठतिष्ठेति दशरथोऽब्रवीत् । गच्छ गच्छेति रामेण नोदितः सुमंत्रो रथमचोदयत् । रामे दूरं गते राजा मूर्छित आसीत् । आबालवृद्धाः पौरा राम राम तिष्ठ तिष्ठेति क्रोशंतो रथमन्वयुः। राजा सुचिरं रुदित्वा परिचारकान्प्राह मां कौसल्यागृहं नयत । किंचित्कालं तत्र मे जीवनं भवेत् । रामं विनात ऊर्ध्वं चिरं न जीवामि । ततो कौसल्यागृहं प्रविश्य पुनर्मूर्छितः पपात । चिराद्बुध्वा तूष्णीमेवावतास्थिवान् ॥

रामस्तमसातीरं गत्वा जलं पीत्वा निराहारो वृक्षमूले सीतयासहास्वपत् । लक्ष्मणस्तु धनुष्पाणिः सुमंत्रेण समन्वितस्तौ पालयामास । पौराः समागत्य तस्याविदूरे स्थिताः । रामं पुरं नेष्यामो नोचेद्वनं गच्छाम इति तेषां निश्चयं ज्ञात्वा रामोऽतिविस्मितः सुमंत्रं प्राह रथमानय, इदानीमेव गच्छामः। सुमंत्रो रथं वाहैरयोजयत् । रामः सीता लक्ष्मणश्चारुह्य द्रुतं ययुः । किंचिदयोध्याभिमुखं गत्वा ततो दूरं ययुः । पौराः प्रातरुत्थाय राममदृष्ट्वा दुःखिता रथनेमिगतं मार्गं पश्यंतः पुरं यात्वा हृदि राममन्वहं ध्यायंतस्तस्थुः ॥

रामः शृंगवेराविदूरतो गंगातीरं गत्वा सानंदमानसो गंगां नमस्कृत्य स्नात्वा शिंशपावृक्षमूले निषसाद । ततो गुहो जनमुखे रामागममहोत्सवं श्रुत्वा तं सखायं स्वामिनं द्रष्टुं हर्षात्तूर्णं समापतत् । स फलानि मधु पुष्पादि रामस्याग्रे विनिक्षिप्य भुवि दंडवत्प्रणनाम । राघवस्तं तूर्णमुत्थाप्य परिषस्वजे। संपृष्टकुशलो गुहो रामं प्राह भो लोकपावन धन्योऽहं । अद्य मे निषादजातीयमपि जन्म धन्यं । तवांगानि स्पृष्ट्वा परमानंदो बभूव । तव किंकरस्य मे नैषादं राज्यं त्वदधीनं । अत्र वसन्नस्मान्पालय । आगच्छ, नगरं यामः। मम गृहं पावनं कुरु । त्वदर्थं संचितानि फलमूलानि गृहाण । भगवन्ननुगृह्णीष्व । अहं तव दासोऽस्मि । तस्य भाषणं श्रुत्वा सुप्रीतो रामस्तमाह सखे मे वचनं शृणु । अहं चतुर्दश वर्षाणि गृहं ग्रामं वा न प्रवेक्ष्यामि । फलमूलादि किमप्यन्येन दत्तं न भुंजे । अथ तेन वटक्षीरं समानाय्य लक्ष्मणेनसह रामो जटामुकुटं बबंध । तत्र जलमात्रं संप्राश्योवास । अनंतरं लक्ष्मणेन कुशपत्राद्यैरास्तृते शयने प्रासादाग्रे संस्कृतपर्यंक इव सुखेन सुष्वाप ॥

**ततो विदूरे परिगृह्य चापं सबाणतूणीरधनुः स लक्ष्मणः॥**
**ररक्ष रामं परितो विपश्यन् गुहेन सार्धं सशरासनेन ॥ १**

इति रा० सं० अ० कां० पंचमः सर्गः ॥ ५ ॥

श्रीमहादेव उवाच । रामं सुप्तं समालोक्य गुहोऽश्रुपरिप्लुतो लक्ष्मणं प्राह । भ्रातर्यः स्वर्णपर्यंके शेते तं श्रीराममद्य कुशपत्रैर्निर्मिते संस्तरे शयानं पश्यसि । मंथराबुद्धिमास्थाय कैकेयी पापमाचरत् । सा रामदुःखस्य कारणं जाता । तच्छ्रुत्वा लक्ष्मणः प्राह सखे मम वचनं शृणु । सुखस्य वा दुःखस्य कोऽपि न दाता । परोदुःखं वा सुखं ददातीति कुबुद्धिः । यद्विधात्रा विहितं तत्सुरासुरैरलंध्यं । सुखदुःखाभ्यां नरः सर्वदा संबध्यते । सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं ॥

**सुखमध्ये स्थितंदुःखं दुःखमध्ये स्थितंसुखं ॥**
**द्वयमन्योन्यसंयुक्तं प्रोच्यते जलपंकवत् ॥ १ ॥**

तस्माद्विद्वांसो धैर्येणेष्टानिष्टोपपत्तिषु न हृष्यंति न मुह्यंति वा । एवं भाषमाणयोस्तयोर्नभो विमलं बभूव । रामः सलिलं स्पृष्ट्वा प्रातः समाहितो गुहमुवाच । सखे शीघ्रं नावमानय । स तथा कृत्वोवाच स्वामिन् सीतया लक्ष्मणेनच त्वया नौरारुह्यतां । ज्ञातिभिःसार्धमहं तां वाहये । तथेति रामः सीतामारोप्य तस्य हस्तावालंब्य स्वयं चारोहत् । आयुधानि समारोप्य लक्ष्मणोऽप्यारुरोह । गुहस्तान्स्वयं वाहयामास । गंगामध्ये गता जानकी गंगां प्रार्थयामास । देवि गंगे नमोऽस्तुते । वनवासतो निवृत्ताहं रामेणसह त्वां नानाबलिभिः पूजयिष्ये । इत्युक्त्वा परकूलं प्राप्तास्ते शनैर्जग्मुः । गुहोऽपि राघवं प्राह राजेंद्र त्वया सहाहं गमिष्यामि । अनुज्ञां देहि । निषादवचनं श्रुत्वा रामोऽब्रवीत् सखे दंडकायां चतुर्दश समाः स्थित्वा पुनरायास्यामि । नासत्यं रामभाषितं । इत्युक्त्वा तमालिंग्य पुनःपुनः समाश्वास्य निवर्तयामास । सोऽपि दुःखाद्गृहं ययौ । अथ तत्र मेध्यं मृगं हत्वा पक्त्वा हुत्वा भुक्त्वाच ते त्रयो वृक्षदले सुप्त्वा तां निशां सुखमवाहयन् ॥

ततो रामो भरद्वाजाश्रमपदं गत्वा बहिरुपातिष्ठत् । तत्रैकं बटुं दृष्ट्वा प्राह बटो सीतालक्ष्मणाभ्यां समन्वितो दाशरथी रामो बहिःस्थित इति मुनिसन्निधावुच्यतां । तच्छ्रुत्वा सहसा गत्वा स मुनेः पादयोः पतितः संदेशं कथितवान् । तच्छ्रुत्वा सहसोत्थाय स मुनीश्वरोऽर्घ्यपाद्ये गृहीत्वा रामसामीप्यमाययौ । तं दृष्ट्वा यथोपचारं पूजयित्वाह । भो राम अंतरागत्य पर्णशालां पादरजसा पुनीहि । इत्युक्त्वा तानुटजमानीयोत्तममातिथ्यं चकार । रामस्तत्र तां रात्रिमुषित्वा प्रातरुत्थाय मुनिदारकैर्दर्शितेन मार्गेण यमुनामुत्तीर्य चित्र-

कूटाद्रिं प्रययौ । तत्र नानामृगद्विजाकीर्णं नित्यपुष्पफलाकुलं वाल्मीकेराश्रमं गत्वा तं मुनिसत्तमं समासीनं दृष्ट्वा शिरसा ननाम । स मुनिर्जानकीलक्ष्मणोपेतं श्रीरामं दृष्ट्वा विस्मयानिमिषेक्षणः सहसोत्थाय तमालिंग्य भक्त्या पूजयित्वा मधुरैः फलमूलैर्भोजयामास । अथ राघवः प्रांजलिर्भूत्वा वाल्मीकिं प्राह पितुराज्ञां पुरस्कृत्य वयं दंडकामागताः । अत्र कारणं भवंतो जानंत्येन, वयमत्र किं वदामः ? यत्र मे सुखवासाय स्थानं भवेत्तदुच्यतां । तत्र किंचित्कालं नयामि ॥

तच्छ्रुत्वा मुनिः सस्मितमब्रवीत् । यस्त्वां शरणं गतस्त्वन्मंत्रजापकः समलोष्ठाश्मकांचनस्तस्य हृदयं तव सुखवासस्थानमस्तु । राम तव नाममहिमा केन वा कथं वर्ण्यते । तत्प्रभावादहं ब्रह्मर्षित्वमाप्तवान् । अहं पुरा किरातेषु वर्धितो जन्ममात्रेण द्विजः शूद्राचाररत आसं । शूद्रायां मे बहवः पुत्रा उत्पन्नाः । ततश्चोरैः समागम्य चोरोऽभवम् । नित्यं धनुर्बाणधरो जीवानामंतकोपमोऽभवं । एकदा महति कानने मया ज्वलनार्कसमप्रभाः सप्त मुनयो दृष्टाः । तेषां वस्त्राण्यपहर्तुकामोऽहं लोभेन तानन्वधावं, तिष्ठत तिष्ठतेति चाब्रवम् । मां दृष्ट्वा तेऽपृच्छन् द्विजाधम किमायासि ? अहं तानब्रवम् युष्माकं लुंठनार्थमागच्छामि । मम बहवःपुत्रदारादयो बुभुक्षिताः संति, तेषां रक्षणार्थं गिरिकानने चरामि । तच्छ्रुत्वा तेऽव्यग्राःसंतो मामूचुः गृहं गत्वा पुत्रभार्यादिकुटुंबकं पृथक् पृथक् पृच्छ “ मया प्रति दिनं यो यः पापसंचयः क्रियते तस्य यूयं भागिनो भविष्यथ नवेति ” । त्वं यावदागमिष्यसि तावद्वयं स्थास्यामः । तथेत्युक्त्वा गृहं गत्वा मुनिभिर्यदुदीरितं तदहं पुत्रकलत्रादीनपृच्छम् । रघूत्तम ततस्तैरुक्तं तत्सर्वं पापं तवैव, वयंतु धनादिभोगभाजःस्मः । तच्छ्रुत्वा जातनिर्वेदोऽहमेते पुत्रादयो न कुत्राप्युपकर्तार इति विचार्य यत्र मुनयोऽतिष्ठंस्तत्र पुनरागच्छम् । तेषां दर्शनादेव शुद्धांतःकरणो भूत्वा धनुरादीन्परित्यज दंडवत्पतितः करुणार्णवमानसा मुनिश्रेष्ठा निरयार्णवं गच्छंतं मां रक्षितुमर्हंतीत्यवोचं । “ उत्तिष्ठोत्तिष्ठ भद्रं ते । सत्समागमः फलितः । तुभ्यं किंचिदुपदेक्ष्यामः तेनैव त्वं संसारान्मोक्ष्यस ” इत्युक्त्वा भो राम मरेति व्यस्तवर्णाक्षरपूर्वकं तव नाम यावद्वयं पुनरागमिष्यामस्तावदत्रैवैकाग्रमनसा जपेत्युक्त्वा ययुः । तैर्यथोपदिष्टं तथाहमकरवं । एकाग्रमनसा जपन्नल्पकालेनाहं बाह्यं वस्तुमात्रं विस्मृतवान् । बहौ काले गते निश्चलरूपिणो ममोपरि वल्मीकमभूत् । ततो युगसहस्रांते ऋषयःपुनरागत्य नि·

ष्क्रमस्व भो इति मामूचुः । तच्छ्रुत्वाहं वल्मीकान्निर्गतः । मां दृष्ट्वा ते ऊचुस्तव द्वितीयं जन्माभवत् । यस्माद्वल्मीकात्तव संभवस्तस्मात्त्वं वाल्मीकिर्मुनीश्वरः । इत्युक्त्वा ते दिवं ययुः । राम तव नामप्रभावादहमीदृशोऽभवम् । अद्य साक्षात्त्वां सीतालक्ष्मणोपेतं पश्यामि तत्सर्वथा मुक्तो भविष्यामि नात्र संशयः । राम लोकव्यवहारानुसारतस्त्वं वने वस्तुं स्थलार्थं पृच्छसि । अस्तु, तदहं दर्शयामि । एवमुक्त्वा स मुनिः पर्वतगंगयोर्मध्ये स्थलं दर्शयामास । तत्र लक्ष्मणेन सुविस्तीर्णां पर्णशालां कारयित्वा तस्यां ते त्रय ऊषुः ।

वाल्मीकिना तत्र सुपूजितोऽयं ॥
राम: ससीतः सह लक्ष्मणेन ॥
देवैर्मुनींद्रैः सहितो मुदास्ते ॥
स्वर्गे यथा देवपतिः सशच्या ॥ १ ॥

इति ग० रा० अ० कां० सष्ठःसर्गः ॥ ६ ॥

---

श्रीमहादेव उवाच । श्रीरामे गंगापारं गते सुमंत्रस्ततो निवृत्य दिनांते मुखमाच्छाद्यायोध्यां प्रविवेश । स बहिरेव रथं संस्थाप्य राजानं द्रष्टुमाययौ । तं प्रणमंतं दृष्ट्वा विव्हलो राजाब्रवीत् । हा गुणनिधे राम हा सीते हा लक्ष्मण । दुःखार्णवे निमग्नं म्रियमाणं मां न पश्यथ । इति विलपंतं तं मंत्री प्रांजलिरब्रवीत् । राजन् रामः सीता सौमित्रिश्च मया रथेन नीता शृंगवेरपुराभ्याशे व्यवस्थिताः । तत्र जटामुकुटमाबध्य रामो मामब्रवीत् सुमंत्र राजानं ब्रूहि मत्कृते ते शोको नास्तु, साकेतादधिकं नः सौख्यं भविष्याति । मम मात्रे वचनं ब्रूहि मत्कृते शोकं त्यक्त्वा भवती शोकपरिप्लुतं वृद्धं राजानमाश्वासयतु । सीता मामाह श्वशुरयोः पादांबुजयोर्मे साष्टांगं प्रणिपातं ब्रूहि । ततस्ते नावमारुरुहुः । यावद्गंगां समुत्तीर्य गतास्तावदहं स्थितः । ततः पुनरागतोऽस्मि ॥

ततो रुदती कौसल्या राजनमब्रवीत् त्वमेव मत्पुत्रं विवास्येदानीं किं रोदिषि । तस्या वचनं श्रुत्वा क्षतेऽग्निना स्पृष्ट इव व्यथितः स तामब्रवीत् । अलमनेन । दुःखेन म्रियमाणं मां किं पुनर्व्यथयसि । इदानीमेव मे प्राणा उत्क्रमिष्यंति । केनचिन्मुनिना पुराहं शप्तोऽस्मि । पुराहं यौवनदृप्तो मृगया-

सक्तश्चापबाणधरो महावने निशि नद्यास्तीर अचरं । तत्रार्धरात्रसमये कश्चिन्मुनिः पिपासार्दितयोः पित्रोर्जलमानेतुमुद्यतो जले कुंभमपूरयत् । तदा शब्दोऽभवत् । गजः पानीयं पिबतीति मत्वाहं शब्दवेधिनं बाणमक्षिपं । तदा हा हतोऽस्मीति मानुषः शब्दोऽभवत् । विधे केन हतोऽस्मि ? मया कस्यापि नापराधः कृतः । पितरौ जलकांक्षया मां प्रतीक्षेते । इति पौरुषं वचः श्रुत्वा भयसंत्रस्तोऽहं शनैस्तत्पार्श्वं गत्वावोचं मुने दशरथोऽहं । अजानता मया विद्धोऽसि । मां त्रातुमर्हसि । इति ब्रुवंस्तस्य पादयोः पतितवान् । तदा स मुनिर्मामाह नृप माभैषीः । त्वां ब्रह्महत्या न स्पृशेत् । अहं वैश्योऽस्मि, क्षुत्तृड्भ्यां परिपीडितौ मे पितरौ मां प्रतीक्षेते । ताभ्यां शीघ्रमुदकं देहि । मम पिता यदि कुप्येत् त्वां भस्मसात्कुर्यादतो निःशंकं तेभ्यो जलं दत्वा नत्वाच कृतं सर्वं निवेदय । अहमतिपीडितो ऽस्मि, मम देहाच्छल्यमुद्धर, प्राणांस्त्यक्ष्यामि । इत्युक्तस्तस्य देहाद्बाणमुत्पाट्य जलपूर्णं कलशं हस्ते गृहीत्वा यत्र तस्य पितरावास्तां तत्राहमगमम् । तावतिवृद्धावंधौ क्षुत्पिपासार्दितौ " आवयोः पुत्रः सलिलं गृहीत्वाद्यापि किं नायाति, आवामनन्यगतिकौ शोच्यौ, आवयोः सुतो भक्तिमानावामद्यैव किमुपेक्षेत " इति चिंताव्याकुलावास्तां । मत्पदन्यासजं ध्वनिं श्रुत्वा पिता प्राह पुत्र किं विलंबः कृतः ? आवाभ्यां पानीयं देहि । त्वमपि पिब । एवं लपतस्तस्य सविधं गत्वा पादयोः प्रणिपत्याहमब्रवं नाहं तव पुत्रः । अयोध्याया राजा दशरथो मृगयासक्तः पापोऽहं रात्रौ मृगविहिंसको जलावतारादूरे स्थित्वा जलगतं ध्वनिं श्रुत्वा शब्दवेधिनं बाणमत्यजं । तदा हतोऽस्मीति शब्दोऽभवत् । तं श्रुत्वा भयात्तत्र गत्वा सर्वं वृत्तांतं ज्ञातवान् । मया पादौ गृहीत्वा रक्ष रक्षेति प्रार्थितेन तव पुत्रेणोक्तं मत्पितृभ्यां सलिलं दत्वा नत्वा च तेभ्यः स्वजीवितरक्षणं याचस्व । युवां शरणागतं मां दयायुक्तेन मनसा रक्षतं । इति श्रुत्वा दुःखार्तौ तौ विलप्य पुत्रं बहु शोच्य मामूचतुरावयोः पुत्रो यत्र पतितस्तत्रावां शीघ्रं नय । मया तत्र नीतौ तौ पुत्रं स्पृष्ट्वा बहु विलेपतुः । ततो मामूचतुर्भूपते शीघ्रं चितां रचय । तत्र स वृद्धो मामाह तवाप्येवं प्रायः स्थितिर्भविष्यति । मम वचनात्त्वं पुत्रशोकेन मरणं प्राप्स्यसि । ततो मया रचितायां चितायां तावुभौ प्रविविशतुः । तत्रैवाहं तत्पुत्रशवमस्थापयमपिच तदाज्ञयाग्निर्दत्तः । ते दग्धास्त्रिदिवं ययुः । इदानीं प्राप्तः स दुर्वार्यः शापकालः । इत्युक्त्वा शोकसमाकुलो राजा विललाप । हा राम गुणाकर । हा सीते हा लक्ष्मण । यु-

न्मद्वियोगादहं मृत्युमुखं प्राप्तोऽस्मि । एवं विलपन्दशरथः प्राणांस्त्यक्त्वा दिवं गतः । कौसल्या सुमित्रान्या राजयोषितश्चोरस्ताडनपूर्वकं चुक्रुशुः विलेपुश्च ॥

अथ प्रातर्वसिष्ठो मंत्रिभिःसह तत्रागत्य दशरथकलेवरं तैलद्रोण्यां क्षिप्त्वा दूतानब्रवीत् अश्वानारुह्य युधाजिन्नगरंप्रति त्वरितं गच्छत । शत्रुघ्नसहितो भरतस्तत्रास्ते । राजानं द्रष्टुमयोध्यां शीघ्रमागच्छेति तं वदत । इत्युक्ता दूतास्त्वरितं गत्वा संदेशं न्यवेदयन् । तदा भयविव्हलो भरतः सानुजस्तैःसहाययौ । राज्ञो राघवस्य वा किंचिद्दुःखं समुपस्थितमिति चिंतयन्नगरं ययौ । नगरं भ्रष्टलक्ष्मीकं दृष्ट्वा स चिंतापरोऽभवत् । राजभवनं प्रविश्य तत्रासने स्थितामेकामेव कैकेयीं दृष्ट्वा स तस्याः पादौ ननाम । पुत्रमागतं दृष्ट्वा सा प्रेमसंभ्रमादुत्थाय तमालिंग्यांकमारोप्य मूर्ध्न्यवघ्राय स्वकुलस्य कुशलं पप्रच्छ । भरतो दूयमानेन मनसा तामपृच्छत् मातः तातः कुत्रास्ते ? पितरमदृष्ट्वा मे भयं दुःखंच जायते । कैकेय्याह पुत्र किं दुःखेन ? अश्वमेधादियाजिनां धर्मशीलानां या गतिस्तामुत्तमां गतिं तव पिता गतः । तच्छ्रुत्वा भरतः शोकविव्हल उर्व्यां निपपात । हा तात क्व गतोऽसि, त्वां कथं द्रक्ष्यामीति विलपंतं मुक्तमूर्धजं तमुत्थाप्य कैकेय्यब्रवीत् पुत्र समाश्वसिहि समाश्वसिहि । तव सर्वं भद्रं मया संपादितं । भरतस्तामाह तातो म्रियमाणः किमब्रवीत् ? कैकेयी भयवर्जिता तमाह हा राम हा सीते हा लक्ष्मणेति विलपन्स दिवं गतः । भरत आह अंब तदानीं रामः सीता लक्ष्मणो वा सन्निहितः किं नासीत् ? ते कुत्र गताः ? कैकेय्युवाच पुत्र रामस्य यौवराज्यार्थं तव पित्रा ससंभ्रमं संभाराः कृताः । तदाहं तवैव राज्यं भवत्विति तस्मिन्कार्ये विघ्नमाचरं । राज्ञा पूर्वं मे वरद्वयं दत्तमासीत् । तयोरेकेन मयेदानीं सर्वं राज्यं त्वदर्थं याचितं, अपरेण रामस्य वनवासो याचितः । ततः सत्यपरो राजा ते राज्यं दत्वा रामाय वनं संप्रेषयामास । सीता पातिव्रत्यमुपाश्रिता राममनुगता । सौभ्रात्रव्यं दर्शयँल्लक्ष्मणोऽपि तमनुयातः । एवं सर्वेषु वनं गतेषु राजा तानेव चिंतयन्राम रामेति प्रलपन्ममार । इति मातुर्वचः श्रुत्वा वज्राहतद्रुम इव भरतो भूमौ निःसंज्ञःपपात । अथ लब्धसंज्ञं तं कैकेयी पुनः प्राह वत्स किं शोकेन ? महति राज्ये संप्राप्ते कुतस्ते दुःखावसरः ? इति ब्रुवतीं तां चक्षुषा प्रदहन्निव पश्यन्नाह पापे घोरे, भर्तृघातिनि त्वमसंभाष्यासि । त्वद्गर्भजातोऽहं पापवानस्मि । अहमग्निं प्रवेक्ष्यामि वा विषं भक्षयिष्यामि वात्मानं खड्गेन हत्वा मरिष्यामि । दुष्टे भर्तृघातिनि त्वं कुंभीपाकं गमिष्यसि । इतिं

कैकेयीं निर्भर्त्स्य कौसल्याभवनं ययौ । सा तं दृष्ट्वा मुक्तकंठं रुरोद । भरतोऽपि रुदंस्तस्याः पादयोः पतितः । तमालिंग्य साश्रुनेत्रेदमब्रवीत् पुत्र त्वयि दूरं गते सर्वमिदमेवमभूत् । एतत्सर्वं तव मातुश्चेष्टितं । मम पुत्रश्चीरांबरधरो बद्धजटाकलापो मां दुःखसमुद्रे संक्षिप्य वनं गतः । हा राम ! त्वं मत्पुत्रतांप्राप्तस्तथापि मां दुःखं न जहाति तस्माद्विधिरेव बलीयानिति मे मतिः । एवं भृशं विलपंत्याः पादौ गृहीत्वा भरतः प्राह मातर्मम वचः शृणु । रामाभिषेचने कैकेय्या यत्कर्म कृतं तदन्यद्वा यदि जानामि, यदि सा मया नोदिता भवेत्तदा ब्रह्महत्याशतोद्भवं पापं मेऽस्तु । यद्यहमिमं वृत्तांतं जानामि तदारुंधत्या समन्वितं वसिष्ठं खड्गेन हत्वा यत्पापं भूयात्तदखिलं ममास्तु । एवं शपथं कृत्वा रुरोद । कौसल्या तमालिंग्य प्राह वत्स माशुचः । तव हृदयं जानामि । एतस्मिन्नंतरे वसिष्ठो मंत्रिभिः सार्धं तत्रागतो रुदंतं भरतं दृष्ट्वा बहुभिः सूक्तिभिः सांत्वयामास । साक्षाद्गुरुणेव तेन संबोधितः स पितुर्देहं तैलद्रोण्याः समुधृत्य सर्वमौर्ध्वदेहिकं विधिवच्चकार । एकादशेऽहनि संप्राप्ते सहस्रशो वेदपारगान्ब्राह्मणान्भोजयामास । पितरमुद्दिश्य बहुधनं गवां सहस्राणि ग्रामान्रत्नान्यंबराणिच ब्राह्मणेभ्यो ददौ । अनंतरं स वसिष्ठेन भ्रात्रा मंत्रिभिश्च परिवारितो राममेवानुचिंतयन् स्वगृहेऽवसत् । सीतालक्ष्मणाभ्यां रामेऽरण्यं प्रयाते मे माता राक्षसीव दर्शनाद्धृदयं प्रदहति । अतोऽरण्यं गच्छामि राममेवानुसेवे इति मनसि निश्चितवान् ॥

रामेऽरण्यं प्रयाते सहजनकसुतालक्ष्मणाभ्यां सुघोरं ॥
माता मे राक्षसीव प्रदहति हृदयं दर्शनादेव सद्यः ॥
गच्छाम्यारण्यमद्य स्थिरमतिरखिलं दूरतोऽपास्य राज्यं ॥
रामंसीतासमेतं स्मितरुचिरमुखं नित्यमेवानुसेवे ॥ १ ॥

इति ग० रा० अ० कां० सप्तमः सर्गः ७

---

श्रीमहादेव उवाच । अथ मुनिभिः परिवारितो वसिष्ठो मंत्रिभिः-सार्धं राज्ञः सभामाविशत् । तत्रासने समासीनः सानुजं भरतमानीयोपवेश्य देशकालोचितं वचनमब्रवीत् । मुनिरुवाच । वत्स भरत पितृशासनात्त्वामद्य राज्येऽभिषेक्ष्यामः । कैकेय्या त्वदर्थं राज्यं याचितं । सत्यसंधेन राज्ञा प्रतिज्ञाय

तद्दत्तं । अद्य मुनिभिःकृतो मंत्रपूर्वकोऽभिषेको भवतु । तच्छ्रुत्वा भरतः प्राह गुरो किं मे राज्येन ? रामो राजाधिराजो वयं तस्यैव किंकराः । श्वः प्रभातेऽहं यूयं कैकेयींविना मातरश्च राममानेतुमंजसा गमिष्यामः । कैकेयीं मातृगांधिनीमधुनैव हनिष्यामि, किंतु मां स्त्रीहंतारं रघुश्रेष्ठो न क्षंस्यते । तच्छ्वोभूते पादचारेण दंडकां गमिष्यामि । यूयमायांतु वा नायांतु । यावद्रामो न निवर्तेत तावदहं वल्कलांबरधरः फलमूलकृताहारो भूमिशायी जटाधारी तत्समानव्रतो भविष्यामि । इति तूष्णीमवतस्थिवान् । तदा सर्वे मुदान्विताः साधुसाध्विति तं प्रशशंसुः । ततः प्रभाते गच्छंतं भरतं सर्वे सैनिका अनुजग्मुः । कौसल्यादिराजदारा वासिष्ठप्रमुखा द्विजाश्च पृष्ठतः पार्श्वतोऽग्रतो ययुः । शत्रुघ्नपरिचोदिता महती सेना शृंगवेरपुरं गत्वा गंगाकूले समंतत उवास ॥

भरतमागतं श्रुत्वासौ रामस्य पापं कर्तुं याति नवेति शंकितमानसो गुहस्तत्समीपं गत्वा तस्य हृदयं ज्ञेयमिति निश्चित्य स्वज्ञातीनुवाच, भरतो यदि शुद्धो गंगां तरिष्यति, नोचेद्यूयं सर्वे नाव आकृष्य सर्वतो दिशं पश्यंतस्तदुत्तरणप्रतिबंधाय सायुधाः सावधानास्तिष्ठत । इति सर्वान्समादिश्य विविधान्युपायनानि संगृह्य विविधायुधैर्बहुभिर्ज्ञातिभिः सह भरतं द्रष्टुं प्रययौ । तस्याग्रे तान्युपायनानि निवेद्य समंततो दृष्ट्वा चीरांबरं जटामुकुटधारिणं रामरामेतिवादिनं शिरसा ननाम, गुहोऽहमितिचाब्रवीत् । भरतः शीघ्रमुत्थाय तं सादरं गाढमालिंग्यानामयं पृष्ट्वेदमब्रवीत् । भ्रातस्त्वं राघवेणात्र समेतस्तेनालिंगितोऽतो धन्योऽसि । यत्र रामस्त्वया दृष्टस्तत्र मां नय, सीतया सहितो यत्र सुप्तस्तत्स्थलं दर्शय । त्वं रामस्य प्रियतमोऽसि । गुहेन तथेत्युक्त्वा यत्र रामो निशि स्थितस्तत्कुशसमास्तृतं शयनस्थलं दर्शितं । तद् दृष्ट्वा भरतः पर्यदेवयत् । अहो यातिसुकुमारी प्रासादे रत्नपर्यंके शुभे कोमलास्तरणेऽशेत साद्य कथं मम दोषतः कुशविष्टरे शेते ? धिङ्मां पापराशीभूतायां कैकेय्यां जातोऽस्मि । मन्निमित्तो रामस्यायं क्लेशः । अहो लक्ष्मणस्य जन्मातिसफलं यतो हृष्टचित्तो वनस्थमपि राममन्वेति । रामस्य ये दासास्तेषां दासस्याहं यदि किंकरो भूयासं मम जन्म सफलं स्यात् । भ्रातर्यदि रामः कुत्र तिष्ठतीति जानासि तत्कथय । अहं तमानेतुमंजसा गच्छामि । गुहस्तं शुद्धहृदयं सस्नेहं ज्ञात्वेदमब्रवीत् । देव त्वमेव धन्योऽसि यस्य तवेदृशी भक्तिः । मंदाकिन्या अविदूरतश्चित्रकूटाद्रिनिकटे मुनीनामाश्रमपदे तिष्ठन्रामः सानुजः सपत्नीकः सुखमास्ते । तत्र शीघ्रं गच्छामः । गंगाभि-

होत्तुमर्हसि । इत्युक्त्वा त्वरितं गत्वा पंचशत नावः समानयत् । एकां राजनावं स्वयमानीय तत्र भरतं शत्रुघ्नं राममातरौ वसिष्ठं चारोप्य कैकेयीमन्ययोषितश्चान्यत्रारोप्य गंगां तीर्त्वा भरद्वाजाश्रमं ययौ । महासैन्यं दूरे संस्थाप्य भरतः सानुज आश्रमं प्रविवेश । तत्र मुनिं दृष्ट्वा साष्टांगं प्रणनाम । तं पूजयित्वा जटावल्कलधारिणं दृष्ट्वा मुनिः प्रपच्छ राज्यं प्रशासतस्तेऽद्य वल्कलादिकं किमेतत् ? मुनिसेवितं विपिनं किमागतोऽसि ? भरद्वाजवचःश्रुत्वा भरतः साश्रुलोचन उवाच । भगवन् सर्वं जानासि तथापि पृच्छसि तदनुग्रह एवायं मयि । कैकेय्या रामस्य राज्यप्राप्तिविघ्नो वनवासप्रेरणादिकं च यत्कर्म कृतं तन्न जानामि । भवत्पादयुगमेवात्र प्रमाणामित्युक्त्वा मुनेः पादयुगुलं स्पृष्ट्वोवाच देव शुद्धं वाशुद्धं वा मां भवाञ्ज्ञातुमर्हति । रामे राजनि विजयति किं मे राज्येन ? रामचंद्रस्याहं शाश्वतः किंकरः । अतो गत्वा तस्य पादयोः पतित्वा राज्यसंभारान्समर्प्य वसिष्ठाद्यैर्ऋषिभिर्जानपदैःसह राघवमयोध्यां नीत्वाभिषेक्ष्यामि । इत्युदीरितमाकर्ण्य मुनिर्भरतमालिंग्य प्रशशंस । वत्स माशुचः । त्वं लक्ष्मणादपि परो भक्तः । ससैन्यस्य तवातिथ्यं कर्तुमिच्छामि । अद्य भुक्त्वा श्वो रामसन्निधिं गमिष्यसीत्युवाच । भरतोऽब्रवीद्यथाज्ञापयति भवान् ॥

अथ स मुनिर्होमगृहेस्थितो मौनी अप उपस्पृश्य कामदुघां दध्यौ । कामवर्षिणी सा भरतस्य तत्सैन्यस्यच यथेष्टं सर्वमसृजत् । स मुनिर्वसिष्ठमग्रे पूजयित्वा पश्चात्ससैन्यं भरतं तर्पयामास । तस्मिन्स्वर्गसन्निभाश्रम एकं दिनमुषित्वा प्रातर्मुनिमभिवाद्य सानुजो भरतो रामसन्निधिं प्रययौ । चित्रकूटमनुप्राप्य सैनिकान्दूरे संस्थाप्य रामाश्रमं विचिन्वन्नृषिमंडलमपृच्छत्सीतालक्ष्मणसमेतः श्रीरामः कुत्रास्त इति । तदा तैर्गिरेः पश्चाद्गंगाया उत्तरे तटे सफलैराम्रपनसैश्चंपकैः कोविदारैः पुन्नागैः कदलीखंडैश्च संवृतं विविक्तं रामसदनं दर्शितं । तदालोक्य हर्षादग्रे ययौ ॥

ददर्श दूरादतिभासुरं शुभं ॥
रामस्य गेहं मुनिवृंदसेवितं ॥
वृक्षाग्रसल्लग्नसुवल्कलाजिनं ॥
रामाभिरामं भरतः सहानुजः ॥ १ ॥

इति रा० रा० अ० कां० अष्टमः सर्गः ८

श्रीमहादेव उवाच । अथाश्रमपदसमीपं गत्वा भुवि वज्रांकुशध्वजसरोरुहलांछनानि मंगलानि दृष्ट्वा सानुजो भरतस्तेषु लुलोठ । अहो धन्योऽस्मि यस्य पादरजो ब्रह्मादिभिर्देवैर्विमृग्यं तस्य पादारविंदांकितभूतलमद्य पश्यामि । इत्यद्भुतप्रेमरसाप्लुतांतःकरण आनंदाश्रुस्नपितस्तनांतरः शनैराश्रमसन्निधिमवाप । स तत्रासीनं दूर्वादलश्यामं जटाकिरीटं नववल्कलांबरं प्रसन्नवक्त्रं तरुणारुणद्युतिं सौमित्रिणा सेवितपादपंकजं जनकात्मजां विलोकयंतं रघूत्तमं दृष्ट्वाभिदुद्रावापिच तत्पादयुगं त्वरयाग्रहीत् । रामस्तमाकृष्य दोर्भ्यां परिष्वज्य नेत्रजैर्जलैःसिषेच । अथांकोपरि सन्निवेश्य पुनः पुनः परिषस्वजे । रामं द्रष्टुकामाः सर्वा मातरो यथा तृषार्ता गौर्जलं गच्छति तथा तंप्रति त्वरान्विता जग्मुः । रामः कौसल्यां वीक्ष्य द्रुतमुत्थाय तत्पादौ साश्रु ववंदे । साच तमालिंग्य भर्तृवियोगस्मरणेनातीवदुःखितासीत् । इतरा मातॄर्नत्वा वसिष्ठं समागतं दृष्ट्वा तं साष्टांगं प्रणिपत्य धन्योस्मीति वदन्सर्वान्यथार्हमुपवेश्य राम उवाच कच्चिन्मम पिता कुशली वर्तते । दुःखितः स मां किमाह ? वसिष्ठस्तमुवाच राम त्वद्वियोगाभितप्तात्मा पिता त्वामेव परिचिंतयन् हा राम हा सीते हा लक्ष्मणेति विलपन्निधनं प्राप । गुरोस्तद्वचनं श्रुत्वा रामलक्ष्मणावतिदुःखितौ रुदंतौ भूमौ पतितौ । सर्वा राममातरः सीताच रुरुदुः । ततो वसिष्ठः शांतवचनैस्तेषां शुचं शमयामास । अनंतरं मंदाकिनीं गत्वा स्नात्वा वीतकल्मषाः सर्वे राज्ञे जलं ददुः । वयं यदन्नाःपितरस्तदन्ना इति स्मृतिवचनानुरोधेन राम इंगुदीफलपिण्याकरचितान्मधुसंप्लुतान्पिंडान्निवापयामास । पुनः स्नात्वा गृहं ययौ । तस्मिन्दिने सर्वे उपवासं प्रचक्रिरे ॥

परेद्युः स्नात्वोपविष्टं रामं समागम्य भरतोऽब्रवीत् राम राम महाभाग आत्मानमभिषेचय । पित्र्यं राज्यं पालय । ज्येष्ठस्त्वं मे पितृसदृशः । प्रजापालनं क्षत्रियाणां धर्मः । तं संपाद्य बहुविधैर्यज्ञैरिष्ट्वा राज्ये पुत्रं समारोप्य ततो वनं गमिष्यसि । नायं वनवासस्य कालः । मम मातुः किंचिद्दुष्कृतं स्मर्तुं नार्हसि, प्रसीद मे । इत्युक्त्वा भ्रातुश्चरणौ शिरस्याधाय तस्य पुरतः साक्षाद्दंडवत्पतितः । रामस्तं शीघ्रमुत्थाप्यांक आरोप्योवाच वत्स किंचित्प्रवक्ष्यामि शृणु । यत्त्वयोक्तं तत्तथैव, किंतु पिता मामब्रवीद्दंडकारण्ये चतुर्दश वर्षाण्युषित्वा पश्चात्पुरं समाविश, इदानीं मया भरतायाखिलं राज्यं दत्तमिति । अतःपितुर्वच आवाभ्यामतियत्नतः कार्यं । पितृवचनमुल्लंघ्य यः स्वतंत्रो वर्तते स जीवन्नेव मृतो देहांते निरयं व्रजेत् । तस्मात्त्वं राज्यं प्रशाधि, वयं दंड

कापालिका भवामः । भरतस्तमब्रवीत् स्त्रीजितो भ्रांतहृदयः पिता यदब्रवीत्त त्सत्यमिति नग्राह्यं । श्रीराम उवाच । पिता स्त्रीजितो वा मूढधीः सन्नुवाचेति न । तेन तस्यै पूर्वमेव प्रतिज्ञातं । महतां नरकादप्यसत्यमधिकां भीतिमुत्पादय ति । अतो यत्प्रतिश्रुतं तत्स ददौ । अहमपि राघवःसन्वनवासादिकं सत्यं करोम्येवं तस्यै प्रतिज्ञातमपि कथमसत्यं कुर्यां । इति रामभाषितमाकर्ण्य भरत उवाच । अस्तु, अहं चीरवसनस्त्वत्प्रतिनिधितया चतुर्दश समा वने वत्स्यामि, त्वं राज्यं कुरु । राम उवाच । वत्स पित्रा तुभ्यमेव राज्यं दत्तं, मह्यं वनं दत्तं । यद्यहं राज्यवनवासयोर्व्यत्ययं कुर्यामसत्यं पूर्ववत्स्थितं । भरतोऽब्रवीदहमपि लक्ष्मणवत्त्वां सेवितुं वनमागमिष्यामि, मेऽनुज्ञां दातुमर्हसि । नोचेत्प्रायोपवेशनेन कलेवरं त्यजामि । एवं निश्चयं कृत्वातपे दर्भानास्तीर्य प्राङ्मुख उपविवेश । तस्य निर्बंधं दृष्ट्वा रामोऽतिविस्मितो गुरवे नेत्रांतसंज्ञां चकार । वसिष्ठस्तमेकांते प्राह वत्स गुह्यं ब्रवीमि शृणु । रामः साक्षान्नारायणो रावणस्य वधार्थाय ब्रह्मणा याचितो दशरथात्मजो जातः । योगमाया सीता जाता । शेषो लक्ष्मणो जातः सर्वेऽत्र राममन्वेति । ते रावणं हंतुकामा गमिष्यंति । कैकेय्या वरदानादि यद्यन्निष्ठुरभाषणं तत्सर्वं देवकृतं । तस्माद्रामस्य विनिवर्तन आग्रहं त्यज । इति गुरोर्वाक्यं श्रुत्वा विस्मयान्वितो भरतो रामस्य समीपं गत्वोवाच राजेंद्र राज्यपालनसामर्थ्याय तव पादुके मे देहि । तवागमनावधि तयोः सेवां करोमि । इत्युक्त्वा रामस्य पादयोर्दिव्ये रत्नभूषिते पादुके योजयामास । रामदत्ते ते गृहीत्वा तं परिक्रम्य प्रणम्यच भक्तिगद्गदया गिरा पुनरुवाच । राम चतुर्दश समांते प्रथमे दिवसे यदि नागमिष्यसि महानलं प्रवेक्ष्यामि । रामस्तं बाढमित्युक्त्वा न्यवर्तयत् । भरतो वसिष्ठाद्यैः सर्वैः सह गमनायोपचक्रमे ॥

अथ कैकेयी स्रवन्नेत्रजलाकुला राममेकांते प्राह भो राम दुष्टधिया मायामोहितचेतसा मया तव राज्याभिषेकेऽतरायः कृतस्तद्दौरात्म्यं क्षमस्व । क्षमासारा हि साधवः । त्वं साक्षात्परमात्मा । त्वयैव प्रेरितो लोकः साध्वसाधुवा कुरुते । त्वामहं शरणमागता । रामः सस्मितमब्रवीत् महाभागे यत्त्वमात्थ तत्सत्यमेव, मयैव प्रेरिता वाणी त्वद्वक्त्राद्विनिर्गता । कुतस्तव दोषः ? दिवानिशं मां हृदि भावय तेनाचिरान्मायापाशान्मोक्ष्यसे । तदा सा मुदान्विता ययौ ॥

भरतोऽयोध्यां गत्वा सर्वपौरजानपदान्यथान्यायं तत्र स्थापयित्वा स्वयं

नंदिग्रामं ययौ । तत्र सिंहासने रामपादुके संस्थाप्य सर्वराजोपचारैः प्रत्यहं संपूज्य फलमूलाशनो जटावल्कलधारकोऽधःशाय्यासीत् । सर्वाणि राजकार्याणि पादुकयोर्न्यवेदयत् । एवं रामार्पितमनास्तस्यागमनकांक्षया दिवसान्गणयन्स्थितः ॥

रामस्तु चित्रकूटाद्रौ किंचित्कालमुपावसत् । तं तत्र स्थितं ज्ञात्वा तद्दर्शनलालसा नागराः सदा यांति । तज्जनसंबाधं दृष्ट्वा प्रधानकार्यमप्यनुचिंत्य रामस्तं गिरिं तत्याज । अपिच सर्वत्रसुखसंवासमत्रेरुत्तममाश्रममन्वगात् । तपोदीप्त्या वनं भासयंतं तं मुनिं दंडवत्प्रणिपत्याह रामोऽहमभिवादये । तव दर्शनाद्धन्योऽहं । स मुनिस्तं हरिं ज्ञात्वा भक्त्या विधिवत्पूजयित्वा वन्यैः फलैरातिथ्यं कृत्वाब्रवीत् सुचिरं तपश्चरंती धर्मज्ञातिवृद्धा अनुसूयेति विश्रुता मम भार्यातस्तिष्ठति, सीता तां पश्यतु । रामस्तथेति जानकीं प्राह गच्छ देवीं नमस्कृत्य शीघ्रमेहि । पतिवचनमंगीकृत्य सा तथाकरोत् । अनुसूया तां सादरं समालिंग्य विश्वकर्मणा निर्मिते द्वे कुंडले तथा दिव्यमंगरागंच तस्यै दत्वोवाच कमलानने अनेनांगरागेण त्वां शोभा न त्यक्ष्यति । जानकि पातिव्रत्यं पुरस्कृत्य राममन्वेहि । त्वया सह राघवः पुनर्गृहं कुशली यातु । अथ सीतासमन्वितं श्रीरामं लक्ष्मणंच भोजयित्वा प्रांजलिर्मुनिः पुनःप्राह ॥

राम त्वमेव भुवनानि विधाय तेषां ॥
संरक्षणाय सुरमानुषतिर्यगादीन् ॥
देहान्बिभर्षि न च देहगुणैर्विलिप्तः ॥
त्वत्तो बिभेत्यखिलमोहकरी च माया ॥ १ ॥

इति रा० रा० अ० कां० नवमः सर्गः ॥ ९ ॥

इत्ययोध्याकांडःसमाप्तः

---

## अथ अरण्यकांडप्रारंभः

श्रीमहादेव उवाच । अत्र्याश्रम एकदिनं स्थित्वा प्रभाते स्नात्वा रघुनंदनो मुनिं समामंत्र्य प्रयाणायोपचक्रमे । राम उवाच । मुने ऋषिमं-

ङ्कलमंडितं दंडकावनं गच्छामः । त्वं मामनुज्ञातुमर्हसि, तथा मार्गप्रदर्शनार्था-य शिष्यानाज्ञप्तुमर्हसि । रामवचनं श्रुत्वा अत्रिः प्रहस्याह राम त्वं सर्वस्य मार्गदर्शकः तव मार्गदर्शकः को भवेत् ? तथापि लोकानुसारिणस्तव दर्शयिष्यंति मे शिष्या मार्गमिति शिष्यान्समादिश्य स्वयं किंचिदन्वगात् । ततो रामेण वारितः स्वभवनं ययौ । रामः क्रोशमात्रं गत्वा महतीं नदीं ददर्श । नद्याःसंतरणे कश्चिदुपायो विद्यते नवेति पृष्टाः शिष्या ऊचुः रघुनंदन सुदृढा नौका विद्यते, वयं युष्मान्क्षणात्तारयिष्यामहे । ततस्तान्नावि समारोप्य नदीं संतारयामासुः । ततो रामेणाभिनंदिता आश्रमं जग्मुः ॥

अथ झिल्लीझंकारनादितं नानामृगगणाकीर्णं सिंहव्याघ्रादिभिर्भीषणं घोररूपराक्षसैः सेवितं विपिनं प्रविश्य रामो लक्ष्मणमब्रवीद्वत्स इतःपरं सावधानं गंतव्यं । अहं धनुर्गुणेन संयोज्य शरान्करे दधदग्रे यास्यामि । त्वं चापधरः पश्चादन्वेहि । सीतावयोर्मध्ये गच्छतु । चक्षुःसर्वत्र चारय । दंडकारण्ये रक्षोभयं महद्विद्यत इति पूर्वं श्रुतं । एवं भाषमाणौ तौ सार्धयोजनं जग्मतुः । तत्र कल्हारकुमुदोत्पलैः शोभमानैका पुष्करिणी व्यदृश्यत । तस्याः शीतलोदकं पीत्वा त्रयोऽपि सलिलाभ्यासे क्षणं छायामुपाश्रिताः । ततः करालदंष्ट्रवदनं वामांसेन्यस्तशूलाग्रग्रथितानेकमानुषदेहं भयानकं महासत्वमायांतं ददृशुः । रामो लक्ष्मणमब्रवीत् भ्रातरयं महाकायो राक्षस उपागतः । त्वं सज्जीकृतधनुस्तिष्ठ । जानकि मा भैः । इत्युक्त्वा बाणमादाय स्वयमचल इव स्थितः । स राक्षसस्तान्दृष्ट्वाट्टहासं कृत्वा भीषयन्नब्रवीत् कौ युवां मुनिवेषधरौ बालौ ? स्त्रियासह घोरं वनं किमर्थमागतौ ? रक्षोवचः श्रुत्वा रामः स्मयमानस्तमुवाच अहं रामः, अयं मम भ्राता लक्ष्मणः, एषा मम प्राणवल्लभा सीता । त्वत्सदृशानां दंडनार्थं वयमागताः । स तच्छ्रुत्वोच्चैर्जहासापिच वक्त्रं व्यादाय बाहुभ्यां शूलमादाय, राम मां लोकविश्रुतं विराधं न जानासि, मद्भयात्सर्वे मुनयो वनं त्यक्त्वा गताः, युवयोर्यदि जीवितुमिच्छास्ति सीतां त्यक्त्वा निरायुधौ पलायेथां नोचेद्युवां भक्षयामीत्युक्त्वा सीतामादातुमभिदुद्रुवे । रामः प्रहसन्निव तस्य बाहू चिच्छेद । ततः स क्रोधाविष्टो विकटं मुखं व्यादाय राममभ्यद्रवत् । स तस्य पादद्वयं चिच्छेद । ततः सर्प इवोरसा विससर्प । रामोऽर्धचंद्राकारेण बाणेन तस्य शिरश्चिच्छेद । सीता रामं समालिंग्य प्रशशंस । दिवि देवदुंदुभयो नेदुः । गंधर्वकिन्नरा हृष्टा जगुः । विराधकायादतिसुंदराकृतिश्चारुभूषणः पुरुषो निःसृतोऽग्रे व्यदृश्यत । स रामं दंड-

वत्प्रणम्योवाच श्रीराम अहं विद्याधरः पुराकारणकोपमूर्तिना दूर्वाससा शप्तो-ऽद्य त्वया मोचितः । इतःपरं त्वच्चरणारविंदयोः स्मृतिर्मे सदास्तु । मम वाणी त्वन्नामसंकीर्तनमेव करोतु । प्रपन्नं मां पाहि । त्वदनुज्ञया देवलोकं यास्यामि । इति तेन विज्ञापितः प्रसन्नो रघुनंदनो मद्दर्शनान्मुक्तोऽसीति तस्मै वरं ददौ ॥

रामेण रक्षोनिधनं सुघोरं ॥
शापाद्विमुक्तिर्वरदानमेवं ॥
विद्याधरत्वं पुनरेव लब्धं ॥
रामं गृणन्नेति नरोऽखिलार्थान् ॥

इति ग० रा० अर० कां० प्रथमः सर्गः १

---

श्रीमहादेव उवाच । विराधे स्वर्गते सीतालक्ष्मणान्वितो रामःशरभंगस्य वनं जगाम । शरभंगस्तानायातान्दृष्ट्वा संभ्रमादुत्थितोऽभिगम्य संपूज्य च कंदमूलफलादिभिरातिथ्यं कृत्वाह भो राम अहं तव संदर्शनाकांक्षी तपसि कृतनिश्चयो बहुकालमिहैवासं । अथ तपःसिद्धं पुण्यं ते दास्यामि । ततो मुक्तिं व्रजामि । इत्युक्त्वा चितां विरचय्य विरक्तः स योगी रामं चिरं ध्यात्वा पुरतः स्थितं दृष्ट्वा प्रणम्यच वन्हि प्रज्वाल्य पांचभौतिकं वपुर्दग्ध्वा दिव्यदेहधर उत्तमगातिं ययौ । ततो दंडकारण्यवासिनः सर्वे मुनिगणा राघवं द्रष्टुमाजग्मुः । मुनिसमूहं दृष्ट्वा जानकीरामलक्ष्मणाः सहसा भूमौ दंडवत्पतिताः प्रणेमुः । तानाशीर्भिरभिनंद्य सर्व ऋषयः प्रांजलय ऊचू राम भूमेर्भारावताराय जातं त्वां हरिं जानीमः । अतस्त्वमादावर्षीन्दुःखान्मोचयितुमर्हसि । जानकीलक्ष्मणाभ्यांसह मुनिसेवितानि सर्वाणि वनानि द्रष्टुमागच्छ तदास्मासु तव दया दृढा भविष्यति । एवं कृतांजलिपुटैर्मुनिभिर्विज्ञापितो विभुस्तैःसार्धं जगाम । तत्र पतितान्यनेकानि नरशिरांसि नरास्थीनिच सर्वत्र- दृष्ट्वाब्रवीत् केषामेतान्यस्थीनि किमर्थमत्र पतितानि च ? मुनयोऽब्रुवन् राम राक्षसैर्भक्षितानामृषीणामेतानि मस्तकानि । स तद्भयदैन्यसमन्वितं वाक्यं श्रुत्वाशेषरक्षसां वधाय प्रतिज्ञामकरोत् । अथ तैर्वनवासिभिर्मुनिभिः सदा पूज्यमानः कतिचिद्वर्षाणि तत्रोवास । एवमृषीणामाश्रमान्पश्यन् क्रमेण सर्वर्तुगुणसंपन्नं सर्वकाल-

सुखावहं प्रख्यातं सुतीक्ष्णस्याश्रमं आगात् । राममागतमाकर्ण्य सुतीक्ष्णः स्वयमागत्य तवमंत्रोपासनतत्परोऽगस्त्यशिष्योऽहं तव दासदासोऽस्मीति त्रि-विधतपूजयित्वा प्रार्थयामास । भो श्रीराम जगन्नाथ मामनुकंपयितुं स्वयमाग-तोऽसीति महदाश्चर्यं ! तवैतत्कंदर्पकोटिसुभगं कमनीयचापबाणं स्मितचारुव-क्त्रं नीलोत्पलद्युति रूपं मम हृदये सततं विभातु । एवं प्रार्थयतस्तस्य रामः सास्मितमब्रवीन्मुने मदुपासनात्तव चित्तं निर्मलं जातमतोऽहं त्वां द्रष्टुमागतोऽस्मि । त्वं विमुक्तोऽसि, देहांते मम सायुज्यं लप्स्यसे । तव गुरुं मुनिनायक-मगस्त्यं द्रष्टुमिच्छामि । कंचित्कालं तत्रवस्तुं मे मनो मां त्वरयति । सुतीक्ष्ण आह अहमप्यागमिष्यामीति ॥

**अथ प्रभाते मुनिनासमेतो रामःससीतः सहलक्ष्मणेन ॥**
**अगस्त्यसंभाषणलोलमानसः शनैरगस्त्यानुजमंदिरं ययौ ॥**

इति ग० रा० अर० कां० द्वितीयः सर्गः ॥ २ ॥

---

श्रीमहादेव उवाच । अथ जानकीलक्ष्मणोपेतो रामः सुतीक्ष्णेन स-हागस्त्यानुजस्थानं मध्यान्हे समपद्यत । तेन संपूजितः फलमूलादिकं भुक्त्वा परेद्युः प्रातरुत्थाय सर्वर्तुफलपुष्पाढ्यं नानामृगगणैर्युतं विविधैः पक्षिसंघैर्नादितं नंदनोपमं देवर्षिब्रह्मर्षिभिः सेवितं मुनिमंदिरैः सर्वतोऽलंकृतमपरं ब्रह्मलोकमि-वागस्त्याश्रमं जगाम । अथाश्रमस्य बहिरेव स्थित्वा रामः सुतीक्ष्णमब्रवीत् । मुने त्वं शीघ्रं गत्वा सीतालक्ष्मणाभ्यां सहागतं मां मुनिवर्याय निवेदय । सु-तीक्ष्णो महाप्रसादोऽयमित्युक्त्वा गुरोः सन्निधिं त्वरया जगाम । शिष्येभ्योऽ-तिभक्तितो राममंत्रं व्याख्यातवंतं तं मुनिश्रेष्ठं दंडवत्प्रणिपत्य विनयावनत आह ब्रह्मन्दाशरथी रामस्तव दर्शनार्थमागतः सीतालक्ष्मणोपेतो बहिस्तिष्ठ-ति । तदाकर्ण्य भद्रं ते, रामं शीघ्रमानय, तमेवध्यायंस्तद्दर्शनमाकांक्षंश्चाहमत्र संस्थित इति ब्रुवन्स्वयमुत्थाय द्रुतमभिगम्य राममब्रवीदागच्छ राम भद्रं ते । दिष्ट्याद्य तव समागतो जातः । अद्य मे जन्म सफलं । रामोऽपि तमायांतं दृष्ट्वा हर्षसमाकुलो दंडवत्पतितः । तं द्रुतमुत्थाप्य भक्त्यालिंग्य करेण गृही-त्वा हृष्टमनसाश्रमं जगाम । अथ तमासन उपवेश्य संपूज्य वन्यैर्भोज्यैर्भोजयि-त्वैकांते सुखोपविष्टः कृतांजलिरुवाच । पुरा यदा भूमेर्भारापनुत्तये रावणस्य वधार्थं च त्वं क्षीरसमुद्रांते ब्रह्मणा प्रार्थितस्तदहादि तपश्चरंस्त्वामेव चिंतयं-

त्वदागमनं प्रतीक्षमाणोऽहं समवास्थितः । अद्य मामनुग्रहीतुं स्वयमागतोऽसि । भवत्संदर्शनान्मम जन्म सफलमभूत् । अद्य मे सर्वे क्रतवः सफला बभूवुः । दीर्घकालमनन्यमतिना मया यत्तपस्तप्तं तस्य प्रभावात्तवार्चनं जातमिति मन्ये । राम मम हृदये सीतया सार्धं सदा वस । गच्छतस्तिष्ठतो वा मम स्मृतिस्त्वयि सदा स्यात् । इति स्तुत्वागस्त्यमुनिः पुरा महेंद्रेण रामार्थं स्थापितं चापं बाणपूर्णावक्षय्यौ तूणीरौ रत्नविभूषितं खड्गं च तस्मै दत्वोवाच प्रभो भूभारभूतं राक्षसमंडलं जहि । इतो योजनयुग्मे गौतमीतटे पंचवटीनामा पुण्यकाननमंडित आश्रमोऽस्ति । तत्र त्वया वनवासावशेषः कालो नेतव्यः । तत्रैव देवानां बहूनि कार्याणि करिष्यसि । तदगस्त्यवचः श्रुत्वा मुदान्वितः प्रभुस्तेन दर्शितेन मार्गेण ययौ ॥

श्रुत्वा तदागस्त्यसुभाषितं वचः ॥
स्तोत्रं च तत्वार्थसमन्वितं विभुः ॥
मुनिं समाभाष्य मुदान्वितो ययौ ॥
प्रदर्शितं मार्गमशेषविद्धरिः ॥ १

इति ग० रा० अर० कां० तृतीयः सर्गः ३

---

श्रीमहादेव उवाच । सीतालक्ष्मणान्वितो रामो गच्छन्मार्गे शैलशृंगमिव स्थितं वृद्धं जटायुषं दृष्ट्वा किमेतदिति विस्मित उवाच । सौमित्रे धनुरानय । राक्षसोऽयं पुरःस्थितः । ऋषिभक्षकमिमं हनिष्यामि । तच्छ्रुत्वा भयपीडितो गृध्रराडुच्चैरुवाच राम न वधार्होऽहं । अहं तव पितुः प्रियःसखा जटायुर्नामा गृध्रस्तव प्रियकृत्पंचवट्यां वत्स्यामि । कदाचित्त्वयि लक्ष्मणेऽपिच मृगयां गते जनकजा मया प्रयत्नतो रक्षणीया भवेत् । तद्गृध्रवचनं श्रुत्वा रामः सस्नेहमब्रवीत्साधु, गृध्रमहाराज तथैवास्तु । अत्रैव वने मम समीपे वसन्मम प्रियं कुरु । इति सम्यग्बोधितं गृध्रमालिंग्य पंचवटीं ययौ । गोदावरीतीरं गत्वा ते पंचवटसमीपे स्थिताः । ततो गौतम्या उत्तरे तटे कदंबपनसाम्रादिफलवृक्षसमाकुले जनसंबाधवर्जिते नीरुजस्थले रामो लक्ष्मणेन सुविस्तृतं मंदिरं कारयामास । तत्ते त्रयः सुखमध्यूषुः । लक्ष्मणोऽनुदिनं कंदमूलफलान्यानीय सीतारामाभ्यां प्रददौ, रात्रौ धनुर्बाणधरो जजागार । एवं

सवातत्परमानस एकदैकांतं समुपस्थितं रामं प्रणम्योवाच भगवन्मोक्षोपायं श्रोतुमिच्छामि । त्वत्तोऽन्यो वक्ता भूतले नास्ति । तदा तस्य भक्त्या सुप्रसन्नः प्रभुस्तस्मायादौ मायास्वरूपं तदनंतरं ज्ञानसाधनं पश्चाद्विज्ञानसहितं ज्ञानं मोक्षस्वरूपंच कथयित्वाब्रवीत् ॥

भक्तानां मम योगिनां सुविमलस्वांतातिशांतात्मनां ॥
मत्सेवाभिरतात्मनां च विमलज्ञानात्मनां सर्वदा ॥
संगं यः कुरुते सदोद्यतमतिः सत्सेवनानन्यधी ॥
मोक्षस्तस्यकरे स्थितोऽहमनिशं दृश्यो भवेनान्यथा ॥ १ ॥

इति ग० रा० अर० कां० चतुर्थः सर्गः ४

---

श्रीमहादेव उवाच । तस्मिन्काले जनस्थाननिवासिनी कामरूपिणी महाबलैका राक्षसी महारण्ये विचचार । एकदा सा पंचवट्याःसमीपतः पद्मवज्रांकुशांकानि रामपदानि दृष्ट्वा तत्सौंदर्यमोहिता कामपरीतात्मिका तान्यनुसृत्य राघवाश्रममायात् । तत्र सीतया सह संस्थितं कंदर्पसदृशं रामं दृष्ट्वा मदनविमोहिता तं पप्रच्छ त्वं कस्य पुत्रः कोऽसिवा? जटावल्कलाद्यैर्युक्त आश्रमे किं वससि? त्वयात्र किं साध्यं? अहं शूर्पनखानाम्नी मुनिभक्षिका राक्षसेंद्रस्य रावणस्य भगिनी भ्रात्रा खरेण सहास्मिन्कानने वसामि । सर्वं वनं राज्ञा मे दत्तं । त्वां वेत्तुमिच्छामि वद । राघवस्तामाह । अहमयोध्याधिपतेः सुतो रामनामा । एषा सुंदरी मम भार्या जनकनंदिनी सीता । स तु मम कनीयान्भ्राता लक्ष्मणः । तव किं कार्यं मया करणीयं ब्रूहि । इति रामवचः श्रुत्वा कामार्ता साब्रवीत् राम एहि मयासार्धं गिरिकानने रमस्व । कमलेक्षण कामपीडिताहं त्वां त्यक्तुं न शक्नोमि । तदा रामः सीतां कटाक्षेण पश्यन्सस्मितमब्रवीत् । सुंदरि ममैषा भार्या विद्यते । त्वं सापत्न्यदुःखेन कथं स्थास्यसि? मम भ्रातातीवसुंदरो बहिरास्ते, स तवानुरूपः पतिर्भविता । इत्युक्ता सा लक्ष्मणं प्राह सुंदर भ्रात्राज्ञां पुरस्कृत्य मम पतिर्भव । शीघ्रमद्य संगच्छावहै । लक्ष्मणस्तामाह हे स्त्रि अहं तस्य दासः । त्वं दासी भविष्यसि । किंनु ततो दुःखतरं? तस्मात्तमेव गच्छ । तच्छ्रुत्वा राघवं पुनरागत्य क्रोधेनावदद्राम किमर्थं मामितस्ततो भ्रामयासि? इदानीमेव सीतां भक्षयामि । इत्युक्त्वा सा वि-

कटाकारा जानकीं भक्षयितुमधावत् । ततो लक्ष्मणो रामाज्ञया खड्गमादाय तस्या नासां कर्णौच चिच्छेद । ततो घोरं ध्वनिं कृत्वा क्रंदमाना रुधिराक्त-वपुः खरस्याग्रे पपात । स तामाह किमेतत् ? मृत्योर्वक्रानुवर्तिना केनैवं कारितासि वद । कालकल्पमपि तं क्षणाद्भक्षिष्यामि । सा तमाह दंडकां नि-र्भयां कर्तुमागतो रामो गोदावरीतट आस्ते । तेन चोदितस्तस्य भ्राता मा-मेवं कृतवान् । यदि त्वं कुलजातो वीरोऽसि तौ रिपू जहि । तयो रुधिरं पास्यामि । तौ भक्षयिष्ये । नोचेत्प्राणान्परित्यक्ष्यामि ॥

स्वसृवचनं श्रुत्वा क्रोधमूर्छितः खरस्त्वरितं प्रस्थितास्त्रिशिरोदूषणादीं-श्चतुर्दशसहस्त्रराक्षसांश्चोदयामास । नानाप्रहरणोद्यतास्ते सर्वे रामं शीघ्रं ययुः । तेषां कोलाहलं श्रुत्वा रामः सौमित्रिमब्रवीद्विपुलः शब्दः श्रूयते । नूनं र-क्षांस्यायांति । अद्य तेषां मयासह महद्युद्धं भविष्यति । त्वं सीतां गुहायां नी-त्वा तत्र तिष्ठ । अहं सर्वाणि रक्षांसि हंतुमिच्छमि । लक्ष्मणस्तथेति सीतामा-दाय गव्हरं ययौ । रामः परिकरं बद्ध्वा धनुरादायाक्षय्यशरौ तूणीरौ पृष्ठे बद्ध्वा सज्जोऽभवत् । तानि रक्षांस्यागत्य विचित्राण्यायुधानि पाषाणान्पादपांश्च तस्योपरि चिक्षिपुः । रामस्तानि क्षणाल्लीलया तिलशश्चिच्छेद । ततो बाणस-हस्त्रेण प्रहरार्धेन खरादीन्सर्वाञ्जघान । लक्ष्मणो गुहामध्यादागत्य तान्सर्वा-न्हतान् दृष्ट्वा विस्मयमाययौ । सीतापि विस्मयान्विता रामं समालिंग्य तस्यां-गेषु शस्त्रव्रणान्ममार्ज ॥

शूर्पनखा सर्वं रक्षोबलं हतं दृष्ट्वा दुद्राव । लंकां गत्वा सा सभामध्ये क्रोशंती रावणस्य पादसन्निधावुर्व्यां पपात । भगिनीं भयविव्हलां दृष्ट्वा रा-वणः प्राह वत्से उत्तिष्ठोत्तिष्ठ । तव विरूपकरणं शक्रेण वा यमेन वा केन कृतं तद्ब्रूहि । क्षणेन तं भस्मीकुर्यां । राक्षसी तमुवाच । त्वं प्रमत्तः पानास-क्तः स्त्रीजितो विमूढधीर्लक्ष्यसे । चारचक्षुर्विहीनः कथं राजा भविष्यसि ? खरादीनां महात्मनां राक्षसानां चतुर्दश सहस्राणि रामेण संख्ये क्षणेनैव नि-हतानि । जनस्थानं मुनीनां वासार्थमशेषं निर्भयं कृतं न जानासि । अतस्त्वं मया विमूढ उच्यसे । रावण उवाच । रामः को वा तेनाशराः किमर्थं वा हतास्तन्मे विस्तरतः कथय । अहं तस्य समूलं घातं करिष्यामि । शूर्पन-खोवाच । अहं कदाचिज्जनस्थानाद्गौतमीतटे पंचवटीं याता । तत्राश्रमे स्थि-तः श्रीमान्राजीवलोचनो जटामुकुटमंडितो धनुर्बाणधरो रामो मया दृष्टः तस्यानुजो लक्ष्मणस्तथैव रूपशाली वर्तते । रामभार्या सीतापरा श्रीः । दे-

वगंधर्वमनुष्याणांमध्ये तथाविधरूपसंपन्ना मया न दृष्टा श्रुता वा । राजन् तां तव भार्यार्थमानेतुमहमुद्युक्ताभवं । तदा रामेण नोदितो लक्ष्मणो मम नासाकर्णांचिच्छेद । ततोऽहमतिदुःखेन रुदती खरमन्वगां । स राक्षसगणैःसह रामं समासाद्य युद्धमकरोत् । भीमविक्रमा अपि ते सर्वे रामेणैकेनैव विनाशिताः । स यदीच्छति त्रैलोक्यं निमिषार्धतो भस्मीकुर्यादिति मे भाति । प्रभो यदि सीता तव भार्या स्यात्तर्ह्येव तव जीवितं सफलं । अतो यथा सा कमलपत्राक्षी सर्वलोकैकसुंदरी तव वल्लभा भवेत्तथा यत्नं कुरु । साक्षाद्रामस्य पुरतः स्थातुं त्वं न क्षमः । कदाचित्त्वं मायया मोहयित्वा तां प्राप्स्यसे । एवं भगिनीभाषितमाकर्ण्य सूक्तवाक्यैर्दानमानादिभिश्च तामाश्वास्य रावणः स्वकं गृहं प्रविवेश । तत्र चिंतापरो भूत्वा रात्रौ निद्रां न लब्धवान् । मनुष्यमात्रेणैकेन बलवीर्यदर्पितो मम भ्राता कथं नाशितः ? यद्वा रामो न मानुषः । पूर्वं द्रुहिणेन संप्रार्थितः परमात्मा मां हंतुकामोऽद्य मनुष्यरूपो रघोः कुलेऽभूत् । यद्यहं परमेश्वरेण वध्यः स्यां वैकुंठराज्यं प्राप्स्ये नोचेदिह राक्षसराज्यं चिरं भोक्ष्याम्यतो रामं व्रजामि । इत्थं विचिंत्य स राक्षसेंद्रो रामं परमात्मानं विदित्वा भगवान्भक्त्या द्रुतं न प्रसीदेदतो विरोधबुद्ध्यैव तं प्रयास्यामीति निश्चितवान् ॥

इति ग० रा० अर० कां० पंचमः सर्गः ॥५॥

---

श्रीमहादेव उवाच । निशायामेवं विचिंत्य प्रभाते रावणो रथमास्थितो मनसैकं कार्यं निश्चित्योदन्वतः परे पारे मारीचसदनं ययौ । तत्र मारीचो मुनिवज्जटावल्कलधारको हृदि परमात्मानं ध्यायन्समाधिस्थ आसीत् । समाधिविरामे गृहमागतं रावणं दृष्ट्वा द्रुतमुत्थाय तमालिंग्य यथाविधि पूजयित्वा कृतातिथ्यमब्रवीत् रावण एतत्त्वैकेन रथेन समागमनं किमर्थं तद्ब्रूहि । हृदि किंचित्कार्यं विचारयंश्चिंतापर इवाभासि । तद्यदि गोप्यं न चेन्मे ब्रूहि । तत्करणे यदि मां वृजिनं न स्पृशेत्तव प्रियमहं करवाणि । रावण उवाच । राजा दशरथनामा साकेताधिपतिरासीत् । तस्य ज्येष्ठः पुत्रो रामनामास्ति । भार्यया सहितं तं सबांधवं स राजा वनं निवासयामास । स सांप्रतं घोरे विपिने पंचवट्याश्रम आस्ते । तस्य भार्या सीता विशालाक्षी लोकविमोहिनी वर्तते । रामः खरादीन्निरपराधान्भीमविक्रमान्मम सैनिकान्ह

त्वा निर्भयो विपिने सुखमास्ते । दुरात्मा स मम भगिन्याः शूर्पनखाया नासाकर्णौचिच्छेद । अतोऽहं त्वत्सहायेन गत्वा तस्य प्राणवल्लभां हरिष्यामि । त्वं मायामृगो भूत्वा रामलक्ष्मणावाश्रमादपनय तदाहं सीतां हरिष्यामि । तावत्साहाय्यं कृत्वा त्वं पूर्ववत्स्थास्यसि ॥

एवं भाषमाणं रावणं वीक्ष्य विस्मितो मारीच उवाच । रावण इदं मूलघातकरं वचस्तुभ्यं केनोपदिष्टं ? यो दुरुपदेशेन त्वन्नाशं प्रतीक्षते स एव तव शत्रुः । स तव वध्यः । रामस्य पौरुषं स्मृत्वा मम चित्तमद्यापि वेपते । स यदा कौशिकस्य यज्ञसंरक्षणार्थमागतस्तदा बाल आसीत्तथाप्येकेनैवेपुणानेकयोजनशतमुल्लंघय्य मां सागरे पातयामास । इदि पूर्ववैरमनुचिंतयन्नहमेकदा दंडकायां रामं हंतुमुद्यतस्तीक्ष्णशृंगमृगरूपं धृत्वा मादृशैर्बहुभिरावृतः सीतालक्ष्मणसमन्वितं राघवमभ्ययां । स मां विलोक्यैकं शरमाक्षिपत्तेन विद्धहृदयोऽहमुद्भ्रमन्पुनः सागरेऽपतम् । तस्य तत्पौरुषं स्मृत्वा मम हृदयमद्यापि वेपते । तत्प्रभृत्यहमिदमूर्जितस्थानमाश्रितो राममेव सततं विभावये । रामागमनशंकया बाह्यकार्यं परित्यज्य राममेव चिंतयन्स्वपिमि । स्वप्नदृष्टिगतराघवं पश्यन्नेव विगतनिद्र आसनोपविष्टो भवामि । तस्माद्भवानपि रामे वैरबुद्धिं विमुच्य गृहं प्रयातु । चिरेण वृद्धिं प्राप्तं राक्षसकुलं रक्ष । तेन सहैवं विरोधेन सर्वं रक्षःकुलं विनङ्क्ष्यति । तव हितं वदतो मम भाषितं परिगृहाण । राघवे विरोधमतिं त्यज, तं भक्तितो भज । अहमिदमशेषं नारदमुखादशृणवम् । आदियुगे ब्रह्मणा प्रार्थितः परमेश्वरस्तमुवाच किं तवेप्सितं करवाणि ? धात्रोक्तं प्रभो भुवि मानुषं वपुर्धृत्वा देवरिपुं दशकंधरं जहि । तेन तथेत्यंगीकृत्यायोध्याधिपतेर्दशरथस्य गृह आत्मानं चतुर्धा सृजामीत्युक्तं । अतोऽहं ब्रवीमि रामो न मानुषः । भूभारहरणार्थं मायामानुषवेषेणावतीर्णः साक्षात्परमेश्वरः । त्वमात्मनाशोद्युक्तो माभूः । सुखेन गृहं गच्छ ॥

इतिमारीचवचः श्रुत्वा रावणः प्रत्यभाषत । यदि रामः परमात्मा मां हंतुं मानुषो भूत्वा यत्नादिह समागतः स्वसंकल्पमचिरादेव सत्यं करिष्यति । अतोऽहं सीतां यत्नतो हराम्येव । हे वीर अहं रामाद्रणे वधं प्राप्तः परमं पदं लप्स्ये । यद्वा रामं हत्वा सीतां प्राप्स्यामि । अत उत्तिष्ठ विचित्रमृगरूपधरः सन् रामलक्ष्मणावाश्रमादाकृष्य शीघ्रमतिदूरं नय । पश्चाद्यथापूर्वमाश्रमे सुखं तिष्ठ । अतःपरं मद्भीषणं वाक्यं किंचिद्भाषसे चेदनेनासिना त्वामत्रैव हनिष्यामि न संशयः । इति रावणवचः श्रुत्वा मारीचः स्वात्मन्येवान्वचिंतयद्यदि

मां राघवो हन्यादहं भवार्णवान्मुक्तो भविष्यामि । यद्यसौ दुष्टो हन्यात्तदा ध्रुवं नरको भवेत्तस्माद्रामान्मरणमेव साधीयः । इति मरणं निश्चित्यावेगत उत्थाय रावणमब्रवीद्राजंस्तवाज्ञां करोमि । इत्युक्त्वा रथमास्थायोभौ रामाश्रमं प्रति गतौ । मारीचस्ततस्सुवर्णाभो राप्यबिंदुको रत्नविलोचनो विद्युत्प्रभः सुंदरास्यो मृगो भूत्वा विचरन्रामाश्रमपदस्यांते सीतादृष्टिपथे चरन्क्षणं समीपमागत्य पुनः परावृतः । एवं स मायामृगवेषरूपधरः सीतां परिमोहयन्नितस्ततश्चचार ॥

इति ग० रा० अर० कां० षष्ठः सर्गः ॥ ६ ॥

---

श्रीमहादेव उवाच । अथ रामस्तत्सर्वं रावणचेष्टितं ज्ञात्वा सीतामेकांत उवाच जानकि, मम वचः शृणु । रावणो भिक्षुरूपेण तवांतिकमागमिष्यति । अतस्त्वं स्वाकारां छायामुटजे स्थापयित्वैकसंवत्सरमभावदृश्यरूपेण तिष्ठ । रावणस्य वधांते मां पूर्ववत्प्राप्स्यसे । रामोदितं श्रुत्वा सीता तथेति मायासीतां बहिः संस्थाप्य स्वयमनलेऽन्तर्दधे । तदा मायाविनिर्मितं मृगं पश्यंती मायासीता हसंती राममभ्येत्य प्रोवाच राम विचित्रबिंदुभिर्युक्तं कानकं चित्रं मृगं पश्य । अकुतोभयं चरंतमेनं बद्ध्वा मे देहि । सुंदरोऽसौ मम क्रीडामृगो भवतु । रामस्तथेति धनुरादाय गच्छन्लक्ष्मणमब्रवीन्मम प्राणवल्लभामति यत्नेन रक्ष । राक्षसा मायाविनः संयतोऽवहितःसन्सीतां रक्ष । लक्ष्मणस्तमाह देव एवंभूतो मृगः कुतः ? अयं मृगरूपधारी मारीचो नात्र संशयः । श्रीराम उवाच । यद्ययं मारीचस्तदा तं हन्मि, मृगश्चेत्सीताविश्रामहेतवे बद्ध्वा सत्वरमानेष्यामि । इत्युक्त्वा स तं मायामृगमनुययौ । स मृगः कदाचिदभ्याशे व्यदृश्यत, क्षणमधावत्क्षणं लीनोऽभवत्पुनरदृश्यतैवं रामं दूरादपाहरत् । रामः शरमादाय तं विव्याध । तदा पूर्वरूपधरो रुधिराक्तास्यो हा हतोऽस्मि ! महाबाहो लक्ष्मण मां द्रुतं त्रायस्वेति रामवाक्तुल्यवाचोक्त्वा पपात । म्रियमाणोऽसुराधमो हा लक्ष्मणेति मद्वाक्यमनुकुर्वन् किं ममार, मद्वाक्सदृशमालापं श्रुत्वा सीता कामवस्थां भजेदिति चिंतापरो रामो दूरान्न्यवर्तत ॥

दुरात्मनस्तद्भाषितं श्रुत्वा भीतातिदुःखिता सीता लक्ष्मणमब्रवीद्त्वर वेगेन गच्छ, तव भ्राता सुरपीडितः । हा लक्ष्मणेति तस्य वचनं न शृणोषि किं ? लक्ष्मणोऽब्रवीद्देवि न तद्रामवचनं । कश्चिद्राक्षसस्तदब्रवीत् । यःक्रो

धेन त्रैलोक्यमपि क्षणान्नाशयेत्स रामो ऽदीनवचनं कथं भाषेत ? तच्छ्रुत्वा क्रुद्धा बाष्पविलोचना सीता प्राह दुर्बुद्धे भ्रातुर्व्यसनमिच्छसि । रामनाशाभिकांक्षिणा भरतेन प्रेषितोऽसि । रामनाश उपस्थिते मां नेतुमागतोऽसि किंतु मां न प्राप्स्यसे । अद्य प्राणांस्त्यक्ष्यामि पश्य । इत्युक्त्वा सा बाहुभ्यामात्मानं ताडयंती रुरोद । लक्ष्मणस्तच्छ्रुत्वा कर्णौ पिधायातिदुःखितः प्राह धिक् त्वां चंडि । यतो मामेवं भाषसे ततो नाशमुपैष्यसि । इत्युक्त्वा तां वनदेवीभ्यः समर्प्य शनैः शनैराममेव ययौ । ततोऽवसरं समालोक्य रावणो भिक्षुवेषधृक् स्फुरद्दंडकमंडलुः सीतासमीपमगमत् ॥

सीता तमवलोक्याशु नत्वा संपूज्य स्वागतमुक्त्वा कंदमूलफलादीनि दत्वोवाच मुने भुंक्ष्व यथासुखं विश्राम्यस्व । इदानीमेव मम भर्तागमिष्यति । स तव प्रियं करिष्यति । भिक्षुरुवाच । कमलपत्राक्षि का त्वं? कस्तव भर्ता? कुतोऽत्र राक्षससेविते वने तव वासः ? मे सर्वं स्ववृत्तांतं ब्रूहि । ततः सर्वं स्ववृत्तांतं कथयित्वा सीतोवाच त्वां ज्ञातुमिच्छामि । भिक्षुरुवाच । अहं पौलस्त्यतनयो रावणो राक्षसाधिपस्त्वत्कामपरितप्तस्त्वां स्वपुरं नेतुमागतः । मुनिवेषेण रामेण किं करिष्यसि ? मां भज, मया सार्धं भोगान्भुंक्ष्व । वनवासोद्भवं दुःखं त्यज । तद्वचनं श्रुत्वा भीता सीता तमुवाच यस्मान्मामेवं भाषसे ततो राघवान्नाशमेष्यसि । क्षणं तिष्ठ, सहानुजो राम आगमिष्यति । हरेर्भार्यां शश इव मां धर्षयितुं त्वं कथं समर्थः ? रामबाणैर्विभिन्नस्त्वं महीतले पतिष्यसि । इति सीतावचः श्रुत्वा रावणः क्रोधमूर्छितो महापर्वतसन्निभं दशास्यं विंशतिभुजं कालमेघसमद्युति स्वरूपं दर्शयामास । तद्दृष्ट्वा वनदेव्योऽपि तत्रसुः । ततः स सीतामुद्धृत्य रथे क्षिप्त्वा विहायसा क्षिप्रं ययौ । तदा जानकी हा राम हा लक्ष्मणेति रुदती भयोद्विग्नमना दीना भुवमेव पश्यंत्यासीत् । तस्यास्तत्क्रंदितं श्रुत्वा तीक्ष्णतुंडको जटायुर्नगाग्राच्छीघ्रमुत्थितः प्राह तिष्ठ तिष्ठ । मंत्रपूतं पुरोडाशं मुषित्वा शुनक इव शून्याद्वनालयाल्लोकनाथस्य भार्यां मुष्णन्ममाग्रतः को गच्छति ? इत्युक्त्वा तीक्ष्णतुंडेन रथं चूर्णयामास । ततः सीतां परित्यज्य रावणः खड्गमाददेऽपिच पक्षिराजस्य पक्षौ चिच्छेद तदा किंचिच्छेषेण प्राणेन स भुवि पपात । रावणो मायाकल्पितेनान्यरथेन पुनः सीतां निनाय । हा राम! हा जगन्नाथ! मां किं न पश्यसि ? राक्षसेन नीयमानां स्वभार्यां मोचय । हा महाभाग लक्ष्मण! अपराधिनीं मां त्रायस्व । हा देवर वाक्शरेण हतस्त्वं मां क्षमस्व । एवं क्रोशंतीं तामादाय रामागमन-

शकया भीतो रावणो वायुवेगेन जगाम ॥

विहायसा नीयमाना सीताधोमुखी सती पर्वताग्रस्थितान्पंच वानरा-नपश्यत् । तत्क्षणमाभरणादिकं विमुच्योत्तरीयार्धखंडेन बद्ध्वा रामायेमे कथ-यंत्विति पर्वते चिक्षेप । रावणः समुद्रमुल्लंघ्य लंकां गत्वा सीतां स्वांतःपुर-रहस्यशोकविपिने संस्थाप्य राक्षसीभिः परिवार्यान्वपालयत् ॥

कृशातिदीना परिकर्मवर्जिता ॥
दुःखेन शुष्यद्वदनातिविह्वला ॥
हा राम रामेति विलप्यमाना ॥
सीता स्थिता राक्षसवृंदमध्ये ॥ १ ॥

इति ग० रा० अर० कां० सप्तमः सर्गः ॥ ७ ॥

---

श्रीमहादेव उवाच । रामो मायाविनं राक्षसं हत्वा स्वाश्रमं गंतुं प्र-तस्थे । ततो दूरादायांतं दीनमुखं लक्ष्मणं दृष्ट्वात्मन्येव चिंतयामास । मया मायासीता कृतेति लक्ष्मणो न जानाति, एनं वंचयित्वा प्राकृतवच्छोचामि । यद्यहं विरक्तो भूत्वा तूष्णीं स्थास्यामि राक्षसकोटीनां वधोपायः कथं भवेत् । यदि कामुक इव शोचामि तदा तामनुचिन्वन्क्रमेणासुरालयं यास्यामि । रा-वणं सकुलं हत्वाग्नौ स्थापितां सीतामादायायोध्यां गमिष्यामि । ब्रह्मणा प्रा-र्थितोऽहं मनुष्यभावेन जातस्तस्मान्मानुषचरितं दर्शयामि । एवं निश्चित्यानुजं दृष्ट्वाब्रवीन्मम प्रियां त्यक्त्वा किमर्थमागतोऽसि ? सा राक्षसैर्नीता वा भक्षि-ता भवेत् । लक्ष्मणो रुदन्प्रांजलिर्भूत्वा जातं वृत्तांतं कथयन्प्राह राम तया य-दुर्वच उक्तं तदश्राव्यमतः कर्णौ पिधाय ततो निर्गत्य त्वां समीक्षितुमागतो-ऽस्मि । राम उवाच । लक्ष्मण तथापि स्त्रीभाषणं सत्यं मत्वा शुभाननां त्य-क्त्वागतोऽसि तदनुचितं कृतं । सा राक्षसैर्नीता वा भक्षितेति न जाने । इ-तिब्रुवन्नाश्रमं त्वरितं ययौ । तत्र जानकीमदृष्ट्वातिदुःखितो विललाप । प्रिये क्व गतासि ? अथवा मद्विमोहार्थं क्वचिद्विलीयसे किमित्याचिन्वंस्तां न कु-त्राप्यपश्यत्तदा " हे वनदेव्यः सीता क्व वर्तते ? मृगाः पक्षिणो वृक्षा मम प्रियां दर्शयत " इति विललाप ॥

एवं सर्वं वनं विचिन्वन्भग्नरथछत्रचापानि पतितानि दृष्ट्वा लक्ष्मण

माह पश्य केनचिन्नीयमानां जनकजां दृष्ट्वान्यस्तं जित्वा तां जहार तच्चिह्नमिदं दृश्यते। ततः किंचिदग्रे गत्वा पर्वतसन्निभं रुधिराक्तवपुर्दृष्ट्वाब्रवीदेष वै सीतां भक्षयित्वातितृप्तो निशाचरः शेते, एनं हन्मि। तद्रामवचः श्रुत्वा जटीयुर्भीतः प्राह प्रभो जटायुरहं। स्वकर्मणा म्रियमाणं मां मा जहि। तव भार्याहारिणं रावणमहं समनुद्रुतः। तेन सह मे युद्धमभूत्। तेन घातितः पतितोऽस्मि। जगन्नाथ तव पश्यतः प्राणांस्त्यक्ष्यामि। तच्छ्रुत्वा साश्रुलोचनो रामस्तं हस्ताभ्यां स्पृशन्नाह जटायुर्मत्कार्यार्थं हतो मत्प्रियबांधवोऽसि। स पुनरब्रवीत् रावणो मैथिलीमादाय दक्षिणाभिमुखो ययौ। इतोऽधिकं वक्तुं न शक्नोमि। भगवन् राम अंतकाले दिष्ट्या दृष्टोऽसि। त्वां परमात्मानं जानामि। प्राणोत्क्रमणसमये त्वद्दर्शनान्मुक्तोऽस्मि। मां पुनः स्पृश तेन तव पदं यास्यामि। तथेति रामस्तदंगं पाणिना पस्पर्श ततः स प्राणान्परितत्याज। रामस्तं बंधुवदनुशोच्य लक्ष्मणेन सह काष्ठानि समानीय तं प्रददाह। ततः स्नात्वैकं मृगं हत्वा मांसखंडान्समंततः शाद्वले पृथक् पृथगनेकधा प्राक्षिपत्। भक्षयंतु पक्षिणः सर्वे तृप्तो भवतु पक्षिराडित्युक्त्वा प्राह जटायुर्मत्पदं गच्छ, मम सायुज्यं भज। ततोऽसौ दिव्यरूपधरो विमानमारुह्य शंखचक्रगदापद्मकिरीटादिभूषणैर्विराजमानैश्चतुर्भिः पार्षदैः पूज्यमानः कृतांजलिपुटो भक्त्या गद्गदया गिरा रघुनंदनमस्तौत्। तस्य स्तुत्या प्रसन्नो रामः पुनराह परं पदं गच्छ भद्रमस्तु ते॥

इति ग० रा० अर० कां० अष्टमः सर्गः॥ ८॥

---

श्रीमहादेव उवाच। ततः पुनर्दुःखं समाश्रित्य सीतान्वेषणतत्परो रामो लक्ष्मणेन सह विपिनांतरं जगाम। तत्राद्भुताकृती राक्षसोऽदृश्यत। तस्य वक्षस्येव महद्वक्त्रमासीत्। बाहू योजनमात्रं व्यापारवंतावास्तां। एवं रूपस्य चक्षुरादिविवर्जितस्य सर्वसत्वहिंसकस्य कबंधनाम्नो राक्षसस्य बाह्वोर्मध्यदेशे चरंतौ रामलक्ष्मणौ तद्बाहुपरिवेष्टितौ महासत्वं तं ददृशतुः। तदा रामः प्रोवाच लक्ष्मण आवामस्य बाह्वोर्मध्ये संकलितावन्यत्र गंतुं मार्गो न दृश्यते। इदानीं स नौ भक्षयेत्। इतोऽस्माभिः किं कर्तव्यं? लक्ष्मणस्तमुवाच भ्रातः किमत्र विचारेण? आवामव्यग्रावेकैकं रक्षोभुजं छिंद्याव। तथेति रामः खड्गेन तस्य दक्षिणभुजमच्छिनत्। तथैव लक्ष्मणो वामं चिच्छेद। ततो-

ऽतिविस्मितः स राक्षसः प्राह मद्बाहुच्छेदनसमर्थो भूलोके तथा दिवि विद्यमानेषु देवेष्वपि न कोऽप्यासीत् । तत्कर्तुं क्षमौ कौ युवां ? ततो हसन्नात्मानं भ्रातरं च वर्णयन्रामस्तं पप्रच्छ विकटरूपभृक् त्वं कोऽसि ? कबंध उवाच । धन्योऽहं यदि रामस्त्वं ममांतिकमागतः । अहं गंधर्वराजः । मया तपसा ब्रह्मणोऽवध्यत्वं लब्धमस्ति । पुरा रूपयौवनगर्वितोऽखिललोकं विचरन्कदाचिदष्टावक्रं मुनिं दृष्ट्वाहसं । तदा क्रुद्धः स आह दुर्मते राक्षसो भव । ततो मया वंदितो दयापरः पुनः प्राह त्रेतायुगे भगवान्दाशरथिर्भूत्वा वनमागमिष्यति तेन यदा योजनायतौ ते बाहू छेत्स्येते तदा शापाद्विनिर्मुक्तो यथापूर्वं भविष्यसि । इति शप्तोऽहमात्मनस्तनुं राक्षसीमद्राक्षं । अथ कदाचिदहं रुषा देवराजमभ्यद्रवं । तदा स मां शिरोदेशे वज्रेणाभ्यताडयत् । तेन शिरो गतं, पादौ च नष्टौ । ब्रह्मदत्तवराद्वज्राघातादपि मृत्युर्नाभूत् । आस्यवर्जितं मां विलोक्य सर्वे दयाविष्टा अमराधिपमूचुः अयं मुखाभावे कथं जीवेत् ? ततो मघवा मां प्राह तव जठरे मुखं भवेत् । बाहू योजनायामौ भविष्यतः । इतो व्रज । इत्युक्तोऽत्रवसन्वनचरान्भक्षयामि । अधुना त्वया मम बाहू खंडितौ । इतः परमग्नियुक्तेंधनावृते गर्तपरिभागे मां निक्षिप । अग्निना दग्धः पूर्वरूपमनुप्राप्य तव भार्यामार्गं वदिष्यामि । इत्युक्तो रामो लक्ष्मणेनाशु श्वभ्रं निर्माय्य तत्र तं निक्षिप्य काष्ठैः प्रादहत् । ततो देहात्कंदर्पसदृशः पुरुष उत्थितः । स गंधर्वो रामं प्रदक्षिणीकृत्य साष्टांगं प्रणिपत्य कृतांजलिःसन्भक्तिगद्गदया गिरा रामं स्तोतुमुपचक्रमे । तस्य स्तुत्या तुष्टो भगवान्प्राह भद्रमस्तु ते, योगिगम्यं मम परं स्थानं याहि ॥

इति ग० रा० अर० कां० नवमः सर्गः ॥ ९ ॥

---

श्रीमहादेव उवाच । स गंधर्वो वरं लब्ध्वा प्रयास्यन्राममब्रवीत्पुरोभागे दृश्यमान आश्रमे त्वच्चरणभक्तिमार्गविशारदा शबर्यास्ते । सा ते सीतावस्थितिस्थानं तत्प्राप्त्युपायं च कथयिष्यति । तां प्रयाहि । इत्युक्त्वार्कवर्चसा विमानेन स दिवं ययौ । रघुनंदनस्तद्घोरं वनं त्यक्त्वा शनैः शबर्याश्रमपदं प्राप । शबरी लक्ष्मणेन समन्वितं राममायांतं दृष्ट्वा हर्षाच्छीघ्रमुत्थाय पादयोरग्रे पतित्वा तं स्वागतेनाभिनंद्य शोभनासने सन्न्यवेशयत् । अनंतरं तयोः पादप्रक्षालनं कृत्वा तत्पावनाशनं तोयं शिरसि धृत्वा पीत्वा च तौ वन्यैः पुष्पै-

र्चयित्वा स्वयमास्वाद्य माधुर्यं परीक्ष्यामृततुल्यानि रामार्थं संगृहीतानि दिव्यानि बदरीफलानि भक्तितो निवेदयामास । एवं कृतातिथ्यमासनोपविष्टं राघवं शबरी प्रांजलिर्वाक्यमब्रवीत् भगवन्नत्राश्रमे मे गुरवो महर्षयः स्थिताः। तेषां शुश्रूषणं कुर्वत्यहं तेषां समीपे स्थिता । बहुकालांते ब्रह्मणः पदं गच्छंतस्ते मामब्रुवन्स्त्वमत्रैव वसापिचैकाग्रध्यानानिष्ठा स्थिरा भव । राक्षसानां वधायर्षीणां रक्षणाय च जातः परमात्मा दाशरथिरत्रागमिष्यति तावत्कलेवरं रक्ष । राघवं दृष्ट्वा वपुर्दग्ध्वा तत्पदं यास्यसि । राम तवागमनं प्रतीक्ष्य त्वद्ध्यानैकपरायणाहं तथैवाकरवं । अद्य गुरुभाषितं सफलं जातं । भो राम तवैतद्रूपस्य दर्शनं मे गुरवोऽपि नालभंत । अहं योषिन्मूढा हीनजातिसमुद्भवा । तव दासस्य दासानां दासीत्वेऽपि ममाधिकारो नास्ति । साक्षात्तव दास्ये तु सुतरां न । योगिनामपि मनोवागगोचरस्त्वं मया कथं दर्शनीयः ! देवेश त्वां स्तोतुं न जानामि । क्षमस्व प्रसीद मे ॥

श्रीराम उवाच । पुंस्त्वस्त्रीत्वकृतो विशेषो वा जातिनामादिकृतोविशेषो न मद्भजने कारणं । किंतु भक्तिरेव कारणं । मद्भक्तिविमुखैर्नरैर्यज्ञदानतपोभिर्वेदाध्ययनकर्मभिर्वा नाहं द्रष्टुं शक्यः । शबरि भक्तिसाधनं संक्षेपतो वक्ष्यामीत्युक्त्वा सत्संगत्यादि नवविधं साधनं कथयित्वाह यस्मान्मद्भक्तियुक्ता त्वं ततोऽहं त्वामुपस्थितः । इतो मद्दर्शनात्तव मुक्तिर्भवेन्नात्र संशयः । मम प्रिया सीता कुत्रास्ति केन वा नीतेति यदि जानासि तद्ब्रूहि । शबर्युवाच । देव त्वं सर्वज्ञः सर्वं जानासि तथापि लोकाननुसृतो मां पृच्छसि ततोऽहमभिधास्यामि । सीता रावणेन हृता । अधुना लंकायां वर्तते । इतः समीपे पंपानाम सरोऽस्ति तत्समीपे ऋष्यमूकनामा महानगो वर्तते । तत्र चतुर्भिर्मंत्रिभिः सार्धमतुलविक्रमो वानराधिपः सुग्रीवस्तिष्ठति । तेन सह सख्यं कुरु । स तव सर्वं कार्यं संपादयिष्यति । भो रघुनंदन मुहूर्तं तिष्ठ । तवाग्रेऽहमग्निं प्रवेक्ष्यामि । कलेवरं दग्ध्वा तव परं पदं यास्यामि । इति रामं समामंत्र्य हुताशनं प्रविश्य सा शबरी दुर्लभं मोक्षं प्राप ॥

किं दुर्लभं जगन्नाथे श्रीरामे भक्तवत्सले ॥
प्रसन्नेऽधमजन्मापि शबरी मुक्तिमाप सा ॥ १ ॥

इति ग० रा० अर० कां० दशमः सर्गः ॥ १० ॥

## इत्यरण्यकांडः समाप्तः

# अथ किष्किंधाकांडप्रारंभः

श्रीमहादेव उवाच । ततः सलक्ष्मणो रामः शनैः पंपातटं प्राप । तत्क्रोशमात्रसुविस्तीर्णमगाधामलशंबरं सरस्तां श्रेष्ठमुत्फुलांबुजकल्हारमंडितं हंसकारंडवाकीर्णं चक्रवाकादिशोभितं जलकुक्कुटकोयष्टिकक्रौंचनादोपनादितं नानापुष्पलताकीर्णं फलपादपसमावृतं सज्जनमनःस्वच्छजलं दृष्ट्वा रामो विस्मयमाययौ । तत्र स्नात्वा श्रमहरमुदकं पीत्वा सुच्छायेन पथा सानुजः प्रभुरग्रे ययौ । अथ ऋष्यमूकगिरेः पार्श्वे गच्छंतौ जटावल्कलमंडितौ धनुर्बाणकरौ गिरेः शोभां पश्यंतौ तौ दृष्ट्वा चतुर्भिर्वानरैः सह तत्र वसन्सुग्रीवो भयाच्छिखरमारुरोह हनूमंतमब्रवीच्च सत्वं द्विजाकृतिर्वटुर्भूत्वा गच्छ । भद्रं ते । कौ तौ वीरौ वालिना प्रेषितौ मां हंतुं समुपागतौ वेति ताभ्यां संभाषणं कृत्वा तयोर्हृदयं जानीहि । यदि तौ दुष्टहृदयौ स्तस्तर्हि कराग्रतो मां पलायनार्थं संज्ञां कुरु । एवं संकेतं जानीहि । तथेति हनुमान् बटुरूपेण रामचंद्रं समुपागतो विनयावनतो भूत्वाब्रवीत् स्वप्रभया सर्वा दिशो द्योतयंतौ भास्कराविव युवानौ कौ युवां पुरुषव्याघ्रौ ? नरनारायणाविव स्वतंत्रौ लोके चरंतौ युवामीश्वरौ भूभारहरणार्थाय भक्तानां पालनायच मायया मानुषाकारौ जाताविति मे भाति ॥

श्रीरामो लक्ष्मणं प्राह बटुरूपिणमेनं पश्य । अनेन शब्दशास्त्रमशेषेण ज्ञायते यतोऽस्य कृत्स्ने भाषिते नैकमप्यपशब्दं शृण्वः । ततो हनुमंतमुवाच अहं दाशरथी रामः । अयं ममानुजो लक्ष्मणः । पितुर्वचनगौरवान्मया वनवासः स्वीकृतः । गौतमीतटे पंचवट्याश्रमे स्थिता मम भार्या सीता केनचिद्राक्षसा नीता । तामन्वेष्टुमावामिहायातौ । त्वं को वा केन प्रेषितोऽसि वद ॥

बटुरुवाच । सुग्रीवोनाम वानराणां राजा वालिनः कनीयान्भ्राता वर्तते । तेन पापचेतसा वालिना तस्य भार्यामपहृत्य निष्कासितः स तद्भयादमुमृष्यमूकगिरिमाश्रित्य चतुर्भिर्मंत्रिभिः सार्धमत्र तिष्ठति । तस्य सचिवोऽहं वायुपुत्रोऽजनीगर्भसंभवो हनुमान्नाम । रघूत्तम सुग्रीवेण त्वया सख्यं युक्तं । स तव भार्यापहारिणं हंतुं सहायो भविष्यति । यदि ते रोचते तदा गच्छेदानीमेव तं सुग्रीवं द्रष्टुं गच्छामः । श्रीराम उवाच । कपीश्वर अहमपि तेन सख्यं

कर्तुमागतः ।.सख्युस्तस्य यत्कार्यं तदपि करिष्यामि न संशयः ॥

अथ हनूमान्स्वरूपेण स्थितो राममब्रवीन्मम स्कंधावारोहतं । पर्वतोपरि यत्र सुग्रीवस्तिष्ठति तत्र वां नेष्यामि । तथेत्युक्त्वा स्कंधारूढौ रामलक्ष्मणौ गृहीत्वा स महाकपिः क्षणादेव गिरिमूर्ध्न्युत्पपात । तत्र वृक्षच्छायायामुभौ स्थापयित्वा सुग्रीवमुपागम्य कृतांजलिरुवाच राजन्स्तत्र भयं व्येतु । तौ वीरौ रामलक्ष्मणौ मयानीतौ । शीघ्रमुत्तिष्ठ रामेण तव सख्यं मया योजितं तदग्निं साक्षिणमारोप्य द्रुतं कुरु । ततः सुग्रीवोऽतिहर्षाद्राघवं समागम्य वृक्षशाखां स्वयं छित्वा तस्मै विष्टराय ददौ । महता हर्षेणाविष्टाः सर्वेऽवतस्थिरे । अथ लक्ष्मणः सर्वं रामवृत्तांतमादितोऽब्रवीत् । तं श्रुत्वा सुग्रीव उवाच । राजेंद्र सीतायाः परिमार्गणं तव शत्रुवधे साहाय्यं चाहं करिष्ये । मया किंचिद्दृष्टं तत्ते कथयामि शृणु । एकदा मंत्रिभिःसार्धं मयि गिरिमूर्धनि स्थिते केनचिद्विहायसा नीयमाना प्रमदोत्तमा राम रामेति क्रोशंत्यस्मान्पर्वतोपरि दृष्ट्वाभरणान्यामुच्योत्तरीयखंडे बद्ध्वाधोऽक्षिपत् । सा रक्षसा नीता । अहं तानि भूषणान्याशु गृहीत्वा गुहायामक्षिपं । त्वमिदानीं तानि दृष्ट्वा तव भार्यायाः संति न वेति जानीहि । इत्युक्त्वा वानरेंद्रस्तान्यानीय रामाय दर्शयामास । स तद्वासःखंडं विमुच्य भूषणानि दृष्ट्वा हृदि निक्षिप्य हा सीतेति मुहुर्मुहुः प्राकृतवद्रुरोद । तमाश्वास्य लक्ष्मणोऽब्रवीत् भ्रातर्वानरेंद्रसाहाय्येन त्वया जानक्यचिरेणैव प्रास्यते । सुग्रीवोऽप्याह हे राम प्रतिज्ञां करवाणि । समरे रावणं हत्वा ते जानकीं दास्यामि । ततो हनूमानग्निं प्रज्वाल्य सख्यं कुरुतमित्युवाच । रामसुग्रीवावग्नौ साक्षिणि तिष्ठति बाहू प्रसार्य परस्परमालिंग्योभावपि " आवां सखायौ " इत्यवदतां । ततः सुग्रीवो रामसमीपे समुपविश्य सखे पुरा वालिना यत्कृतं तच्छ्रृण्वित्युक्त्वा स्वोदंतं कथयामास ॥

सुग्रीव उवाच । नाम्ना मायावीति परमदुर्मदो मयपुत्र एकदा किष्किंधां समुपागत्य महता सिंहनादेन वालिनं युद्धाय समुपाह्वयत् । वाली तु तदसहमानः क्रोधताम्राक्षो निर्गत्य दृढमुष्टिना तं जघान । तेन संविग्नो मायावी दुद्राव । वाली तमनुदुद्राव तथाहमपि तमनुगतः । मायाविनं गुहां प्रविष्टमालोक्य वाली मामब्रवीत्त्वं बहिस्तिष्ठ । अहं गुहायां गच्छामीत्युक्त्वा। गुहाविष्टः स एकं मासं न निर्ययौ । मासादूर्ध्वं गुहाद्वाराद्बहु रुधिरं निर्गतं - तद्दृष्ट्वा वाली मृत इति मत्वातिदुःखितोऽहं गुहाद्वारि शिलां निधाय गृहमागतः । गुहायां वाली रक्षसा हत इति श्रुत्वा दुःखिताः सर्वे वानरमंत्रिणोऽनि-

च्छंतमपि मां राज्येऽभिषेचनं चक्रुः । कंचित्कालं मया राज्यं शिष्टं । ततो वाली समागतः । स रुषा मां निरभर्त्सयन्मुष्टिभिरताडयच्च । अहं परया भिया धावंन्नगरान्निर्गत्य सर्वांल्लोकान्परिक्रम्य ऋष्यमूकं समाश्रितः । ऋषेः शापभयाद्वालीमं गिरिं नायाति । तदहान्मम भार्यां स विमूढधीः स्वयं भुंक्ते अतोऽहं दुःखेन संतप्तो हृतदारो हृताश्रयो भवत्पादसंस्पर्शादद्य सुखितोऽस्मि॥

एवं मित्रवृत्तातं श्रुत्वा तस्य दुःखेन संतप्तो रामस्तव द्विषं भार्यापहारिणं शीघ्रं हनिष्यामीति सुग्रीवस्य पुरस्तदा प्रतिज्ञामकरोत् । सुग्रीवोऽप्याह राजेंद्र वाली बलवतां बली । देवैरपि दुरासदं तं भवान्कथं हनिष्यति । तस्य बलं कथयामि शृणु । कदाचिद्दुंदुभिर्नाम महाकायो महाबलो महिषरूपधृग्भीषणो राक्षसो रात्रौ किष्किंधामागत्य वालिनं युद्धाय समाव्हयत् । तदमर्षणः परमकोपनो वाली महिषं शृंगयोर्धृत्वा भूतले पातयामास । एकेन पादेन तत्कायमाक्रम्य ग्रीवातःशिर उत्पाट्य हस्ताभ्यां तोलयित्वा भुव्यक्षिपत् । क्षेपवेगेन भुव ऊर्ध्वं योजनमात्रं गत्वा ततस्तच्छिरो मातंगाश्रमसन्निधौ पपात । आश्रमे तद्रक्तवृष्टिर्बभूव । तां दृष्ट्वा क्रुद्धः स मुनिर्वालिनं प्राहेतःपरं यदि मम गिरिमागंतासि भग्नशिरा मरिष्यसि । एवं शप्तस्तदारभ्य ऋष्यमूकं नायाति । एतज्ज्ञात्वा भयवर्जितोऽहमत्र वसामि । राम दुंदुभेः पर्वतोपमं शिरः पश्य । यदि बाणेन तद्दूरं क्षेप्स्यसि तत्त्वं वालिवधेऽपि शक्तोऽसीति मन्ये । इत्युक्त्वा तद्गिरिसन्निभं शिरो दर्शयामास । रामः स्मितं कृत्वा पादांगुष्ठेन तद्दशयोजनादूर्ध्वमक्षिपत् । सुग्रीवो मंत्रिभिःसह साधुसाध्विति संस्तुत्य पुनराह रघूत्तम एतान्महासारान्सप्त तालान्पश्य । वाल्येकैकं बाहुभ्यां चालयित्वा निष्पत्रं कुरुते । यदि त्वमेकेन बाणेनैतान्सप्त तालान्विध्यसि ततस्त्वं वालिनमपि हनिष्यसीति मे मनः प्रत्येष्यति । रामस्तथेति धनुरादाय तत्र सायकं संदधे । स बाणस्तांस्तालान्गिरिं भूमिंच विनिर्भिद्य पुनरागत्य पूर्ववत्तूणीरे स्थितः । ततोऽतिविस्मितः सुग्रीवो राममाह देव त्वं जगतां नाथः परमात्मासि न संशयः । मम पूर्वकृतपुण्यैविरद्य संगतं मोक्षसचिवं त्वां प्राप्य दारादिकं कथं प्रार्थये । देव देव राज्यादिकं किंचिदन्यन्नाकांक्षामि । मदर्थं यतमानेन निधानमिव भाग्यगौरवादानंदानुभवं प्राप्तोऽस्मि । स्वपादभक्तिमादिश्य मां पाहि ।

इति रा० रा० कि० कां० प्रथमः सर्गः ॥ १ ॥

---

श्रीमहादेव उवाच । सुग्रीववचनं श्रुत्वा श्रीरामः सस्मितं वाक्यमब्रवीत् । सखे यत्त्वयोक्तं तत्सत्यं न संशयः । किंतु मम लोकापवादो भविष्यति । रघुनंदनः कपींद्रेणाग्निसाक्षिकं सख्यं कृत्वा किं कृतवानिति जना वदिष्यंति । तस्माद्गत्वा वालिनं युद्धायाव्हय । एकेन बाणेन तं हत्वा त्वां राज्येऽभिषेक्ष्यामि । तथेति सुग्रीवः किष्किंधोपवनं द्रुतं गत्वा महानादं कृत्वा वालिनं युद्धायाहूतवान् । स भ्रातृनिनदं श्रुत्वा रोषताम्रविलोचनो गृहाच्छीघ्रं निर्जगाम । तमापतंतं सुग्रीवो वक्षस्यताडयत् । वाली तं मुष्टिभ्यां जघान । एवं क्रुद्धौ तौ परस्परमयुद्धयेतां । तावेकरूपौ दृष्ट्वातिविस्मितो रामः सुग्रीववधभीत्या तदा बाणं न मुमोच । सुग्रीवो रुधिरं वमन्भयाकुलो दुद्राव । वाली स्वभवनं यातः । सुग्रीवो रामसमीपमागत्याब्रवीद्विभो मां शत्रुणा किं घातयसे ? यदि मद्धनने तव वांछास्ति त्वमेव मां जहि । सत्यवादिन् रघूत्तम विश्वासमुत्पाद्य शरणागतं मां किमर्थमुपेक्षसे ? सुग्रीववचनं श्रुत्वा रामः साश्रुविलोचनस्तमालिंग्याब्रवीन्माभैषीः । युवामेकरूपिणौ दृष्ट्वा मित्रघातित्वमाशंक्याहं सायकं न मुक्तवान् । इदानीं भ्रमशांतये ते चिन्हं करिष्ये । पुनर्गत्वा वालिनमाव्हय । रामोऽहं तव रिपुं क्षणाद्धनिष्यामि । इति तमाश्वास्य लक्ष्मणमब्रवीत्सुग्रीवस्य गले पुष्पमालामाक्षिप्य तं वालिनं प्रति प्रेषयस्व । लक्ष्मणस्तस्य गले स्रजं बद्ध्वा सादरं प्रेषयामास ॥

स पुनरद्भुतं शब्दं कृत्वा वालिनमाव्हयत् । तच्छ्रुत्वातिविस्मितः क्रोधावृतो वाली परिकरं बद्ध्वा गमनायोपचक्रमे । गच्छंतं तं तारा निषिषेध । इदानीं त्वया न गंतव्यं । तव कुशले मे मनः संशेते । इदानीमेव त्वया भग्नो रिपुः सत्वरं पुनरायाति तस्मान्नूनं तस्य कश्चिद्बलवान्सहायः समुपागतः । वाली तामाह सुभ्रु तव शंका व्येतु । प्रिये रिपुं शीघ्रं हत्वा समायास्यामि । तस्य कः सहायो भवेत् ? यदि ससहायोऽस्ति स तत उभौ हनिष्यामि मा शुचः । आव्हयमानं रिपुं ज्ञात्वा शूरः कथं गृहे तिष्ठेत् ? तारोवाच । राजेंद्र मत्तोऽन्यच्छृणु ततो यथोचितं कुरु । पुत्रोंऽगदो मृगयायां श्रुतं वचो मामाह श्रीमानयोध्यापतिर्दाशरथी रामो रावणेन नीतां स्वभार्यां मार्गमाणो भ्रात्रा लक्ष्मणेनर्ष्यमूकाद्रिमागत्य सुग्रीवेण समागम्य तेनाग्निसाक्षिकं सख्यं च कृत्वा तव हनने तस्य राज्याभिषेचने च प्रतिज्ञां कृतवान् । तस्मान्मम वचो निश्चितं शृणु । इदानीमेव भग्नः कथं पुनरुपागतस्ते भ्राता ? अतस्त्वं सर्वथा वैरं त्यक्त्वा सुग्रीवमानीय यौवराज्येऽभिषिच्य रामं शरणं व्रज । हरिपुंगव

मामंगदं राज्यं कुलं च पाहि । इत्युक्त्वा साश्रुमुखी पादयोः प्रणिपत्य तारा रुरोद । तामालिंग्य वाली सस्नेहमिदमब्रवीत् प्रिये स्त्रीस्वभावात्त्वं बिभेषि परं मम भयं नास्ति । यदि रामः समायातस्तेन सह मम स्नेहो भविष्यति । रामः साक्षान्नारायणो भूभारहरणार्थाय जात इति पूर्वमेव मया श्रुतं । तस्य स्वपक्षः परपक्षो वा नास्ति । स भक्तिगम्यो भजतोऽनुभजति । तच्चरणांबुजं नत्वा तं गृहमानेष्यामि । सुग्रीवो यद्येकाकी समायाति तं क्षणार्धाद्धन्मि । यौवराज्ये सुग्रीवस्याभिषेचनं यत्त्वयोक्तं तत्कथं कुर्यां ? रिपुणा युद्धायाहूयमानः सर्वलोकसंमतः शूरो वाली भीतभीतमिदं वाक्यं कथं वदेत् ? तस्माच्छोकं परित्यज्य वेश्मनि तिष्ठ । इति शोचंतीं तारामाश्वास्य वाली सुग्रीवस्य वधाय समुद्युक्तो ययौ । तमायांतं दृष्ट्वा गले बद्धपुष्पमालः सुग्रीवः पतंगवत्संमुख उत्पपात । वाली तं मुष्टिभ्यां ताडयामास । सुग्रीवो रामं विलोकयन्नेव युयुधे । एवं युद्ध्यमानौ तौ दृष्ट्वा रामस्तूणीराद्बाणमादाय धनुषि संधाय वृक्षखंडांतरितदेहो भूत्वा वालिनं सम्यङ् निरीक्ष्य तद्धृदयं लक्ष्यं कृत्वाकर्णं धनुराकृष्य सायकमुत्ससर्ज । तेन भिन्नवक्षा मुहूर्तं निःसंज्ञो भूत्वा पुनश्चेतनापन्नो वाली वामेन हस्तेन धनुरालंब्य दक्षिणेन सायकं बिभ्राणं सुग्रीवलक्ष्मणाभ्यां पार्श्वयोः परिसेवितं पीनचार्वायतभुजं राममग्रे स्थितं ददर्श । अथ तं विगर्हयन् शनकैः प्राह राम मया तव किमपकृतं येन हतोऽस्मि । वृक्षखंडे तिरोभूय मयि सायकं त्यजता त्वया राजधर्ममविज्ञाय विगर्हितं कर्म कृतं । चोरवत्कृतसंगरो यशः कथं लप्स्यसे ? यदि ते क्षत्रियदायादत्वादभिमानस्तदा मया समक्षं युद्धं कृत्वा तत्फलं यशो वा मरणं किं न प्राप्नोः ? सुग्रीवेण तव किं कृतं वा मया किं न कृतं ? राम रावणेन तव भार्या नीता तदर्थं त्वं सुग्रीवं शरणं यात इति शुश्रुम बत लोकविश्रुतं मद्बलं नजानीषे । यदीच्छामि रावणं सकुलं ससीतं मुहूर्तार्धादानयामि । रघुनंदन त्वं लोके धार्मिक इति कत्थ्यसे । वानरं व्याधवद्धत्वा कां धर्मकृतां कीर्तिं प्राप्स्यासि ? वानरमांसमभक्ष्यं । मां हत्वा किं करिष्यासि ? ॥

एवं बहुभाषमाणं वालिनं रामोऽब्रवीदहं धर्मस्य गोप्ता लोके सशरासनश्चरामि । अधर्मकारिणं हत्वा सद्धर्मं पालयामि । दुहिता भगिनी भ्रातुर्भार्या तथा स्नुषा एताः सर्वाः समाः । तासां मध्ये यो विमूढधीरेकायां रमते स पातकी ज्ञेयः । अतः स राजभिः सदा वध्यः । त्वं तु कनिष्ठभ्रातुर्भार्यया बलात्क्रमसेऽतो मया हतोऽसि । तच्छ्रुत्वा भयसंत्रस्तो राममीश्वरं ज्ञात्वा रभ-

सत्प्रणम्य वाल्यब्रवीत् । राम राम महाभाग अजानता मया यत्किंचिदुक्तं तत्क्षंतुमर्हसि । रावणस्य वधार्थाय जातं त्वां परं पुरुषं जानामि । यस्य दर्शनं महायोगिदुर्लभं स त्वं मुमूर्षोर्मे पुरः साक्षात्स्थितः । मम भाग्यं केन वर्ण्यते ? त्वत्पदगमनाय मामनुजानीहि । मम तुल्यबले बालेऽगदे दयां कुरु । राम मम हृदयं विशल्यं कुरु । तथेति बाणमुद्धृत्य रामस्तं पाणिना पस्पर्श । तदा वानरदेहं त्यक्त्वा वाली क्षणादमरेंद्रोऽभवत् ॥

वाली रघूत्तमशराभिहतो विमृष्टो ॥
रामेण शीतलकरेण सुखाकरेण ॥
सद्यो विमुच्य कपिदेहमनन्यलभ्यं ॥
प्राप्तः परं परमहंसगणैर्दुरापम् ॥ १ ॥

इति ग० रा० कि० कां० द्वितीयः सर्गः ॥ २ ॥

श्रीमहादेव उवाच । वालिनि रणे निहते सर्वे वानरा भयविव्हलाः किष्किंधां दुद्रुवुस्तारामूचुश्च महाभागेऽगदं परिरक्ष । नगरादिरक्षार्थं मंत्रिणः परिणुद । चतुर्द्वारकपाटादीन्बद्ध्वा वयं पुरीं रक्षामः । अंगदं वानरराजं कुरु । वालिनिधनं श्रुत्वा तारा शोकविमूर्छिता शिरो वक्षश्च भूरिशोऽताडयत् । किमंगदेन राज्येन नगरेण धनेन वा । इदानीमेव पत्यासह निधनं यास्यामीत्युक्त्वा रुदती मुक्तमूर्धजा यत्र भर्तृकलेवरं तत्र त्वरिता ययौ । रक्तैः पांसुभिरावृतं पतितं पतिं दृष्ट्वा तस्य पादयोः पतिता नाथनाथेति विलपंती रघुनंदनं दृष्ट्वोवाच । राम मां बाणेन जहि पतिसालोक्यं गच्छामि । मां विना स्वर्गेऽपि तस्य सुखं नैव भवेत् । पत्नीवियोगजं दुःखं त्वयानुभूतं । वालिने मामाशु प्रयच्छ, पत्नीदानफलं ते भवेत् । सुग्रीव वालिघातिना दत्तं राज्यं त्वं रुमयासह सुखं भुंक्ष्व । एवं विलपंतीं तां महामना रामस्तत्वज्ञानोपदेशतः सांत्वयामास । तेन सा स्वस्थचित्ताभवत् । अथ रामः सुग्रीवमाह भ्रातुर्यत्सांप्रदायिकं युक्तं तन्ममाज्ञया पुत्रेणांगदेन कारय । स तथेति बलिभिर्वानरैर्वालिनमुत्थाप्य पुष्पके विमाने क्षिप्त्वा सर्वराजोपचारैर्भेरीदुंदुभिनिर्घोषैःपौरैर्वानरैस्तारयांगदेन च सह गत्वा तत्सर्वं यथाशास्त्रं प्रयत्नतश्चकार । अथ स्नात्वा मंत्रिभिः सह रामस्य समीपं गत्वा तस्य चरणौ धृत्वा प्राह राजेंद्र इदं वान-

राणां समृद्धिमद्राज्यं प्रशाधि । अहं तव दासो लक्ष्मणवत्पादपद्मं सेवे। इ-
त्युक्तो राघवः सुग्रीवं सस्मितं वचोऽब्रवीत्सखे त्वं मे प्राणप्रियः । ममाज्ञया
शीघ्रं गत्वा त्वमात्मानं पुरराज्याधिपत्येऽभिषेचय । अंगदं यौवराज्ये सादरम-
भिषेचय । लक्ष्मणस्तव पत्तनमागमिष्यति । अहं चतुर्दश समा नगरं न प्र-
वेक्ष्यामि । वर्षादिवसान्समीपे पर्वताशिखरे वत्स्यामि । त्वं वर्षतौ पुरे स्थित्वा
ततः सीतायाः परिमार्गणे यत्नवान्भव । तदा सुग्रीवः साष्टांगं प्रणिपत्याह
देव यथाज्ञापयसे तथैव करोमि । इत्युक्त्वा लक्ष्मणेन सह गत्वा तथाकरोत् ।
अथ सुग्रीवेण यथान्यायं पूजितो लक्ष्मणः शीघ्रमागत्य रामं प्रणिपत्योपतस्थि-
वान् । ततस्तावुभौ प्रवर्षणगिरेरूर्ध्वशिखरं जग्मतुः । तत्रैकं वर्षवातातपसहं
फलमूलसमीपगं स्फाटिकं शुभं गव्हरं दृष्ट्वा तस्मिन्रामो वर्षकालं निनाय ॥

**दिव्यमूलफलपुष्पसंयुते मौक्तिकोपमजलौघपल्वले**
**चित्रवर्णमृगपक्षिशोभिते पर्वते रघुकुलोत्तमोऽवसत् १**

इति रा० रा० कि० कां० तृतीयः सर्गः ॥ ३ ॥

---

श्रीमहादेव उवाच । तस्मिन्पर्वते मणिगुहासु लीलया संचरन्पक्वफ-
लमूलभोगतोषितः श्रीरामो लक्ष्मणेनसहितो वार्षिकदिनानि सुखमवसत् ।
आहितसुकांचनकक्ष्याणि गजयूथानीवांतःस्तनितान्वैद्युतगर्भान्वातनुन्नजलपूरित-
मेघान्दृष्ट्वा स विस्मयमगात् । नवघासं भक्षयित्वा हृष्टपुष्टा मृगाः परितो धा-
वंतो रामं वीक्ष्य विस्फारितेक्षणा ध्यानानिष्ठा मुनीश्वरा इवातिष्ठन् । गिरिका-
ननभूमिषु संचरंतं रामं मानुषरूपं परमात्मानं ज्ञात्वा सिद्धगणा मृगपक्षिसंघा
भूत्वा तमेवानुसिषेविरे । अथैकदा सौमित्रिः प्रणयाद्विनयान्वितो राममब्रवीद्दे-
व पूर्वोक्तात्तव वाक्यान्मम हृदि स्थितोऽविद्यासंभूतः संशयो गतः । इदानीं
लौकिकपुष्पादिभिः पूजारूपेण योगिनो भवदाराधनं कथं कुर्वंति तच्छ्रोतुमि-
च्छामि । तल्लोकोपकारकं तव भक्ताय मे ब्रूहि । एवं पृष्टः प्रसन्नः परमात्मा
स्वपूजाविधानं विस्तरतः कथयामास । अथ पुनर्मायामालंब्य प्राकृतवद्दुःखितो
रामो हा सीतेति रुदन्निद्रां नैव लेभे । एतस्मिन्नंतरे तत्र किष्किंधायां सुबु-
द्धिमान्हनूमान्कपिनायकं सुग्रीवमेकांते प्राह राजस्तवैवोत्तमं हितं प्रवक्ष्यामि
शृणु । पूर्वं रामेणानुत्तमोपकारः कृतः स तु त्वया कृतघ्नवद्विस्मृत इति मे प्र-

तिभाति । त्रैलोक्यसंमतो वीरस्त्वत्कृते निहतः । त्वं राज्यं प्रतिष्ठापितः सुदुर्लभां तारां लेभिषे । रामः पर्वताग्रे भ्रात्रासह वसन्कार्यगौरवात्त्वागमनमेकांतमीक्षते । त्वं तु स्त्रीसक्तो नावबुद्ध्यसे । सीतायाः परिमार्गणं करोमीति प्रतिज्ञाय न करोषि । कृतघ्नस्त्वं वालिवद्द्रुतं हन्यसे । हनूमद्वचनं श्रुत्वा भयविव्हलः सुग्रीवस्तं प्रत्युवाच । सखे त्वयोदितं सत्यं । सप्तद्वीपगतान्सर्वान्वानरानानेतुं तरस्विनां वानराणां दशसहस्राणि ममाज्ञयेदानीमाशु दश दिशः प्रेषय । सर्वे वानरपुंगवाः पक्षमध्ये समायांतु । ये पक्षमतिवर्तंते ते मे वध्या न संशयः । इत्याज्ञप्तो मंत्रिसत्तमो हनूमांस्तत्क्षणे हरीन्सर्वतः प्रेषयामास ॥

अगणितगुणसत्वान्वायुवेगप्रचारान् ॥
बनचरगणमुख्यान्पर्वताकाररूपान् ॥
पवनहितकुमारः प्रेषयामास दूता ॥
नतिरभसतरात्मा दानमानादितृप्तान् ॥ १

इति ग० रा० कि० कां० चतुर्थः सर्गः ॥ ४ ॥

---

श्रीमहादेव उवाच । रामस्तु पर्वतस्याग्रे मणिसानौ स्थितो निशामुखे सीताविरहजं दुःखमसहमानोऽब्रवील्लक्ष्मण पश्य मम प्रिया राक्षसेन बलान्नीता । सा मृतामृता वाद्यापि निश्चेतुं न शक्नोमि । यः कश्चिदपि सा जीवतीति ब्रूयात्स मे प्रियकृत् । यदि तां साध्वीं यत्रकुत्रापि जीवंतीं जानामि तर्हि पयोनिधेः सुधामिव तां हठादेवानेष्यामि । भ्रातर्मम प्रतिज्ञां शृणु । येन जनकात्मजा नीता तं सकुलं भस्मसात्कुर्यां । हा सीते चंद्रवदने मामपश्यंती दुःखार्ता राक्षसालये वसंती प्राणान्कथं धारयसि । चंद्राननां विना मम चंद्रमा भानुवद्भाति । सोम मे वल्लभां स्पृष्ट्वा तैः शीतलैः सुधांशुभिर्मां स्पृश । सुग्रीवोऽपि दयाहीनो जातो मां दुःखितं न पश्यति । निष्कंटकं राज्यं प्राप्य कृतघ्नोऽभवत् । शरदं पश्यन्नपि मम प्रियां मार्गयितुं नायाति । कृतघ्नं तं सपुरं सबांधवं हन्मि । पुरा यथा वाली हतस्तथाद्यासौ भवेत् । इति राघवं रुष्टं समालोक्य लक्ष्मणोऽब्रवीत् राम मामाज्ञापय, इदानीमेव गत्वा दुष्टमानसं तं हत्वा तवांतिकमायास्यामि । इत्युक्त्वा खड्गमादाय गंतुमभ्युद्यतं लक्ष्मणं वीक्ष्य रामोऽब्रवीद्वत्स सुग्रीवो मम प्रियः सखा । स त्वया न हंतव्यः । वा-

लिवस्त्वमपि न हनिष्यसे किमित्युक्त्वा तं भीषय । तस्योत्तरमादायात्रागत्य मां श्रावय । तच्छ्रुत्वा पश्चाद्यत्कार्यं तत्करिष्यामि । तथेति भीमविक्रमो लक्ष्मणो वानरान्कोपेन निर्दहन्निव किष्किंधां त्वरितमगच्छत् । नगरांतिकं गत्वा तीव्रं ज्याघोषमकरोत् । तं चापपाणिं दृष्ट्वा सर्वे प्राकृता वानरा धृतपाषाणपादपा वप्रमूर्धनि स्थिताः किलकिलाशब्दं चक्रुः । लक्ष्मणमागतं ज्ञात्वा मंत्रिसत्तमोऽगदः शीघ्रं समापत्य सर्वान्वानरान्निवार्य लक्ष्मणसामीप्यं प्राप्य दंडवत्प्रणनाम । ततोऽगदं परिष्वज्य लक्ष्मण उवाच । वत्स गच्छ रौद्रमूर्तिना राघवेण चोदितमागतं मां पितृव्याय निवेदय । तथेति त्वरितं गत्वा स सुग्रीवाय न्यवेदयल्लक्ष्मणः क्रोधताम्राक्षः पुरद्वारे स्थितः ॥

तच्छ्रुत्वातीवसंत्रस्तो वानरेश्वरो मंत्रिश्रेष्ठं हनूमंतमाहूयाब्रवीत्त्वमंगदेन सह गच्छ । विनयान्वितः कोपितं वीरं सांत्वयञ्छनैर्मंदिरमानय । हनूमंतं प्रेषयित्वा तारामाह लक्ष्मणं गत्वा तं मृदुभाषितैः शांतकोपं कृत्वा ततोऽतः पुरं नीत्वा मां दर्शय । भवत्विति भाषमाणा तारा ततो मध्यकक्ष्यां समाविशत् । अगदेन सहितो हनुमाँल्लक्ष्मणांतिकं गत्वा प्रणम्य स्वागतमब्रवीत् । महाभाग भवद्गृहमेहि, राजदारादीन्दृष्ट्वा सुग्रीवं यदाज्ञापयसे तत्सर्वं करवाणीत्युक्त्वा लक्ष्मणं करे गृहीत्वा नगरमध्याद्राजगृहमानयामास । तत्र समंततो यूथपानां महासौधान्पश्यँल्लक्ष्मणो राजभवनं जगाम । मध्यकक्ष्यागता ताराधिपानना स्मितपूर्वाभिभाषिणी तारा लक्ष्मणं नत्वोवाच याहि देवर भद्रं ते । त्वं साधुर्भक्तवत्सलो भक्ते भृत्ये कपीश्वरे किमर्थं कोपमकार्षीः ? बहुकालं दुःखमनुभूतवान्भवत्प्रसादात्प्राप्तसौख्यः कामासक्तो भूत्वा हरी रघुपतेः सेवार्थं नागत इति न त्वया मंतव्यं । प्रभो नानादेशगतान्महापर्वतसन्निभान्हरीनानेतुं दशसहस्राणि दूताः प्रेषिताः । वानरयूथपैः सह सुग्रीवः स्वयमागत्य दैत्यौघान्वधिष्यति रावणं च हनिष्यति । त्वयासहाद्यैव स आगमिष्यति । अंतर्भवनं प्रविश्य पुत्रदारसुहृद्वृतं सुग्रीवं दृष्ट्वाभयं दत्वा स्वयमेव तं नय । इति तारावचः श्रुत्वा कृशक्रोधो लक्ष्मणोऽतः पुरं जगाम । तत्र सुग्रीवं दृष्ट्वा प्राह दुर्वृत्त रघूत्तमं विस्मृतवानसि । येन बाणेन वाली हतः स बाणोऽद्य त्वां प्रतीक्षते । मया हतस्त्वं वालिनो मार्गं गमिष्यसि । एवमत्यंतं परुषं वदंतं लक्ष्मणं मारुतिरुवाच वीर कथमेवं प्रभाषसे । रामस्यायं भक्तस्त्वत्तोऽधिकतरः । रामकार्यार्थमनिशं जागर्ति । प्रभो कोटिशो वानरा आगताः परितः पश्य । सीतायाः परिमार्गणार्थं तेऽचिरेणैव गमिष्यंति । सुग्रीवो राम-

कार्यमशेषेण साधयिष्यति । हनुमतो वाक्यं श्रुत्वा लक्ष्मणो लज्जितोऽभवत् । सुग्रीवोऽप्यर्घ्यपाद्याद्यैस्तं संप्रापूजयदालिंग्य च प्राह अहं रामस्य दासस्तेन रक्षितः । रामः स्वतेजसाखिलाँल्लोकान्क्षणार्धेन जेष्यति । वानरैः सहाहं सहायमात्रं भविता । सौमित्रिरपि तं प्राह महाभाग यत्किंचिन्मयोदितं तत्क्षमस्व । एहि अद्यैव गच्छावः । जानकीविरहादतिदुःखार्तो रामः कानन एक एव तिष्ठति । तथेति लक्ष्मणेन सह रथमारुह्यांगदनलनीलहनुमत्प्रधानैर्बह्वृक्षवानरैः समावृतः कपिराड्राममन्वपद्यत ॥

भेरीमृदंगैर्बहुऋक्षवानरैः ॥
श्वेतातपत्रैर्व्यजनैश्च शोभितः ॥
नीलांगदाद्यैर्हनुमत्प्रधानैः ॥
समावृतो राघवमभ्यगाद्धरिः ॥ १ ॥

इति ग० रा० कि० कां० पंचमः सर्गः ॥ ५ ॥

---

श्रीमहादेव उवाच । गुहाद्वारे शिलातले समासीनं चैलाजिनधरं जटामुकुटमंडितं सीताविरहसंतप्तं मृगपक्षिणः पश्यंतं रामं दूराद्दृष्ट्वा सुग्रीवलक्ष्मणौ रथात्समुत्पत्य तस्य पादयोरग्रे पेततुः । रामः सुग्रीवमालिंग्यानामयं पृष्ट्वांतिके स्थापयित्वा यथान्यायं पूजयामास । ततः सुग्रीवोऽब्रवीद्देव वानराणां महाचमूमायांतीं पश्य । हिमाचलाद्रिसंभूता नानाद्वीपसरिच्छैलनिवासिनः पर्वतोपमाः कामरूपिणोऽसंख्याता हरयः समायांति । एते सर्वे देवांशसंभूता युद्धविशारदाः संति । प्रभो अत्र केचिद्गजबलाः केचिद्दशगजोपमाः केचिद्गजायुतबलाः केचिदमितबलाश्च वर्तंते । केचिदंजनकूटाभाः केचित्कनकसन्निभाः केचिद्रक्तांगवदनाः केचिच्छुद्धस्फटिकसंकाशा दीर्घवाला राक्षससन्निभा युद्धकांक्षिणो गर्जंतः परितो यांति । राम सर्वे फलमूलाशनास्त्वदाज्ञाकारिणः । एष मे मंत्रिश्रेष्ठ ऋक्षाधिपो जांबवान्नाम वीरः कोटिभल्लूकयूथपः । एष विख्यातो बुद्धिमतां वरो महासत्वपराक्रमो वायुपुत्रो हनुमानतितेजस्वी । तथायं नलो नीलो गवयो गवाक्षो गंधमादनः शरभो मैंदो गजः पनसो वलीमुखः सुषेणस्तारः केसरी च । एते मया प्राधान्येनोदिताः शक्रतुल्यपराक्रमाः प्रत्येकं कोटिकोटिवानरयूथपाः सर्वे तवाज्ञाकारिणः संति । एष युवराजः श्रीमानंग-

दो वालितुल्यबलो राक्षसानामंतकः। एते चान्ये च बहवस्त्वदर्थे जीवितं त्यक्तुमिच्छंतः पर्वताग्रैर्योद्धारः शत्रुपातने निपुणाः सर्वे तव वशवर्तिनः संति। रघुश्रेष्ठैतानाज्ञापय। तानायातान्दृष्ट्वा हर्षपूर्णाश्रुनयनो रामः सुग्रीवमालिंग्य प्राह सखे कार्यगौरवं जानासि। यदि रोचते जानक्या मार्गणार्थं कांश्चिद्योजय। ततः सुग्रीवो बलिनो वानरान्सर्वासु दिक्षु सत्वरं प्रेष्य दक्षिणां दिशं युवराजनलनीलजांबवद्धनूमत्सुषेणशरभमैंदद्विविदान्महाबलान्प्रेषयामास। वानरेश्वरस्तानब्रवीद्भवंतो जानकीं प्रयत्नेन विचिन्वंतु। मच्छासनपुरःसरा मासादर्वाङ् निवर्तध्वं। हे वानराः सीतामदृष्ट्वा यदि वो मासादूर्ध्वं दिनं भवेत्तदा मत्तः प्राणनाशं दंडं प्राप्स्यथ। इति भीमविक्रमान्वानरान्प्रस्थाप्य रामं नत्वा पार्श्वे उपविवेश॥

मारुतिं गच्छंतं दृष्ट्वा रामोऽब्रवीत् कपिसत्तम एतन्मन्नामाक्षरसंयुक्तमभोत्तममंगुलीयकं सीतायायभिज्ञानार्थं रहो दीयतां। अस्मिन्कार्ये त्वमेव प्रमाणं। तव सर्वं सत्वं जानामि। गच्छ तव पंथाः शुभोऽस्तु। एवं सीतायाः परिमार्गणे विसृष्टा अंगदप्रमुखा वानरास्तत्र तत्र बभ्रमुः। अथ सह्यगहने भ्रमंतो मृगान्गजान्भक्षयंतं भीषणाकारं पर्वतोपमं राक्षसं दृष्ट्वा केचिद्वानरा अयं रावण इति मत्वा किलकिलाशब्दं कुर्वंतस्तं मुष्टिभिः क्षणाज्जघ्नुः। ततो नायं रावण इत्युक्त्वा महद्वनं ययुः। तत्र विभ्रमंतस्तृषार्ताः सलिलमविंदंतः शुष्ककंठोष्ठतालुकास्तृणगुल्मावृतं महद्गह्वरं ददृशुः। तत आर्द्रपक्षान्क्रौंचहंसान्निःसृतान्दृष्ट्वा नूनमत्र जलमस्ति, अतः प्रवेष्टव्यमित्युक्त्वा हनुमानग्रे प्रविवेश। सर्वेऽप्युत्सुकाः परस्परं बाहुभिर्बाहून्धृत्वा तमन्वयुः। ते कपीश्वरा अंधकारे बहुदूरं गत्वा मणिनिभतोयाञ्जलाशयान्पक्वफलैर्नम्रान्कल्पद्रुमोपमान्वृक्षान् सर्वगुणोपेतान् मणिवस्त्रादिपूरितान् दिव्यभक्षान्नसहितान् मानुषपरिवर्जितान् गृहांश्च दृष्ट्वा विस्मिता बभूवुः। तत्र एकस्मिन्भवने ते कनकविष्टरे योगमास्थितां चीरवसनां प्रभया दीप्यमानां ध्याननिष्ठामेकां स्त्रियं ददृशुः। सर्वे वानरास्तां महाभागां योगिनीं भक्त्या भीत्या च प्रणेमुः। सा देवी तान्प्राह यूयं किमागताः कुतो वा कस्य दूताः? मत्स्थानं किं प्रधृष्णुथ? तच्छ्रुत्वा हनुमान्सर्वं राघववृत्तांतं कथयित्वा प्राह जानकीं विचिन्वंतो जलकांक्षिणो घोरं गह्वरं प्रविष्टा वयं दैवादत्र समागताः। देवि का त्वं किमर्थमत्रास्थितासि तन्नो वद। योगिनी हृष्टधीः प्राह यथेष्टं फलमूलानि जग्ध्वामृतं पीत्वागच्छत ततः स्ववृत्तांतमादितो वक्ष्यामि। तथेति सर्वे वानरा भुक्त्वा पी-

त्वा हृष्टास्तस्याः समीपं गत्वा बद्धांजलिपुटास्तस्थुः । ततो दिव्यदर्शना सा हनूमंतं प्राह पुरा हेमानाम्नी विश्वकर्मणः पुत्री महेशं नृत्येन तोषयामास । ततस्तुष्टो भगवानिदं दिव्यं पुरं तस्यै प्रददौ । सात्र वर्षाणामयुतायुतं स्थिता । अहं तस्याः सखी विष्णुतत्परा मोक्षकांक्षिणी नाम्ना स्वयंप्रभा गंधर्वतनयास्मि । पुरा ब्रह्मलोकं गच्छंती सा हेमा मामाह त्वमत्र सर्वप्राणिविवर्जिते गव्हरे निवसंती तपश्चर । भगवान्नारायणस्त्रेतायुगे दाशरथिर्भूत्वा कानने विचरिष्यति । तस्य भार्यां मार्गयंतो वानरास्ते गुहामायास्यंति । तान्पूजयित्वा रामं गत्वा प्रयत्नतः स्तुत्वा विष्णुलोकं यास्यसीति । अहं रामचंद्रं त्वरया गंतुमिच्छामि । यूयमक्षीणि निमीलयत ततः क्षणेनैव गुहाया बहिर्गमिष्यथ । तथा कृत्वा ते सर्वे पूर्वस्थितं वनं वेगाद्गताः । सापि गुहां त्यक्त्वा शीघ्रं रामसन्निधिं ययौ । तं प्रदक्षिणं कृत्वा बहुशः प्रणम्य रोमांचिततनुर्हर्षगद्गदया वाचोवाच । राजेंद्र अहं तव दासी दर्शनार्थमिहागता । तव दर्शनार्थं मया बहुवर्षसहस्राणि गुहायां दुश्चरं तपस्तप्तं तदद्य फलितं । राम एतदेव तव रूपं मम हृदये सदा भातु । देव त्वां स्तोतुं कथं जानीयां ? भूयोभूयो नमाम्यहं । यत्र कुत्रापि जातायै मे तव निश्चलां भक्तिं देहि । प्रभो नान्यं वरं वृणे । श्रीराम उवाच एवं भवतु । महाभागे त्वं बदरिकाश्रमं गच्छ । तत्रैव मां स्मरंती पांचभौतिकमिदं कलेवरं त्यक्त्वा परमात्मानमचिरात्प्रतिपत्स्यसे । तदमृतसारकल्पं वचः श्रुत्वा तथेत्युक्त्वा च बदरीवनं गत्वा मनसा रघुपतिं स्मरंती सा देहं त्यक्त्वा परं पदमवाप ॥

श्रुत्वा रघूत्तमवचोऽमृतसारकल्पं ।
गत्वा तदेव बदरीतरुखंडजुष्टं ॥
तीर्थं तदा रघुपतिं मनसा स्मरंती ।
त्यक्त्वा कलेवरमवाप परं पदं सा॥ १॥

इति ग० रा० कि० कां० षष्ठः सर्गः ॥ ६ ॥

---

श्रीमहादेव उवाच । अथ ते वानराः सीतामार्गणे प्रयतमानास्तद्वार्तामलब्ध्वा चिंतयंतो वृक्षखंडेषु समासीना अभूवन् । तत्र कांश्चिदंगद उवाच । गव्हरे भ्रमतामस्माकं मासो गतः । अस्माभिः सीता नाधिगता । रा-

जशासनमकृत्वा यदि किष्किंधां गच्छामः सुग्रीवोऽस्मान्हनिष्यति । विशेषेतः शत्रुसुतं मामनेनैव व्याजेन व्यापादयिष्यति । मयि तस्य कुतः प्रीतिः ? अहं रामेण रक्षितः । इदानीं मया रामकार्यं न कृतं तन्मद्धननं तस्यानुकूलं भवेत् । अतोऽहं तस्य पार्श्वं न गच्छेयं । येन केनापि मृत्युनात्रैव जीवितं त्यक्ष्यामि । इति ब्रुवंतमश्रुनयनं केचिद्वानरपुंगवा व्यथिता अब्रुवन्युवराज किमर्थं तव शोकः ? वयं तव प्राणरक्षका भवामः । अत्र गुहायां सर्वसौभाग्यसहितं पुरं भयवर्जिता निवसामः । एवं शनैः परस्परं वदतां वाक्यं श्रुत्वा नयकोविदो मारुतात्मजोऽगदं समालिंग्य प्रोवाच । सुग्रीवतो वधादिकं किमर्थं विचार्यते ? अयमितरवानरोक्तो दुर्विचारः सर्वथा न युज्यते । त्वं राज्ञोऽत्यंतप्रियः । त्वयि रामस्य लक्ष्मणादधिका प्रीतिः । अतो राघवाद्वा सुग्रीवान्न भीतिः । अहं तव हिते सक्तः । वत्स नान्यं किमपि विचारय । गुहावासो निर्भय इति वानरैरुक्तं, परं किमस्ति रामबाणानामभेद्यं जगत्त्रये ? वयं ते प्राणरक्षका इति च यैरुक्तं ते पुत्रदारादिकं त्यक्त्वा त्वया सह कथं स्थास्यंति ? वत्स अन्यत्किंचिद्गुह्यतमं वक्ष्ये शृणु । रामो न मानुषः । साक्षान्नारायणो रक्षोगणविनाशने मायामानुषभावेन जातः । वयं सर्वे वैकुंठवासिनो विष्णोः पार्षदास्तस्यैव मायया वानररूपेण जाताः । वयं पूर्वं तपसा विष्णुमाराध्य तेनानुगृहीताः पार्षदत्वमुपागता इदानीमपि तस्यै व सेवां कृत्वा पुनर्वैकुंठमासाद्य सुखं स्थास्यामः । इत्यंगदमाश्वास्य सर्वैः सह सह्याचलं गतः । तत्र जानकीं विचिन्वंतस्ते कपींद्रा दक्षिणांबुधेस्तीरे महेंद्राख्यगिरेः पवित्रं पादमाययुः । तत्रागाधं दुष्पारं भीतिवर्धनं समुद्रं दृष्ट्वा भयसंत्रस्ताः सर्वे वानराः किं कुर्म इति वादिनस्तीरे निषेदुरपिच चिंतासमन्विता अन्योन्यं मंत्रयामासुर्वनगुहांतरे भ्रमतां नो मासोऽत्रैव गतः सीता वा रावणो नैव दृष्टः । सुग्रीवस्तीक्ष्णदंडोऽस्मान्निहनिष्यति न संशयः । तस्मात्प्राप्स्यमानवधतोऽस्माकं प्रायोपवेशनं श्रेयः । इति निश्चित्य तत्रैव सर्वतो दर्भानास्तीर्य मरणे कृतनिश्चयास्ते सर्वे उपविविशुः ॥

अथास्मिन्नंतरे महेंद्राद्रिगुहांतरान्निर्गतः कश्चित्पर्वतसन्निभो गृध्रः शनैरागत्य प्रायोपवेशेन स्थितांस्तान्दृष्ट्वोवाच अद्य मया विपुलं भक्ष्यं प्राप्तं । दिने दिने एकैकशः क्रमात्सर्वान्भक्षयामि । तद्भाषितमाकर्ण्य भीतमानसाः सर्वे वानरा विलेपुः । असौ गृध्रः सर्वान्भक्षयिष्यति न संशयः । अस्माभी रामकार्यं किंचिदपि न कृतं सुग्रीवस्य वा हितं न कृतं । अस्मादृथा वधं प्राप्ता

यमसदनं गच्छामः । अहो जटायुर्धर्मात्मा रामस्यार्थे मृतो योगिनामपि दुरापं मोक्षं प्राप । तद्वानरभाषितं । श्रुत्वा स गृध्रस्तानब्रवीत्प्लवगसत्तमा जटायुरिति मम भ्रातुः कर्णपीयूषसन्निभं नाम परस्परं व्याहरंतः के यूयं तदुच्यतां । मत्तो वो भयं मास्तु ॥

अथ श्रीमानंगदस्तत्सन्निधावुत्थितो रामागमनादिं स्वप्रायोपवेशनांतं सर्वं वृत्तांतं कथयित्वोवाच पक्षिन्यदि सीतां जानासि नः कथय । तदा हृष्टमानसः सोऽब्रवीद्धरीश्वरा जटायुर्मम प्रियो भ्राता । बहुवर्षसहस्रांतेऽद्य तस्य वार्ता मया श्रुता । तस्य सलिलदानाय मां जलांतिकं नयध्वं पश्चात्सर्वं शुभं वक्ष्ये । भवतां कार्यसिद्धये वाक्साहाय्यं करिष्ये । तथेति ते तं समुद्रतीरं निन्युः । स तत्सलिले स्नात्वा भ्रात्रे जलांजलिं दत्वा तैः पुनः स्वस्थानं प्रापितः कथयामास । समुद्रमध्ये त्रिकूटगिरिमूर्धनि लंकानामनगर्यास्ते । तत्राशोकवने राक्षसीभिः परिवृता सीता सुरक्षितास्ते । सा मयेतः शतयोजनदूरतो दृश्यते । गृध्रत्वाद्दूरदृष्टिं मे संशयितुं नार्हथ । शतयोजनविस्तीर्णं समुद्रं यो लंघयेत्स एव जानकीं दृष्ट्वा पुनरायास्यति । अहमेव तं दुरात्मानं मम भ्रातृहंतारमेकाकी हंतुमुत्सहे किंतु पक्षविवर्जितोऽस्मि । सरित्पतिं लंघितुमतियत्नेन यतध्वं । ततो रघुश्रेष्ठो रावणं हनिष्यति । शतयोजनायतं सिंधुमुल्लंघ्य लंकां प्रविश्य वैदेहीं दृष्ट्वा समाभाष्यच समुद्रं पुनस्तर्तुं वः कतमः समर्थ इति विचार्यतां ॥

उल्लंघ्य सिंधुं शतयोजनायतं ॥
लंकां प्रविश्याथ विदेहकन्यकां ॥
दृष्ट्वा समाभाष्य च वारिधिं पुन ॥
स्तर्तुं समर्थः कतमो विचार्यतां ॥

इति ग० रा० कि० कां० सप्तमः सर्गः ॥ ७ ॥

---

श्रीमहादेव उवाच । अथ ते वानराः कौतुकाविष्टास्तं गृध्रं पप्रच्छुर्भगवन् स्वमुदंतमादितोऽस्मान्कथय । ततो हृष्टः स कथयामास । अहं संपातिनामा मम भ्राता जटायुश्च पुरा रूढयौवनौ बलेन दर्पितौ खगौ बलजिज्ञासया मदात्सूर्यमंडलपर्यंतं गंतुमुत्पत्य बहुयोजनसहस्रं गतौ । तत्र जटायुः सू-

र्यकिरणदग्ध आसीत्तं परित्रातुं पक्षैराच्छाद्य स्थितोऽहं रश्मिभिर्दग्धपक्षोऽस्मि-न्सह्यमधन्यपतं । कपीश्वरा दूरपतनान्मूर्छितोऽहं दिनत्रयात्पुनश्चेतनामलभै, परं पक्षदहनादुड्डीनासमर्थोऽतो भ्रांतमानसः कं देशं वा कान्गिरिकूटान्प्राप्तस्तन्न ज्ञातवान् । अथ शनैर्नयने उन्मील्य तत्रैकं शुभमाश्रमं दृष्ट्वा शनैः शनैस्त-स्य समीपमगमं । तत्रस्थश्चंद्रनामा मुनिराण्मां दृष्ट्वा विस्मितोऽवदत्संपाते कि-मिदं ? तवोत्तमं रूपं केन विकृतं कृतं ? त्वं पूर्वमत्यंतं बलवानासीः । केन वा किमर्थं तव पक्षौ दग्धौ तत्कथ्यतां । ततः सर्वं स्वचेष्टितं कथयित्वाहं मु-निशार्दूलमब्रवं प्रभो दावाग्निसदृशया चिंतया दह्ये । विपक्षोऽहं जीवितं धार-यितु कथं शक्नोमि । इत्युक्तः स मुनिर्दययार्द्रविलोचनो मां बहुभिः सूक्तिभि सांत्वयन्प्राह वत्स मम वचः शृणु । यावत्प्रारब्धसंक्षयस्तावद्धृतकंचुकसर्पवत्ति-ष्ठ । त्रेतायुगे भगवान्नारायणो दाशरथिर्भूत्वा रावणस्य वधार्थाय दंडकामाग-मिष्यति । तस्य भार्यां रावणश्चोरवन्नीत्वा लंकायां स्थापयिष्यति । तस्याः प-रिमार्गणे सुग्रीवनिदेशाद्वानरा आगमिष्यंति तैः सह जलधेस्तीरे कारणवशात्त-व समागमो भविष्यति । तेभ्यः सीतास्थितिं यथार्थं कथयस्व तदैव तव पक्षौ पुनर्नवावुत्पत्स्येते इति । भवंतो मे नूतनावतिकोमलौ पक्षौ जातौ पश्यंतु । वः स्वस्त्यस्तु । अहं गमिष्यामि । दुर्लंघ्यसमुद्राविलंघने यत्नं कुरुत । सीतां निश्चयेन द्रक्ष्यथ । यन्नामस्मृतिमात्रतो दुर्जनोऽपि भवसमुद्रं तीर्त्वा विष्णोः प-दं गच्छति तस्यैव प्रिया भक्ता यूयं सागरमात्रतरणे कथं न शक्ताः ॥

यन्नामस्मृतिमात्रतोऽपरिमितं संसारवारांनिधिं ॥
तीर्त्वा गच्छतिदुर्जनोऽपि परमं विष्णोः पदं शाश्वतं॥
तस्यैव स्थितिकारिणस्त्रिजगतां रामस्य भक्ताः प्रिया ॥
यूयं किं नसमुद्रमात्रतरणे शक्ताः कथं वानराः ॥

इति रा॰ रा॰ कि॰ कां॰ अष्टमः सर्गः ॥ ८ ॥

---

श्रीमहादेव उवाच । तस्मिन्गृध्रराजे विहायसा गते महता हर्षेणावि-ष्टाः सीतादर्शनलालसास्ते वानरपुंगवा नक्रचक्रभयंकरं तरंगादिभिरुन्नद्धमा-काशमिव दुर्ग्रहं समुद्रमग्रे पश्यंतः परस्परमवोचन्कथमेनं तरामः ? अथांगद उवाच । वानरोत्तमाः शृणध्वं । भवंतोऽत्यंतबलिनः शूराः कृतविक्रमाः ।

अत्र समुद्रं तीर्त्वा राजकार्यं यः करिष्यति स एतेषां वानराणां प्राणदाता भविष्यति । अतो यो महाबलः स शीघ्रमुत्तिष्ठतां । अस्मिन्काले विचारणा न कार्या । रामसुग्रीवयोः प्लवगानांच स एव पालको भवेत् । युवराजेनैवमुक्तं वचः शृण्वंतो वानरसैनिकाः परस्परविलोकिनस्तूष्णीमासन् । न किंचिदप्यूचुः । अंगदः पुनरब्रवीत् । युष्माभिर्निश्चयेन प्रत्येकं स्वस्वबलमुच्यतां ततः कार्यसाधकं निश्चेष्यामः । तद्वचनं श्रुत्वा वीरा बलं पृथगुक्तवंतो योजनानां दशकादारभ्य विंशतिस्त्रिंशदित्येवं क्रमेण दशोत्तरं जगुः । अथ जांबवान्प्राह अहं नवतियोजनानि गमिष्यामि । पुरा त्रिविक्रमे देवेऽवतीर्णे सति तदीयंभूपरिच्छेदकं पादमेकविंशतिवारं प्रदक्षिणविधानेनाहं पर्यगच्छं । इदानीं वार्धकग्रस्तो जलधिं विलंघयितुं नशक्नोमि । अनंतरमंगद आह महोदधेः पारं गंतुमहं शक्तोऽस्मि किंतु पुनर्लंघनसामर्थ्यमस्ति वा नवेति न जानामि । जांबवांस्तमाह त्वं नो नियामको राजा यद्यपि समर्थोऽसि त्वां नियोक्तुं न युक्तं । अंगदोऽब्रवीदेवंचेत्पूर्ववत्सर्वे दर्भविष्टरे स्वप्स्यामः । केनापि कार्यं न क्रियते जीवितुं च न शक्यते । अथ जांबवानाह वत्स माभैषीः । येनास्माकं कार्यसिद्धिरचिरेण करिष्यते तं दर्शयामि । इत्युक्त्वा हनूमंतमवस्थितमब्रवीद्धनूमन् कार्यगौरवे प्राप्तेऽज्ञेनेव रहस्तूष्णीं किं स्थीयते ? महाबल अद्य स्वसामर्थ्यं दर्शय । त्वं साक्षाद्वायुतनयस्तत्तुल्यपराक्रमो रामकार्यार्थमेव जनितोऽसि । पूर्वं जातमात्रेण त्वया विभावसुमुद्यंतं दृष्ट्वेदं पक्वं फलं जिघृक्षामीति बालचेष्टया योजनानां पंचशतमुत्प्लुतं । ततो भुवि पतितोऽसि अतस्त्वद्बलमाहात्म्यं वर्णयितुं कः शक्नोति ? उत्तिष्ठ रामस्य कार्यं कुरु । अस्मान् पाहि । इति जांबवतो वाक्यं श्रुत्वातिहर्षितो हनुमान्ब्रह्मांडं स्फोटयन्निव सिंहनादं कृत्वा परस्त्रिविक्रम इव पर्वताकारो भूत्वाब्रवीज्जलधिं लंघयित्वा लंकां भस्मसात्कृत्वा रावणं सकुलं हत्वा जनकनंदिनीमानेष्ये यद्वा रावणं गले रज्ज्वा बध्वा स पर्वतां लंकांच सव्यापसव्यपाणिभ्यां धृत्वा रामस्याग्रे क्षिपामि यद्वा जानकीं दृष्ट्वैवायामि तदुच्यतां । इति हनुमद्भाषितं श्रुत्वा जांबवानब्रवीत् भद्र शुभां जानकीं जीवंतीं दृष्ट्वैवागच्छ । पश्चाद्रामेण सहितः पौरुषं दर्शयिष्यसि । विहायसा गच्छतस्ते कल्याणं भवतात् । रामकार्यार्थं गच्छंतं त्वां वायुरनुगच्छतु । इत्याशीर्भिः समामंत्र्य प्लवगाधिपैर्विसृष्टः स महेंद्राद्रिशिरो गत्वाद्भुतदर्शनो बभूव ॥

महानगेंद्रप्रतिमो महात्मा सुवर्णवर्णोऽरुणचारुवक्त्रः ॥
महाफणींद्राभसुदीर्घबाहुर्वातात्मजोऽदृश्यत सर्वभूतैः १

इति गद्यात्म० रा० कि० कां० नवमः सर्गः ॥ ९ ॥

इति किष्किंधाकांडः समाप्तः

---

# अथ सुंदरकांडप्रारंभः

श्रीमहादेव उवाच । शतयोजनविस्तीर्णं मकरालयं लिलंघिषुरानंदसंदोहः पवनात्मजः परात्मानं रामं ध्यात्वेदं वचनमब्रवीत् । रामनिर्मुक्तममोघं महाबाणमिव विहायसा गच्छंतं मां सर्वे वानराः पश्यंतु । रामपत्नीं जनकनंदिनीमद्यैव पश्यामि । कृतार्थोऽहं राघवं पुनः पश्यामि । प्राणप्रयाणसमये यस्य नाम सकृत्स्मरन्नरो भवांभोधिं तीर्त्वा यस्य पदं याति तस्य दूतस्तदंगुलिभूषणमुद्रिकायुक्तस्तमेव हृदि ध्यायन्नहमल्पवारिधिं कथं न तरामि ? इत्युक्त्वा हनुमान्बाहू प्रसार्यायतवालधिर्ऋजुग्रीव ऊर्ध्वदृष्टिराकुंचितपादद्वयः सन्दक्षिणाभिमुखो भूत्वा तूर्णं पुप्लुवे । विमानस्थैर्देवैराकाशाद्वीक्ष्यमाणो मारुतिर्वायुवेगतो जगाम । तस्य बलस्य परीक्षणार्थं कौतूहलसमन्वितो देवतासंघः सुरसाभिधां नागानां मातरमब्रवीदेषमहासत्वो वानरो वेगेन गच्छति । स लंकां प्रवेष्टुं शक्तो वा न वा निर्णेष्यामः । त्वं गच्छ तस्य कंचिद्विघ्नं समाचर, बलं बुद्धिं च ज्ञात्वा त्वरया पुनरेहि । इत्युक्ता सा विघ्नं कर्तुं शीघ्रं ययौ; मार्गमावृत्य पुरतः स्थित्वा हनूमंतमब्रवीद्वानर एहि मम मुखं शीघ्रं प्रविश । क्षुधासंपीडितात्मनो मे त्वं देवैर्भक्ष्यः कल्पितः । हनूमांस्तामाह मातः सुरसे अहं रामस्य शासनाज्जानकीं द्रष्टुं गच्छामि । सत्वरं पुनरागम्य रामाय तस्याः कुशलं कथयित्वा त्वदाननं निवेक्ष्यामि । मह्यं मार्गं देहि नमोऽस्तुते । इत्युक्ता सा पुनराह अहं क्षुधितास्मि । मम वक्त्रं प्रविश ततो निःसृत्य गच्छ नोचेत्त्वां भक्षयामि । इत्युक्तो हनूमानाह मुखं शीघ्रं प्रसारयाद्यैव शीघ्रं प्रविश्य गच्छामि । इत्युक्त्वा योजनमात्रदीर्घदेहो भूत्वा पुरः स्थितः । तद्रूपं दृष्ट्वा सा पंचयोजनायतं मुखं चकार । तदा हनुमान्द्विगुणं रूपमादधात् । ततः सुरसा विंशतियोजनायतं वक्त्रं चकार । हनुमद्रूपं त्रिंशद्योजनसम्मितं बभूव । तदा सुरसा पंचाशद्योजनायतं मु

खं चकार । तदैव हनूमांस्त्वंगुष्ठसन्निभो भूत्वा तस्या मुखं प्रविश्य पुनरस्य पुरतः स्थितोऽब्रवीद्देवि नमोऽस्तु ते । अहं तव वदनं प्रविष्टो निर्गतश्च । एवं वदंतं साब्रवीद्बुद्धिमतां वर गच्छ रामस्य कार्यं साधय । कपेऽहं तव बलं जिज्ञासुभिर्देवैः संप्रेषिता । सीतां दृष्ट्वा पुनर्गत्वा रामं द्रक्ष्यसि । इत्युक्त्वा सा देवलोकं ययौ । मारुतिः पुनर्गरुत्मान्पक्षिराडिव वायुमार्गेण जगाम ॥

अथ समुद्रो मैनाकपर्वतमाह एष महासत्वः कपी रामकार्यसिद्ध्यर्थं गच्छति । त्वं तस्य सचिवो भव । पुरा सगरैर्वर्धित इति हेतोरहं सगारोऽभवम् । तद्वंशेऽसौ दाशरथी रामो बभूव । तस्य कार्यार्थमेष महाकपिर्गच्छति । अतस्त्वं जलात्तूर्णमुत्तिष्ठ । स प्लवंगमस्त्वयि विश्रम्य गच्छतु । स तथेति नानामणिमयैः शृंगैर्महोन्नतोजलमध्यात् प्रादुरभूदपिच नराकृतिर्भूत्वा शृंगोपरितिष्ठन्नायातं हनूमंतं दृष्ट्वाब्रवीन्महाकपेऽहं मैनाकस्त्वद्विश्रामदानाय समुद्रेण समादिष्टोऽस्मि । आगच्छ ममामृतकल्पानि पक्वफलानि जग्ध्वा क्षणं विश्रम्य पश्चाद्यथासुखं गमिष्यसि । एवमुक्तः पवनसूनुः प्राह रामकार्यार्थं गच्छतो मे कुतो भक्षणं? विश्रामो वा कथं स्यात् ? मया त्वरितं गंतव्यं इत्युक्त्वा कराग्रेण शिखरं स्पृष्ट्वा ययौ । अथ किंचिद्दूरं गतस्य तस्य छायां छायाग्रहोऽग्रहीत् । जलमध्ये स्थिता घोरा सिंहिकाकाशगामिनां छायामाक्रम्य तानाकृष्य भक्षयति तया गृहीतो हनूमांश्चिंतयामास केन विघ्नकारिणा मम वेगरोधनं कृतं ? अत्र कोऽपि न दृश्यते। मम विस्मयः प्रजायते । एवं विचिंत्य दृष्टिमधः प्रासारयत् । तत्र महाकायां घोररूपिणीं सिंहिकां राक्षसीं दृष्ट्वा सलिले तूर्णं पपात । तां रुषा पद्भ्यामेव हत्वा पुनरुत्प्लुत्य दक्षिणाभिमुखो ययौ । ततो नानाफलद्रुमपक्षिमृगाकीर्णं समुद्रस्य दक्षिणकूलमासाद्य त्रिकूटाचलमूर्धनि बहुभिः प्राकारैः सर्वतः परिखाभिश्च युक्तं नगरं ददर्शापिच लंकां कथं प्रवेक्ष्यामीति चिंतापरोऽभवत् । अथ रात्रौ सूक्ष्मतनुर्भूत्वा लंका प्रवेष्टव्येति विचिंत्य तत्रैव स्थित्वा नगरद्वारं प्रविवेश । तत्र साक्षाल्लंकापुरी राक्षसीवेषधारिणी तं प्रविशंतं दृष्ट्वा व्यतर्जयत् । कस्त्वं मामनादृत्य वानररूपेण रात्रौ चोरवत्प्रविश्य किं कर्तुमिच्छसि ? इत्युक्त्वा रोषताम्राक्षी तं पादेनाभिजघान । हनुमानपि तां वाममुष्टिनाहन् । सा तदैव भृशं रक्तमुद्वमंती भूमौ पतितोत्थिता हनूमंतं प्राह महाबल गच्छ त्वया लंका जिता । पुराहं ब्रह्मणा प्रोक्ता त्रेतायुगे नारायणो दाशरथी रामो जनिष्यते । तस्य भार्या रावणो हरिष्यति । तां द्रष्टुकाम एको वानरस्तवांतिकं रात्रावागमिष्यति । त्वया भर्त्सितः सोऽपि त्वां मुष्टिना हनिष्य-

ति । तेनाहता त्वं यदा व्यथिता भविष्यसि तदैव रावणस्यांतो न संशयः । तस्मात्त्वया लंका जिता, सर्वं जितं । रावणस्यांतःपुरवर उत्तमं क्रीडाकानन-मस्ति । तन्मध्ये दिव्यपादपसंकुलाशोकवनिकास्ति । तस्यां शिंशपानामैको महावृक्षो मध्यगोऽस्ति । तस्याधो जानकी घोरराक्षसीभिः सुरक्षितास्ते । तां दृष्ट्वा त्वरितं गच्छ राघवाय तद्वार्तां निवेदय । पवनात्मजेनाब्धावुल्लंघिते जानक्या रावणस्य च वामाक्षि वामभुजश्च तथा रामस्य दक्षिणो बाहुर्नेत्रंच तीव्रं पुस्फोर ॥

**उल्लंघितेऽब्धौ पवनात्मजेन ॥**
**धरासुतायाश्च दशाननस्य ॥**
**पुस्फोर वामाक्षि भुजश्च तीव्रं ॥**
**रामस्य दक्षांगमतींद्रियस्य ॥**

इति ग० रा० सुंदरकांडे प्रथमः सर्गः ॥ १ ॥

---

ततो हनुमाल्लंकां परितो बभ्राम । नृपालयं प्रविश्य सर्वप्रदेशेषु विचिंत्य लंकाभिभाषितं स्मृत्वाशोकवनिकां जगाम । आनम्रशाखाग्रपादपैः परिवृतायां कल्पवृक्षसंबाधायां रत्नसोपानवापिकायां नानापक्षिमृगाकीर्णायां स्वर्णप्रासादशोभितायां तस्यां प्रतिवृक्षं जानकीं विचिन्वन्स मणिस्तंभशतावृतमभ्रंलिहं चैत्यप्रासादं दृष्ट्वा विस्मयमापन्नस्ततः किंचिद्दूरं गत्वात्यंतानिबिडच्छदादृष्टातपं स्वर्णवर्णविहंगाकीर्णं शिंशपावृक्षं ददर्श । तमारुह्य तन्मूले राक्षसीमध्ये स्थितां भूतलागतदेवीमिवैकवेणीं कृशां दीनां मलिनांबरधारिणीं भूमौ शयानां रामरामेतिवादिनीमुपवासकृशां शुभां शाखांतरच्छदमध्यस्थो ददर्शापिच रामकार्यं मया साधितं, कृतार्थोऽस्मीत्यात्मानं धन्यं मेने ॥

ततोऽतःपुराद्बहिः किलकिलाशब्दो बभूव । ततः किमेतदिति सावधानो वृक्षपत्रेषु लीनो मारुतिस्तत्रायांतं स्त्रीजनैः परिवारितं दशास्यं विंशतिभुजं रावणं दृष्ट्वा विस्मयमगात् । तस्मिन्दिने पररात्रे स राक्षसाधिपो रामेण संदिष्टः कश्चिद्वानर आगत्य कामरूपधरः सूक्ष्मो भूत्वा वृक्षाग्रस्थः सीतां पश्यतीति स्वप्नं दृष्ट्वा कदाचित्स्वप्नः सत्यो भवेदित्यनुचिंत्य तत्रागच्छत् ॥ तदागमने सीता भीता रामार्पितचित्ताधोमुख्यश्रुनयना स्थिता । रावणस्तामा-

लोक्याह सुभ्रु मां दृष्ट्वात्मन्येव किं वृथा लीयसे ? रामः सानुजो वनचराणां मध्ये तिष्ठति । कदाचिद्दृश्यते कदाचिन्नदृश्यते । तस्य दर्शने मया प्रेषिताश्चाराः समंततः प्रयत्नेन वीक्षमाणास्तं न पश्यंति । त्वयि निस्पृहेण तेन किं करिष्यसि ? तस्य हृदये त्वदर्थः स्नेहो न जायते । राघवस्त्वद्गुणान्न जानाति । त्वयासह सर्वभोगान्भुंजानोऽपि कृतघ्नो जातः । साध्वि त्वं दुःखशोकसमाकुला मयानीता । त्वयि भक्तिहीनो निर्ममो मूढ इदानीमपि नायाति । त्वद्विमुखं नराधमं तं किं करिष्यसि ? त्वय्यतीवसक्तमसुरोत्तमं मां भज । यदि मां प्रतिपद्यसे देवगंधर्वनागयक्षकिन्नरयोषितां नियोजयित्री भविष्यसि । रावणस्य वचः श्रुत्वामर्षसमन्विता सीताऽधोमुखी सत्यंतरे तृणं निधायोवाच । नीच रामाद्बिभ्यता त्वया भिक्षुरूपं धृतं । राघवाभ्यामाश्रमे रहिते मामहरस्तत्फलमचिरात्प्राप्स्यसे । रामशराघातविदारितवपुर्यमांतिकं गमिष्यसि । लक्ष्मणसमन्वितो रामः समुद्रं शोषयित्वा वा शरैर्बद्ध्वा त्वां हंतुमागमिष्यति । राक्षसाधम स त्वां सकुलं सबलं हत्वा मां पुरं नेष्यति । न संदेहोऽत्र । एवं तस्याः परुषाक्षरं श्रुत्वा क्रुद्धो रक्षःपतिः खड्गमुद्यम्य जानकीं हंतुमुद्यतोऽभवत् । तदा पतिहिते रता मंदोदरी तं निवार्याहैनां मानुषीं दुःखितां त्यज । देवगंधर्वनागानां बह्व्यो वरांगनास्त्वयि रताः संति ता उपभुंक्ष्व । ततो दशग्रीवो विकृतानना राक्षसीरब्रवीद्यथा सीता मे वशगाभवेत्तथा तर्जनादरणादिभिर्यतध्वं । मासद्वयाभ्यंतरे यदि वशगा भवेत्सर्वसुखोपेता मयासह राज्यं भोक्ष्यते । मासद्वयादूर्ध्वं यदि मच्छय्यां नाभिनंदति तदा तां हत्वा मे प्रातराशाय पक्वां कुरुत । इत्युक्त्वा स्त्रीभिरंतःपुरं प्रययौ । तस्मिन्गते राक्षस्यो जानकीं स्वतर्जनैर्भीषयामासुः । तत्रैकाह जानकि तव यौवनं वृथा गतम् । तद्रावणं समासाद्य सफलं भविष्यति । अपरा कोपेनाह किं विलंबेन ? मानुषीयमिदानीं व्यापाद्यतां । अंगं पृथक् पृथग्विभज्य पच्यतां । अन्यातु खड्गमुद्यम्य तां हंतुमुद्यताभवत् । अथान्या करालवदनास्यं विदार्याभीषयत । एवं तां भीषयंतीः सर्वा राक्षसीर्निवार्य वृद्धा त्रिजटाब्रवीत् दुष्टा राक्षस्यो मद्वाक्यं शृणुत वो हितं भवेत् । रुदतीं जानकीं न भीषयध्वं, तां नमस्कुरुत । इदानीमेव मया स्वप्नो दृष्टः कथयामि शृणुत । रामो लक्ष्मणेन सह शुभ्रमैरावतमारुह्य लंकां दग्ध्वा रावणमाहवे हत्वा जानकीं स्वांक आरोप्य हृष्टो गिरिमूर्धनि स्थितः । रावणस्तैलाभक्तः कृत्तवदनमालिको दिगंबरः पुत्रपौत्रैः सह गोमयन्हदमगाहत । बीभिषणस्तु हृष्टमानसो रामस्य सन्निधौ स्थित्वा तत्पादसेवां करोति । त

स्माद्रामो रावणं हनिष्यति सीतां गृहीत्वा गमिष्यति च न संशयः । इति त्रिजटावचः श्रुत्वा भीतास्तास्तूष्णीमासन् । किंचित्कालेन निद्रावशमुपागताः । सीतातिदुःखेन परिमूर्छिता त्रातारं नाधिगच्छंती प्रभाते राक्षस्यो मां भक्षयिष्यंति केनोपायेनेदानीमेव मरणं भवेदिति चिंतयंती मृतौ कृतनिश्चया वृक्षशाखामालंब्य चिरायातिष्ठत् ॥

एवं सुदुःखेन परिप्लुता सा ॥
विमुक्तकंठं रुदती चिराय ॥
आलंब्य शाखां कृतनिश्चया मृतौ ॥
न जानती कंचिदुपायमंगना ॥

इति ग० रा० सुं० कां० द्वितीयः सर्गः ॥ २ ॥

---

श्रीमहादेव उवाच । अथ जानकी मरणोपायं निश्चित्याब्रवीद्राघवंविना रक्षोमध्यतो मम जीवितेन किं फलं स्यात् ? तस्मादुद्बंधनेन शरीरं मोक्ष्यामि । ममेयमत्यर्थं दीर्घा वेण्युद्बंधाय भविष्यति । एवं मरणाय निश्चितबुद्धिं तां विलोक्य किंचिद्विचार्य सूक्ष्मरूपो हनुमांस्तस्याः श्रोत्रगं यथाभवति तथा शनैः शनैरिदमभाषत । इक्ष्वाकुवंशसंभूतो राजा दशरथः पुत्रकामेष्टिं कृत्वा चतुरो देवसमान्सुतान्लेभे । तेषां ज्येष्ठो रामः पितृवचनादनुजेन लक्ष्मणेन पत्न्या सीतया च दंडकारण्यमागत्य गौतमीतीरे पंचवट्यामुवास । तत्र महाभागा सीता दुरात्मना रावणेन हृता । ततोऽतिदुःखितो रामचंद्रस्तां मार्गमाणो जटायुषं भुवि पतितमपश्यत् । तस्मै पक्षिपतये दिवं दत्वर्ष्यमूकगिरिं शीघ्रमुपागमत् । तत्र सुग्रीवेण मैत्रीं कृत्वा तद्भार्याहारिणं वालिनं हत्वा रामचंद्रः सुग्रीवं लक्ष्मणेन राज्येऽभ्यषेचयत् । अथ स वानरप्रभुः सर्वान्वानरान्समानाय्य सीतायाः परिमार्गणे दिक्षु तान्प्रेषयामास । तत्रैकः सुग्रीवसचिवोऽहं संपातिवचनाच्छतयोजनायतं समुद्रमुल्लंघ्य लंकां प्रविश्य शनैरशोकवनिकां प्राप्य शिंशपातरुमारुह्य जानकीमद्राक्षं । इहागतः सीतादेवीं पश्यन्कृतकृत्योऽस्मि । इत्युक्त्वा विरराम ॥

सीता क्रमेण तत्सर्वं श्रुत्वा विस्मयमाययौ । किमिदं मया श्रुतं ? किंस्विद्व्योम्नि वायुना समुदीरितं वा स्वप्नो वा मनोभ्रांतिर्वा सत्यमेव ? दुःखेन

मे निद्रा नास्ति तस्मात्स्वप्नाभावः । एतत्सर्वं जानामि तस्माद्भ्रमोऽपि न । अतो येन मे कर्णपीयुषं वचनं समुदीरितं स प्रियवादी महाभागो ममाग्रत आत्मानं दर्शयतु । तज्जानकीवाक्यं श्रुत्वा हनुमान्पत्रखंडादवतीर्य कलविंकप्रमाणांगो भूत्वा तां प्रणम्य प्रांजलिर्भूत्वा पुरतस्तस्थौ । रक्तास्यं पीतवानरं तं दृष्ट्वा सीता भीतायं रावणो मां मोहयितुं मायया वानराकृतिर्भूत्वायात इति चिंतयित्वाऽधोमुखी तूष्णींमासीत् । तस्या हृदयं ज्ञात्वा हनूमान्पुनराह मातर्नाहं तथाविधः । मयि शंकां त्यज । अहं परमात्मनो रामचंद्रस्य दासो हरींद्रस्य सुग्रीवस्य सचिवोऽखिलप्राणभूतस्य वायोः पुत्रः । तच्छ्रुत्वा सीता प्राह वानरमनुष्याणां संगतिः कथं घटते ? मारुतिः पुनः प्राह शबरीवचनाद्राम ऋष्यमूकमगात् । तत्रस्थः सुग्रीवो रामलक्ष्मणावायांतौ दृष्ट्वा भीतो रामस्य हृद्गतं ज्ञातुं मां प्रेषयामास । अहं ब्रह्मचारिवपुर्भूत्वा सन्निधिं गतो रामस्य सद्भावं ज्ञात्वा तौ बंधू मम स्कंधोपरि निधाय सुग्रीवसामीप्यं नीत्वा तयोरग्निसाक्षिकं सख्यमकरवं । रामः सुग्रीवभार्यापहारिणं वालिनमेकेनैव बाणेन जघानापिच सुग्रीवं राज्येऽभ्यषेचयत् । अथ सुग्रीवो महाबलान्वानरान्भवत्याः परिमार्गणे दिक्षु प्रेषयामास । तदा मां दक्षिणदिशं गच्छंतं दृष्ट्वा रामः सादरमभाषत, मारुतनंदन ममाऽशेषं कार्यं त्वयि स्थितं वर्तते । मम लक्ष्मणस्य च सीतायै सर्वं कुशलं ब्रूहि । तस्याः परिज्ञानार्थमेतन्मम नामाक्षरमुद्रितमुत्तमांगुलीयकं सीतायै दीयतामित्युक्त्वा कराग्रादवतार्येदं मह्यं प्रददौ । देवि मया तत्प्रयत्नेनानीतमिदं पश्य । इत्युक्त्वा मुद्रिकां दत्वा नमस्कृत्य बद्धांजलिपुटो दूरात्स्थितः । रामनामांकितां मुद्रां दृष्ट्वातिप्रमुदिता सीता तां शिरसा धृत्वा स्रवदानंदनेत्रजा हनूमंतं प्राह कपे त्वं मे प्राणदातासि । राघवस्य भक्तोऽसि, तस्य प्रियकार्यस्यतस्तस्य त्वय्येव विश्वासोऽस्ति । नोचेन्मत्सन्निधिं स त्वां कथं प्रेषयेत् ? हनूमन्मम दुःखादिकमखिलं त्वया दृष्टं । यथा मयि राघवस्यानुकंपा जायेत तथा सर्वं कथय । मासद्वयावधि मत्प्राणाः स्थास्यंति । रामो नागमिष्यति चेत्स खलो मां भक्षयिष्यति । अतो वानरानीकपैः सार्धमत्रागत्य सपुत्रं सबलं रावणं हत्वा प्रभुर्मां बंधनान्मोचयेत्तत्तस्य सदृशं भवेत् । हनुमन्रामो यथा दशाननं हत्वा मां शीघ्रं मोचयेत्तथा यतस्व । वाचा धर्ममवाप्नुहि ॥

हनूमान्प्रत्युवाच । देवि रामो यथा दृष्टस्तथा सायुधः सलक्ष्मणः ससुग्रीवः ससैन्यः शीघ्रमागत्य सकुलं रावणं बलाद्धत्वा त्वामयोध्यां नेष्यति ।

नात्र संशयः। जानकी पुनराह वानरानीकपैः सह रामो वारिधिं कथं तरिष्यति ? हनुमानुवाच। रामलक्ष्मणौ मम स्कंधावारूढावायास्यतः। ससैन्यः सुग्रीवो विहायसा क्षणेनैव वार्धिं तीर्त्वा राक्षसौघान्निर्धक्ष्यति नात्र संशयः। देवि मेऽनुज्ञां देहि, रामं द्रष्टुं त्वरया गच्छामि। माता राघवो यथा मां विश्वसेत्तथा किंचिदभिज्ञानं देहि। ततः किंचिद्विचार्य केशपाशांतःस्थितं चूडामणिं विमुच्य तस्मै दत्वा सीताब्रवीत् कपींद्र अनेन रामस्त्वां विश्वसेदन्यच्चाभिज्ञानार्थं ब्रवीमि। पूर्वमेकदा चित्रकूटगिरौ रहसि स्थितो रामचंद्रो मदंके शिर आधाय निद्रित आसीत्। तदैंद्रः काक आगत्य ममारक्तं पादांगुष्ठमामिषाशया नखैस्तुंडेन चासकृद्विदारयामास। ततः प्रबुद्धो रामः पादं कृतव्रणं दृष्ट्वा भद्रे केन दुरात्मनैतद्विप्रियं कृतमित्युक्त्वा रक्तास्यनखतुंडं वायसं पुरतो दृष्ट्वा चुकोप। तस्मिन्मां पुनरभिद्रवत्येकं तृणमुपादाय दिव्यास्त्रेणाभियोज्य रामो वायसोपरि लीलया चिक्षेप। तज्ज्वलत्तमभ्यद्रवत्। स वायसो भीत ऐंद्रादिब्राह्मांतान्लोकान्भ्रमंस्तत्र तैरपि त्यक्तः पुनरागत्य दयानिधे रामस्य पादयोरपतत्। शरणागतं तं रामोऽब्रवीदेतन्ममास्त्रममोघं वर्तते। तस्मादेकमक्षि दत्वेतो व्रज। ततः स काकः सव्यं नयनं दत्वा गतः। एवं पौरुषवान्राघवो मामिदानीं किमर्थमुपेक्षते ? इति सीताभाषितं श्रुत्वा हनुमान्प्राह देवि यदि रघूत्तमस्त्वामत्रस्थां जानाति तदा राक्षसमंडितां लंकां क्षणाद्भस्मीकरिष्यति। जानक्याह वत्स त्वमतिसूक्ष्मवपुरसुरैःसह कथं योत्स्यसे ? यदि सर्वे वानरा भवादृशास्ते वा कथं योत्स्यंते ? हनूमांस्तद्वचः श्रुत्वा रक्षोगणविभीषणं मेरुमंदरसन्निभं पूर्वरूपमदर्शयत्। महापर्वतसदृशं तं कपिकुंजरं दृष्ट्वा महता हर्षेणाविष्टा सीता प्राह महासत्व समर्थोऽसि त्वां राक्षस्यो द्रक्ष्यंति, रामांतिकं द्रुतं गच्छ। तव पंथाः शुभोऽस्तु। कपिः प्राह देवि बुभुक्षितोऽस्मि, तव दर्शनान्मम पारणोचिता। यद्याज्ञापयसि तव दृष्टिगतैः फलैर्मे पारणाभविष्यति। तदा जानक्या तथेत्युक्तः फलानि भक्षयित्वा तया प्रस्थापितस्तां प्रणिपत्यागच्छत्॥

अथ किंचिद्दूरं गत्वा मारुतिः स्वात्मन्यचिंतयत्कार्यार्थमागतो दूतः स्वामिकार्याविरोधतोऽन्यत्किंचिदसंपाद्य यदि गच्छति सोऽधम एव। अतोऽहं किंचिदन्यत्कृत्वा रावणं दृष्ट्वा तेन संभाष्य च रामदर्शनार्थं गच्छामि। इति मनसा निश्चित्य वृक्षानुत्पाट्याशोकवनिकां क्षणान्निर्वृक्षामकरोत्। सीताश्रयनगं त्यक्त्वा वनं शून्यं चकार। विपिनमुत्पाटयंतं तं दृष्ट्वा राक्षस्यो जा-

नकीमपृच्छन्कोऽसौ वानराकृतिरद्भुटः ? सीतोवाच । राक्षसनिर्मितां मायां भवत्य एव जानंति । दुःखशोकसमाकुलाहमेनं न जानामि । इत्युक्ता भयपीडितास्तास्त्वरितं गत्वा हनूमता कृतं सर्वं रावणाय न्यवेदयन् । देव वानराकृतिभृदमितविक्रमः कश्चिन्महासत्वः सीतयासह संभाष्याशोकवनिकां क्षणादुत्पाट्य चैत्यप्रासादं बभंज । प्रासादरक्षिणः सर्वान्हत्वा तत्रैव तिष्ठति । रावणस्तस्य प्रियतमवनस्य भंगं श्रुत्वातिक्रुद्धो राक्षसकिंकरनियुतं प्रेषयामास । अथ हनूमान्पर्वताकारो भूत्वा निर्भग्नचैत्यप्रासादस्य प्रथमांतरसंस्थितो लोहस्तंभकृतायुधः किंचिल्लांगूलचालनो रक्तास्यो भीषणाकृतिरापततं राक्षसानां महासंघं दृष्ट्वा सिंहनादं चकार । तं श्रुत्वा ते भृशं मुमुहुः । राक्षसास्तं विविधास्त्रौघैराजघ्नुः । ततो हनूमानुत्थाय तान्समंततो मुद्गरेण क्षणान्मशकानिव निष्पिपेष । किंकरान्निहताञ्छ्रुत्वा रावणः क्रोधमूर्छितः सुदुर्मदान्पंच सेनापतीन्प्रेषयामास । हनूमाँल्लोहस्तंभेन तान्सर्वानप्यहन् । ततः क्रुद्धः स मंत्रिसुतान्प्रेषयामास । स कपिराडागतांस्तान्निःशेषतो हत्वा पूर्वस्थानमुपाश्रित्य राक्षसान्प्रतीक्षमाणः स्थितः । ततः प्रतापवान्कुमारोऽक्ष आजगाम । तं दृष्ट्वा हनुमान्समुद्गर आकाश उत्पपात । ततोऽवतरंस्तं मूर्ध्नि ताडयित्वा व्यापादयत् । रावणः कुमारवधं श्रुत्वा महता क्रोधेनाविष्ट इंद्रजेतारमब्रवीत्पुत्र स सुतहा रिपुर्यत्रास्ते तत्र गत्वा तं हत्वाथवा बद्ध्वानेष्यामि । इंद्रजित्पितरं प्राह महामते शोकं त्यज । मयि स्थिते किमर्थं दुःखितं वचो भाषसे ? तात तं वानरं ब्रह्मपाशतो बद्ध्वा द्रुतमानेष्ये । इत्युक्त्वा रथमारुह्य बहुभी राक्षसैर्वृतो वायुपुत्रस्य समीपं जगाम । ततस्तस्यातिगर्जितं श्रुत्वा मारुतिस्तंभमुद्यम्य गरुत्मानिव नभोदेश उत्पपात । भ्रमंतं तं शिलीमुखैर्विद्ध्वा मेघनादः सिंहनादमकरोत् । ततो मरुत्सुतोऽतिहर्षात्स्तंभमुद्यम्य क्षणात्सारथिं जघान साश्वं रथं चाचूर्णयत् । ततो मेघनादोऽन्यं रथमास्थाय शीघ्रं ब्रह्मास्त्रमादाय वानरपुंगवं बद्ध्वा रावणनिकटं निनाय ॥

**यस्य नाम सततं जपंति येऽज्ञानकर्मकृतबंधनं क्षणात् ॥**
**सद्य एव परिमुच्य तत्पदं यांति कोटिरविभासुरं शिवम् १**
**तस्यैव रामस्य पदांबुजं सदा ॥**
**हृत्पद्ममध्ये सुनिधाय मारुतिः ॥**

सदैव निर्मुक्तसमस्तबंधनः ॥
किं तस्य पाशैरितरैश्च बंधनैः ॥ २ ॥

इति ग० रा० सुं० कां० तृतीयः सर्गः ॥ ३ ॥

---

श्रीमहादेव उवाच । अथ पाशबद्धं नगरं भीतवाद्विलोकयंतं यांतं तं कपींद्रमीक्षितुं समंतादागताः पौराः सुकोपनास्तं मुष्टितलैरताडयन् । ब्रह्मास्त्रमेनं क्षणमात्रसंगमं कृत्वा ब्रह्मवरेण सत्वरं गतं । हनूमांस्तज्ज्ञात्वापि कार्यविशेषगौरवात्फल्गुरज्जुभिर्धृतो ययौ । अथेंद्रजित्तं सभांतरस्थस्य रावणस्य पुरो निधायाह पितर्मया ब्राह्मवरेणासौ वानरो बद्धः । अनेन महासुरा हताः । एष न लौकिको हरिः । अत्र यद्युक्तं तन्मंत्रिभिर्विचार्य विधीयतां । ततः स राक्षसेश्वरः पुरःस्थितमंजनाद्रिनिभं प्रहस्तं विलोक्योवाच प्रहस्त पृच्छैनं वानरमसौ कुतः ? किमागतोऽत्र किं कार्यं ? वनमनेन किमर्थं विनाशितं राक्षसाः किमर्थं हताश्च । ततः प्रहस्तो हनुमंतमादरात्पप्रच्छ वानर केन प्रहितोऽसि ? अखिललोकराजसान्निधौ सत्यं वद । तव भयं मास्तु, त्वमचिरादेव बंधनान्मोक्ष्यसे। ततः पवनात्मजो लोकत्रयकंटकासुरं रिपुं निरीक्ष्य रामं मनसा स्मरन्हर्षाद्रघुनाथसत्कथां वक्तुं प्रचक्रमे । हे देवगणाद्यमित्र स्फुटं शृणु । यस्याखिलेशस्य भार्या शुना सद्धविरिव त्वया स्वनाशाय हृता तस्य रामस्य दूतोऽस्मि । राघवो मातंगपर्वतमेत्य सुग्रीवमैत्रीं कृत्वा वालिनमेकेन शरेण हत्वा सुग्रीवाय वानरराज्यं ददौ । तेन कपीश्वरेण सीतां मार्गयितुं महाबला हरयो दशदिक्षु संचोदिताः । तत्रैकः पवनात्मजोऽहं सीतां विचिन्वन्नत्र समागतः । सा देवी मया दृष्टा । कपित्वाद्वनं विनाशितं । ततो मां हंतुकामान्धृतचापसायकान्राक्षसान्रभसा त्समागतान्दृष्ट्वा मया शरीररिरक्षया ते हताः । प्रभोऽखिलदेहिनां स्ववपुः परमं प्रियं । ततो मेघनादनामको वीरो मां ब्राह्मास्त्रपाशेन निबध्यात्रानयत् । ब्रह्मवरप्रभावतस्तदस्त्रं मां स्पृष्ट्वैव त्यक्त्वा गतं । रावण तत्सर्वं जानन्नपि करुणारसार्द्रधीस्तव हितं प्रवक्तुकामोऽहं बद्ध इवेहागतः । रावण धर्मात्स्वर्गोऽधर्मान्नरक इति विवेकतो लोकस्य गतिं विचार्य राक्षसीं बुद्धिं मोपेहि । स्वस्यात्यंतहिताय मोक्षहेतुं दैवीं गतिं समाश्रय । त्वमुत्तमवंशसंभवो ब्राह्मणः पौलस्त्यपुत्रः कुबेरबंधुरसि । अतो मौर्ख्यं विसृज्य रमापतिं भज । शत्रुभावनां त्यक्त्वा सीतां पुरस्कृत्य शरणागतप्रियं रामं भज , तेन सपुत्रबां-

धवो भयाद्विमोक्ष्यसि ॥

इति वायुसूनोरमृतास्वादसमानं भाषितमसहमानो दशकंधरोऽतिरुषा कपिं जगाद प्लवगाधम कथं ममाग्रेऽभीतवद्विलपसि ? क एष रामः ? वनेचरयुतं तं नरं निहनिष्यामि । अद्य त्वां हत्वा जानकीं हन्मि । इति दशाननवचः श्रुत्वा मारुतिर्विवृद्धकोपस्तं दहन्निवाब्रवीद्राक्षसाधम रावणकोटीरऽपि हनिष्यामि । रामस्य दासोऽहमपारविक्रमः । तच्छ्रुत्वातिक्रुद्धो दशास्यः पार्श्वस्थितमेकं राक्षसमब्रवीन्मारयैनं कपिं खंडशश्छेदय । सर्वेऽसुरामित्त्रबांधवाः पश्यंतु । ततो वधोद्यतं सायुधं महासुरं बिभीषणो निवारयामास । राजन्प्रतापयुक्तैः परदूतोऽयं वानरो वधार्हो न भवेत् ॥ अस्मिन्दूते हते रामाय वार्तां को निवेदयेत् ? अतो वधसमं किंचिदन्यच्छासनं चिंतय । मारुतिः सचिन्हो गच्छतु । बिभीषणवचः श्रुत्वा रावणोऽब्रवीद्वानराणां लांगूले बलं तिष्ठत्यतः प्रयत्नेन पुच्छं वस्त्रादिभिर्वेष्टयित्वा वन्हिना योजयित्वैनं पुरेऽभितो भ्रामयित्वा विसृजत । तस्य दुरवस्थां सर्वे वानरयूथपाः पश्यंतु । तथेति केचिद्राक्षसा हर्षेण मारुतेर्लांगूलं तैलाक्तैः शणपट्टैरन्यैर्वस्त्रैश्चानेकशो दृढं वेष्टयामासुः । अथ पुच्छाग्रेऽनलं दीपयित्वा मारुतिं रज्जुभिः सुदृढं धृत्वा चोरोयमितिवादिनस्तूर्यघोषैर्घोषयंतस्तं मुहुर्मुहुस्ताडयंतः समंताद्भ्रामयामासुः । हनुमता किंचिच्चिकीर्षुणा तत्सर्वमपि सोढं । अथ पश्चिमद्वारसमीपं नीतः सूक्ष्मो भूत्वा बंधान्निःसृतः पुनः पर्वताकारो बभूव । ततो गोपुरमुत्प्लुत्य तत्रैकं स्तंभमादाय तान्राक्षसान्हत्वा कार्यशेषं विचार्य प्रासादाग्राद्गृहाद्गृहमुत्प्लुत्य महता संदीप्तपुच्छेन साट्टप्रासादतोरणामखिलां लंकां ददाह । तदा हा तात हा पुत्र हा नाथेति क्रंदमानाः प्रासादशिखरारूढा ज्वालाव्याप्ता दैत्ययोषितः पावके पतंत्यो देवता इवादृश्यंत । बिभीषणगृहं त्यक्त्वा हनुमता सर्वं पुरं भस्मीकृतं । तत उत्प्लुत्य जलधौ लांगूलं मज्जयित्वा स स्वस्थचित्तो बभूव । वायोः प्रियसखत्वात्सीताप्रार्थनेन चानलस्तस्य पुच्छं न ददाहापिचात्यंतं शीतलो बभूव ॥

यन्नामसंस्मरणधूतसमस्तपापा ॥
स्तापत्रयानलमपीह तरंति सद्यः ॥
तस्यैव किं रघुवरस्य विशिष्टदूतः ॥
संतप्यते कथमसौ प्रकृतानलेन ॥ १ ॥

इति रा० रा० सुं० कां० चतुर्थः सर्गः ॥ ४ ॥

---

श्रीमहादेव उवाच । अथ मारुतिः सीतां नमस्कृत्याब्रवीद्देवि रामसन्निधिं गंतुं मां भवत्याज्ञापयतु । रामस्त्वां द्रष्टुमागमिष्यतीत्युक्त्वा जानकीं त्रिः परिक्रम्य प्रणम्य प्रस्थितः । तदा जानकी दुःखकर्शिता प्राह त्वां दृष्ट्वा दुःखं विस्मृतमासीत् । इदानीं त्वं गमिष्यसीतःपरं रामवार्ताश्रुतिं विना कथं वर्ते ? मारुतिरुवाच । देवि यद्येवं मम स्कंधमारोह, क्षणमात्रतस्त्वां रामेण योजयामि । सीतोवाच । रामः सागरमाशोष्य वा शरसंघैर्बद्ध्वा वानरैः सार्धमागत्याहवे रावणं हत्वा यदि मां नयेत्तर्हि तस्य कीर्तिः शाश्वती भवेत् । अतस्त्वं गच्छ । रामागमनपर्यंतमहं प्राणान्कथंचिद्धारयामि । एवमुक्त्वा प्रस्थापितो वीरस्तां प्रणिपत्य महोदधेः पारं गंतुं पर्वताग्रे जगाम । तत उत्प्लुत्य पादाभ्यां गिरिं पीडयन्वायुवेगेन जगाम । स पर्वतस्त्रिंशद्योजनमुच्छ्रितोऽपि महीसमानत्वं जगाम । मारुतिर्गगनांतस्थो महाशब्दं चकार । तं श्रुत्वा सर्वे वानरा हर्षाविष्टा महास्वनं चक्रुः । हनुमान्कृतकार्यः समागत इति शब्देनैव विजानीमो, वानराः प्लवगर्षभं पश्यतैवं ब्रुवत्सु कपिषु मारुतिर्गिरिमूर्ध्न्यवतीर्य तानुवाच मया सीतादेवी दृष्टा, सकानना लंका भग्ना, दशग्रीवः संभाषितश्च । रामसुग्रीवसन्निधिमिदानीमेव गच्छामः । इत्युक्ताः सर्वे वानरा हर्षेण तमालिंग्य केचिल्लांगूलं चुचुंबुः केचिन्ननृतुः । अथ हनुमता समेतास्ते प्रस्रवणगिरिं जग्मुः । गच्छंतो मार्गे सुग्रीवरक्षितं मधुसंज्ञितं वनं ददृशुः । तदा वानरर्षभा अंगदं प्राहुर्वयं क्षुधिताः स्मः । अनुज्ञां देहि फलानि भक्षयामोऽमृतवन्मधु पिबामः संतुष्टा राघवं द्रष्टुं गच्छामः । अंगद उवाच । हरिसत्तमा अयं हनुमान्कृतकार्यस्तस्य प्रसादतः फलमूलानि भक्षयत । तत उपवनं प्रविश्य हरयो मधु पातुमारेभिरे । रक्षिणस्ताननादृत्य ताडयामासुः । ततस्तान्मुष्टिभिश्चूर्णयित्वा मधु पपुः । ततो रक्षिमुख्यो दधिमुखः क्रुद्धः कैश्चित्सह सुग्रीवसन्निधिं गत्वाब्रवीद्देव चिरकालाभिरक्षितं मधुवनमद्य कुमारेणांगदेन हनुमताच नाशितं । तच्छ्रुत्वा सुग्रीवो हृष्टमानसोऽब्रवीद्वायुपुत्रेण कार्यं कृतं, न संदेहोऽत्र । पवनात्मजः सीतां दृष्ट्वागतः । नोचेन्मम मधुवनं द्रष्टुं कः समर्थो भवेत् ? सुग्रीववचनं श्रुत्वा रामोऽब्रवीद्राजन्किमुच्यते सीताकथान्वितं ? सोऽब्रवीद्देव धरासुता दृष्टा । हनुमत्प्रमुखा वीरा मधुकाननं प्रविष्टाः सकलं भक्षयंतिस्म र-

क्षिणस्ताडयांतिस्म च । देवकार्यमकृत्वा ते मम मधुवनं द्रष्टुं न समर्थाः । ततः सीतादेवी दृष्टेति मया निश्चितं । रक्षिणो वो भयं मास्तु । ममाज्ञया गत्वांगदप्रमुखान्ममांतिकमानयत । सुग्रीववचनं श्रुत्वा दधिमुखादयो वायुवेगेन गत्वा हनुमत्प्रभृतीनूचुरीश्वरशासनाद्गच्छत । रामलक्ष्मणान्वितः सुग्रीवो युष्मान्द्रष्टुमिच्छति । त्वयस्तेऽतिहृष्टा युष्मान्स्वसमीपागमनाय मन्मुखेन त्वरयंति । तथेति सर्वे वानरा हनूमंतमंगदं च पुरस्कृत्यांबरमासाद्य ययू रामसुग्रीवयोरग्रे सत्वरं निपेतुश्च । हनूमान्रामं साष्टांगं प्रणिपत्य प्राह मया सीता निरामया दृष्टा । राजेंद्र जानकी शुचान्विता त्वां कुशलं पप्रच्छ । प्रभो साशोकवनिकामध्ये शिंशपामूलमाश्रिता राक्षसीभिः परिवृता निराहारा कृशा हा राम रामेति शोचंती मलिनांबरैकवेणी मया दृष्टा शनैराश्वासिता च । सूक्ष्मरूपेण वृक्षशाखांतरे स्थित्वा तव जन्मतस्तस्या दर्शनांतं सर्वं वृत्तांतं शनैः कथयित्वा जानकी दर्शनादद्य मे प्रयासः फलित इत्युदीरितं । तदाकर्ण्य केन मे कर्णपीयूषं सुवचनं श्रावितं, यदि सर्वमिदं सत्यं स महाभागो मद्दर्शनपथमायात्विति साब्रवीत्तदाहमवतीर्य तां देवीं प्रणम्य प्रांजलिर्भूत्वा दूरादेव स्थित आसं । कस्त्वमित्यादि बहुविस्तरं देव्या पृष्टेन मया क्रमेणैव सर्वं विज्ञापितं, पश्चाद्भवद्दत्तांगुलीयकमर्पितं । तेन मय्यतिविश्वस्ता साब्रवीद्धनुमन्राक्षसीनां तर्जनैर्दिवानिशं पीड्यमानां मां यथा दृष्टवानसि तथा सर्वं राघवाय कथय । मया चोक्तं देवि रामोऽपि त्वच्चिंतापरिनिष्ठितस्त्वद्वार्तामनधिगम्य त्वामहोरात्रं शोचति । इदानीमेव गत्वाहं तव स्थितिं तस्मै कथयामि । रामस्तच्छ्रुत्वा वानरानीकपैःसार्धं तवांतिकमागमिष्याति, रावणं सकुलं हत्वा त्वां स्वपुरीं नेष्यति । देवि रामो यथा मां विश्वसेत्तथा किंचिदभिज्ञानं देहीति मयोक्ता चूडापाशस्थितमिदं शिरोरत्नं दत्वा पुरा चित्रकूटगिरौ जातं काकवृत्तमप्याह । ततोऽश्रुपूर्णाक्ष्याह राघवं कुशलं ब्रूहि, मयाज्ञभावेन किंचिद्दुरुक्तं भाषितं तत्क्षमस्वेति लक्ष्मणं ब्रूहि, रामः कृपान्वितो यथा मां मोचयेत्तथा कुर्वित्युक्त्वा रुदती महता दुःखेनावृता मां प्रस्थापयामास । तदागमनवेलायामहं रावणप्रियामशोकवनिकामुत्पाट्य तत्र बहून्राक्षसान्दशाननसुतमक्षं च हत्वा रावणेनाभिभाष्य लंकामशेषतो दग्ध्वा क्षणात्पुनरप्यगमम् । इति हनुमद्भाषितं श्रुत्यात्यंतं प्रहृष्टधी राम उवाच । हनुमन्देवैरपि सुदुष्करं कार्यं त्वया कृतं, इदानीं मम सर्वस्वं ते प्रयच्छामि । मम परिरंभो लोके दुर्लभ इत्युक्त्वा सार्द्रनेत्रो वानरपुंगवं तमाकृष्य परमप्रीत्या गाढमालिलिंग ॥

यत्पादपद्मयुगलं तुलसीदलाद्यैः ॥
संपूज्य विष्णुपदवीमतुलां प्रयांति ॥
तेनैव किं पुनरसौ परिरब्धमूर्ती ॥
रामेण वायुतनयः कृतपुण्यपुंजः ॥ १ ॥

इति ग० रा० सुं० कां० पंचमः सर्गः ॥ ५ ॥

इति सुंदरकांडः समाप्तः

---

# अथ युद्धकांडप्रारंभः

श्रीमहादेव उवाच । श्रीरामो हनुमतोऽखिलं भाषणं श्रुत्वा महता हर्षेणावृत उवाच । यद्देवैरपि सुदुष्करं, भूतले यदन्येन मनसा स्मर्तुमपि न शक्यं तत्कार्यं हनुमता कृतं । शतयोजनविस्तीर्णं पयोनिधिं को लंघयेत् ? राक्षसैर्गुप्तां लंकां धर्षयितुं को वा क्षमः ? सुग्रीवस्य भृत्यकार्यं महत्सूनुनाशेषं कृतं । ईदृशो लोके न भूतो न भविष्यति । जानकीक्षेमं कथयता हनूमताद्याहं लक्ष्मणो रघुवंशः कपीश्वरः सुग्रीवश्च रक्षिताः स्मः । सीतापरिमार्गणरूपं कार्यं सम्यक्कृतं परं समुद्रं स्मृत्वा मम मनः सीदति । शतयोजनविस्तीर्णं नक्रझषाकीर्णं वारिराशिं लंघयित्वा रिपुं कथं हन्यां जानकीं कथं द्रक्ष्यामि च ? इति रामवचनं श्रुत्वा चिंतातुरं तं सुग्रीवः प्राह अत्यायतं महाजलचराकीर्णं समुद्रं लंघयिष्यामो लंकां धक्ष्यामो रावणं च हनिष्यामः। रघुश्रेष्ठ चिंतां त्यज । सैव कार्यविनाशिनी । एतान्महासत्वांच्छूरान्स्वत्प्रियं कर्तुं पावकमपि प्रवेष्टुमुद्युक्तान्वानरपुंगवान्पश्य । प्रथमं समुद्रतरणे निश्चयमातिष्ठ । लंकादर्शने जातेऽस्माभी रावणो हत इत्येव वयं मन्महे। प्रभो गृहीतधनुषस्तेऽभिमुखो यो रणे तिष्ठेत्तं कंचिदपि त्रिषु लोकेषु न पश्यामि । राम सर्वथा नो जयो भविष्यति न संशयः । इति भक्तिवीर्यसमन्वितं सुग्रीववचनं श्रुत्वा रामस्तदंगीकृत्य पुरःस्थितं हनूमंतमब्रवीद्येन केन प्रकारेण महार्णवं लंघयामः । देवदानवैर्दुःसाध्यं लंकास्वरूपं मे ब्रूहि । तज्ज्ञात्वा तस्य प्रतीकारं करिष्यामि ॥

रामस्य वचनं श्रुत्वा हनूमान्विनयान्वितः प्रांजलिरुवाच । देव यथा दृष्टं ब्रवीमि। लंका त्रिकूटशिरःस्थिता दिव्या पुरी स्वर्णप्राकाराट्टालकसंयुता निर्मलोदकपूर्णाभिः परिखाभिः परिवृतास्ते । सा नानोपवनैर्दिव्यवापीभिर्मणिस्तंभमयैः शुभैर्गृहैश्च विचित्रशोभाढ्या वर्तते । तस्याः पश्चिमद्वारमासाद्य सहस्रशो गजवाहास्तिष्ठंति । उत्तरे द्वारेऽर्बुदसंख्याकाः साश्ववाहाः पत्तयो रक्षिणस्तिष्ठंति । तथैव प्राच्यां । दक्षिणद्वारमाश्रिता बहवो राक्षसवीरास्तिष्ठंति । मध्यकक्ष्यायामप्यसंख्याः सगजाश्वरथपत्तयः । प्रभो नानास्त्रकुशला राक्षसा लंकां सदा रक्षंति । विविधैः संक्रमैः शतघ्नीभिश्च लंका संयुतास्ति । देवेश एवं स्थितेऽपि तत्र तव दासचेष्टितं शृणु । दशाननबलौघस्य चतुर्थांशो मया हतो लंकां दग्ध्वा स्वर्णप्रासादो धर्षितः शतघ्न्यः संक्रमाश्च नाशिताः । देव त्वद्दर्शनादेव लंका भस्मसाद्भवेत् । प्रस्थानं कुरु । महावीरैर्वानरैः सह लवणांबुधेः परं तीरं गच्छाम ॥

इति हनुमद्वाक्यं श्रुत्वा रघुनंदन उवाच सुग्रीव सर्वान्सैनिकान्प्रस्थानायाभिनोदय । इदानीमेव विजयो मुहूर्तः परिवर्तते । अस्मिन्मुहूर्ते गत्वाहं राक्षससंकुलां सप्राकारां सुदुर्धर्षां सरावणां लंकां नाशयिष्यामि सीतामानेष्यामि च । मम दक्षिणाक्ष्यधः स्फुरति । तरस्विनां वानराणां सर्वा वाहिनी प्रयातु । अग्रे पृष्ठे पार्श्वयोश्च यूथपाः सेनां रक्षंतु । अहं हनूमंतमारुह्याग्रे गच्छामि ततोऽगदमारुह्य लक्ष्मणो यातु । सुग्रीव त्वं मयासहायाहि । गजो गवाक्षो मैंदो नलो नीलो जांबवान्सुषेणश्च तथापरे सर्वे शत्रुघातिनः सेनापाः सर्वत्र गच्छंतु । इति हरीनाज्ञाप्य सलक्ष्मणः सुग्रीवसहितः सेनामध्यगतो रामः सहर्षं प्रतस्थे । वारणेन्द्रनिभाः कामरूपिणः क्ष्वेलंतः परिगर्जंतः फलानि भक्षयंतोऽद्य रावणं हनिष्याम इति राघवस्याग्रे ब्रुवंतोऽतुलविक्रमाः कपिश्रेष्ठा दक्षिणां दिशं प्रतस्थिरे । हरिभ्यामुह्यमानौ तौ रघूत्तमौ नक्षत्रैः सेवितौ चंद्रार्काविवांबरे शुशुभाते । सा महती चमूः कृत्स्नां पृथ्वीमावृत्य जगाम । पुच्छाग्राणि प्रस्फोटयंतः पादपानुद्वहंतः शैलाग्राण्यारोहयंतोऽसंख्या हृष्टा वानरा मरुद्वेगतो दिवारात्रं जग्मुः क्वचित्क्षणमपि नासजन् । मलयसह्ययोर्विचित्राणि काननानि दृष्ट्वा तौ गिरी आक्रम्य क्रमेण सर्वे भीमनिःस्वनं समुद्रमाययुः ॥

अथ सलिलसमीपं प्राप्य रामः सुग्रीवमाह वयं सर्वे मकरालयं समुद्रं प्राप्ताः स्मः । अस्य पारं गंतुमशक्यं । अत्र सेनानिवेशोऽस्तु । अस्य जलधेस्तरणोपायान्मंत्रयामः । स तथेत्युक्त्वा कपिकुंजरै रक्षितां सेनां सागरांतिके

क्षिप्र न्यवेशयत् । भीमनक्रचक्रभयंकरं महोन्नततरंगाढ्यं गगनाकारमगाधं घोरदर्शनं सागरं वीक्ष्य कपयो विषेदुः । राक्षसाधमो रावणोऽस्माभिरवैव हंतव्यः परममुं घोरं वरुणालयं कथं तरिष्याम इति चिंताकुलाः सर्वे रामपार्श्वे व्यवस्थिता आसन् ॥

रामः परात्मा पुरुषः पुराणो ॥
नित्योदितो नित्यसुखो निरीहः ॥
तथापि मायागुणसंगतोऽसौ ॥
सुखीव दुःखीव विभाव्यते बुधैः ॥

इति रा० रा० युद्धकांडे प्रथमः सर्गः ॥ १ ॥

---

लंकायां देवानामपि दुष्करं हनूमता कृतं कर्म दृष्ट्वा रावणो ह्रियाकिंचिदवाङ्मुखः सर्वान्मंत्रिण आहूयाब्रवीत् हनूमता यत्कर्म कृतं तद्भवद्भिर्दृष्टमेव । स कपिर्दुर्धर्षां लंकां प्रविश्य दुरासदां सीतां दृष्ट्वा राक्षसवीरान्मम सुतं च हत्वा लंकां विशेषेण दग्ध्वा युष्मान्सर्वानतिक्रम्य पुनः स्वस्थानमगात् । इतोऽस्माभिः किं कर्तव्यं केन कार्येण मम हितं भवेत्तद्यूयं मंत्रविशारदाः प्रयत्नेन मंत्रयध्वं ॥

राक्षसा अब्रुवन् देव लोकजितस्तव रणे रामात्कुतः शंका ? तव पुत्रेणेन्द्रो बद्ध्वा पत्तने निक्षिप्तः कुबेरं जित्वा पुष्पकमानीय त्वया तदुपभुज्यते । वरुणो हुंकृतेनैव जितः । कालदंडादपि भयं न कुतो मानुषाद्भयं ! महासुरो मयो भीत्या स्वयमेव तुभ्यं कन्यां दत्वा त्वद्वशं वर्तते । सर्वे राक्षसास्त्वदधीनाः । यत्तु हनूमद्धर्षणं तदस्माकं नाश्चर्यकारकं । अयं वानरः किमस्मदहितं करिष्यति, वानरे पौरुषदर्शनेन किं फलमित्यस्माभिरुपेक्षितः । हनूमानयमेवंरूप इति यदि वयमज्ञास्याम तर्हि जीवंतं कथममोक्ष्याम ? प्रभो अस्मानाज्ञापय सर्वं जगदवानरममानुषं च कृत्वायास्यामः ॥

तदा कुंभकर्णो रावणं प्राह राक्षसेश्वर यत्कर्म त्वयारब्धं तत्केवलमात्मनाशाय । सीताहरणकाले त्वं भाग्याद्रामेण न दृष्टः । यदि स त्वामिदानीं द्रक्ष्यति त्वं न जीविष्यसि । रामो न मानुषः । असौ साक्षान्नारायणः सीता भगवती लक्ष्मीः । सा त्वया राक्षसानां विनाशायानीता । महामीनो बडिश

स्थविषपिंडं निगीर्य यथा पश्चात्तप्यति तथा त्वं रामपत्नीमानीयाद्य किं भविष्यतीति तप्यसे । अजानता त्वया यद्यप्यनुचितं कर्म कृतं तथापि तवानुज्ञयाहं रामेण संधास्ये स्वस्थचित्तो भव ॥

कुंभकर्णवचः श्रुत्वेंद्रजिदब्रवीद्देव मामनुज्ञां देहि । रामं सलक्ष्मणं सुग्रीवं वानरांश्च हत्वा तवांतिकमायास्यामि ॥

अथ तत्रागतो भागवतप्रधानः श्रीरामपादविनम्रो बिभीषणो देवारिसमीपमुपविष्टः कुंभश्रवणादिमत्तप्रमत्तदैत्यानतिविस्मयेन विलोक्य कामातुरं दशाननं प्राह राजन्कुंभकर्णेन्द्रजितौ महापार्श्वमहोदरौ निकुंभकुंभौ वा केऽप्यन्ये युधि राघवस्याग्रे स्थातुं न शक्नुवंति । त्वं सीताभिधानेन महाग्रहेण ग्रस्तः । न च ते ततो विमोक्षः । तामेव रत्नादिना सत्कृत्य रामाय दत्वा सुखी भव । यावद्रामस्य शिताः शिलीमुखा लंकामभिव्याप्य रक्षसां शिरांसि न छिंदंति यावन्नगाभा महाबला नखदंष्ट्रयोधिनो गिरींद्रतुल्याः कपयो लंकां समाक्रम्य न विनाशयंति तावज्जानकीं प्रदातुमर्हसि । त्वं तामदत्वा सुरेंद्रैः शंकरेण वा गुप्तो देवराजांकगतो मृत्युलोकं पातालानि वा संप्रविष्टो रामेण जीवन्न मोक्ष्यसे । इति बिभीषणस्य शुभं हितं पवित्रं च वचः स खलो म्रियमाण औषधमिव नैव प्रतिजग्राह ॥

अथ कालेन नोदितः स दैत्यराड् बिभीषणमब्रवीद्धिक् त्वां रक्षःकुलाधमम् । मद्दत्तभोगैः पुष्टांगो मत्समीपे वसन्नपि प्रतीपमाचरसि । हितकारिणो ममैव मित्रभावेन शत्रुर्जातोऽसि न संशयः । कृतघ्नेनानार्येण मे संगतिर्न युज्यते **विनाशमभिकांक्षंति ज्ञातीनां ज्ञातयः सदा** इति वचः सत्यं भाति योऽन्यो निशाचर एवंविधं ब्रूयात्तं तस्मिन्क्षण एव हनिष्यामि । त्वं तु भ्रातृत्वादवध्योऽसि ॥

रावणेनैवं परुषमुक्तः सन्महाक्रोधाविष्टो गदापाणिर्बिभीषणश्चतुर्भिर्मंत्रिभिः सार्धं सभामध्यादुत्पपातापिच गगनस्थोऽब्रवीद्रावण मा विनाशमुपैहि । त्वं यद्यपि हितवादिनमेव मां धिक्करोषि तथापि ज्येष्ठो भ्राता पितुः समः अतः सर्वं सहे तव हितं ब्रवीमि च । सर्वसंहर्ता कालो राघवरूपेण जातः काली सीताभिधानेन जाता । तावुभावत्र भूमेर्भारापनुत्तये आगतौ । तेनकालेनैव प्रेरितस्त्वं हितं न शृणोषि । कालरूपी भगवान्ब्रह्मणा प्रार्थितस्त्वद्वधार्थमिहागतः । सत्यसंकल्प ईश्वरस्तव नाशादन्यत्कथं कुर्यात् । स त्वां सपुत्रबलवाहनं हनिष्यति । रावण त्वां कृत्स्नं राक्षसकुलं च हन्यमानं द्रष्टुं न

शक्नोम्यतो राघवं शरणं गच्छामि । मयि याते सुखी भूत्वा भवने चिरं र-
मस्व । इत्युक्त्वा सपरिच्छदं गृहं विसृज्य रामपादसेवाभिकांक्षी क्षणात्तत्सन्नि-
धिं जगाम ॥

बिभीषणो रावणवाक्यतः क्षणात् ॥
विसृज्य सर्वं सपरिच्छदं गृहम् ॥
जगाम रामस्य पदारविंदयोः ॥
सेवाभिकांक्षी परिपूर्णमानसः ॥

इति ग० रा० यु० कां० द्वितीयः सर्गः ॥ २ ॥

---

अथ महाभागो बिभीषणश्चतुर्भिर्मंत्रिभिः सार्धमागत्य रामसंमुखं गग-
ने समवस्थित उच्चैरुवाच । भोः स्वामिन् तव दारहर्तू रावणस्यानुजो नाम्ना
बिभीषणोऽहं भ्रात्रा निरस्तस्त्वामेव शरणमागच्छामि । देव तस्याविदितात्मनो
मया तत्समीपे हितमुक्तं । सीतां रामाय प्रेषयेति पुनः पुनरुक्तोऽपि कालपा-
शवशंगतो न शृणोति । स राक्षसाधमः खड्गमादाय मां हंतुं प्राद्रवत्ततो भ-
याच्चतुर्भिर्मंत्रिभिः सहाचिरेण त्वां शरणमागतः । प्रभो मां त्रातुमर्हसि ॥

बिभीषणवचः श्रुत्वा सुग्रीवोऽब्रवीद्राम अयं मायावी राक्षसाधमो न
विश्वासार्हः सीताहर्तुरनुज इति विशेषेण न विश्वास्यः । सायुधैर्मंत्रिभिरागत-
श्छिद्रमन्विष्यास्मान्निहनिष्यति तस्मादेव मामाज्ञापय । वानरैरयं हन्यतामेवं म-
म हेतुः । अतःपरं प्रमाणं रघुनायकः । ममैवं भाति तव बुद्ध्या किं निश्चितं वद ॥

इति सुग्रीववचनं श्रुत्वा रामः सस्मितमब्रवीत्कपिश्रेष्ठ यदीच्छामि स-
कलाँल्लोकान्निमिषार्धेन संहन्यां निमिषार्धतः सृजामि च । तं राक्षसं शीघ्रमा-
नय । सकृदेव प्रपन्नाय तवास्मीतिच याचमानायाभयं ददाम्येतन्मम व्रतं ॥

रामस्य वचनं श्रुत्वा सुग्रीवो हृष्टमानसो बिभीषणमानाय्य राघवं द-
र्शयामास । बिभीषणस्तु रघूत्तमं साष्टांगं प्रणिपत्य कृतांजलिपुटो भूत्वा परया
भक्त्यान्वितो हर्षगद्गदया वाचा धनुर्बाणधरं शांतं प्रसन्नमुखपंकजं लक्ष्मणेन
समन्वितं रामं स्तोतुमुपचक्रमे । अथ तस्य भक्त्या स्तुत्याच प्रसन्नो भक्तवत्स
लः श्रीरामः प्रोवाच वांछितं वरं वृणीष्व । अहं वरदोऽस्मि । बिभीषण उ-
वाच । धन्योऽस्मि त्वत्पाददर्शनान्मुक्तोऽस्मि मत्सदृशो लोके नास्ति । राम

राजेंद्र विषयसंभवं सुखं न याचे । त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे । तच्छ्रुत्वा रामः प्रीतः पुनः प्रोवाच भद्र शृणु ते मम रहस्यं वक्ष्यामि । मद्भक्तानां हृदयेऽहं सीतयासह नित्यं वसामि । तस्मात्त्वं सर्वदा शांतो मां ध्यात्वा संसारान्मोक्ष्यसि । इत्युक्त्वा लक्ष्मणं प्राह एष इदानीमेव मम संदर्शनफलं पश्यतु । सागराज्जलमानयामुं लंकाराज्येऽभिषेक्ष्यामि । आचंद्रार्कमसौ राज्यं करोतु । इत्युक्त्वा जलमानाय्य सीतापतिस्तं तस्य सचिवैर्लक्ष्मणेन च लंकाराज्याधिपत्यार्थमभिषेकं कारयामास । सर्वे वानराः साधु साध्विति सहर्षं जगदुः । अथ सुग्रीवो बिभीषणं परिष्वज्याब्रवीद्बिभीषण वयं सर्वे रामस्य किंकरास्तत्र त्वं मुख्यः । रावणस्य विनाशे साहाय्यं कर्तुमर्हसि । बिभीषण उवाच । कियानहं परमात्मनः सहायत्वे किंतु भक्त्या दास्यं करिष्ये ॥

अथ शुकनामा दशग्रीवेण संदिष्टो महासुरोंऽबरे संस्थितः सुग्रीवमिदमब्रवीत् राक्षसाधिपो रावणो भ्रातरं त्वामाह त्वं महाकुलप्रसूतो वनचारिणां राजा भ्रातृसमानः । मया तवार्थविप्लवो न कृतः । अहं तस्य राजपुत्रस्य रामस्य भार्यामहरं तत्र तव का हानिः ? त्वं हरिभिः सह किष्किंधां प्रयाहि । लंका दैवतैरपि प्राप्तुं न शक्या साल्पसत्वैर्वानरैर्मनुष्यैश्च कथं प्राप्या भवेत् ? इति रावणवचनं प्रापयंतं तं वानराः क्षिप्रमुत्प्लुत्य दृढमुष्टिभिर्निहंतुमारेभिरे । वानरैर्हन्यमानः स राममब्रवीत्प्रभो राजानो दूतान्न घ्नंति । शुकस्य परिदेवितं श्रुत्वा तं मावधिष्टेति रामो वानरान्निवारयामास । शुकः पुनरंबरमासाद्य सुग्रीवमब्रवीद्राजन् दशमुखं किं वक्ष्यामि ब्रूहि व्रजाम्यहं । सुग्रीव उवाच । रावणो राक्षसाधमः सपुत्रबलवाहनो मया यत्नाद्धंतव्यः । रामचंद्रस्य भार्यां हृत्वा क्व यास्यसीति तं स्तेनं ब्रूहि । ततो रामाज्ञयो शुकं धृत्वा बद्ध्वान्वरक्षत् । शार्दूलो नामापरस्तेन सहागतो राक्षसः सर्वं महत्कपिबलं दृष्ट्वा निवृत्य रावणाय यथादृष्टं वृत्तांतं कथयामास । रावणस्तस्य श्रवणेनैव चिंतापरो भूत्वा मंदिरं निश्वसञ्जगाम ॥

अथ रामः समुद्रं वीक्ष्य रक्तांतलोचनो लक्ष्मणमब्रवीत्पश्य वत्सासौ दुष्टो वारिधिर्मामुपागतं नाभिनंदति मम दर्शनार्थं नायाति । अयं मानुषो वानरैर्मे कां हानिं करिष्यतीति मन्यते । अस्त्वद्य मम बलं पश्य । वार्धिं शोषयिष्यामि, वानराः पादाभ्यामेव गमिष्यंति । इत्युक्त्वा क्रोधताम्राक्ष आरोपितधनुर्धरस्तूणीराद्बाणमादाय संधाय चापमाकृष्याब्रवीदिदानीं सर्वभूतानि रामस्य शरविक्रमं पश्यंतु । सरित्पतिं भस्मसात्कुर्यां । राम एवं ब्रुवति वसुधा चचाल

द्यौश्च दिशश्च तमसा वृताः सागरश्चुक्षोभ तिमिनक्रमीनाः प्रतप्ताः परितत्रसुः । एतस्मिन्नंतरे साक्षात्सागरो दिव्यस्रग्भृद्दिव्याभरणसंपन्नः स्वोदरस्थदिव्यरत्नानि कराभ्यां परिगृह्य तद्बहूपायनं रामस्य पादयोः क्षिप्त्वा दंडवत्प्रणिपत्याह पाहि पाहि जगन्नाथ राम त्रैलोक्यरक्षक । निखिलजगत्सृजता त्वयाहं जडरूपः सृष्टः । देवनिर्मितं स्वभावमन्यथा कर्तुं कः समर्थः ? जडबुद्धिर्मूर्खोऽहं त्वां लीलया मानुषाकार्ति कथं जानामि ? पशूनामिव दंड एव मूर्खाणां सन्मार्गप्रापकः । त्वत्कृतदंडात्त्वत्स्वरूपं ज्ञातं । प्रणतवत्सल शरण्यं त्वां शरणं व्रजामि । तव लंकामार्गं ददामि । अभयं देहि मे । राम उवाच अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यतां ? शीघ्रमस्य लक्ष्यं मे दर्शय । रामस्य वचनं श्रुत्वा करे महाशरं दृष्ट्वा महोदधिरब्रवीत्प्रभो उत्तरप्रदेशे द्रुमकुल्या इति विश्रुता देशाः संति तत्र बहवः पापात्मानो मां दिवानिशं बाधंते तत्रायं शरः पात्यतां । रामेण विसृष्टो बाणः क्षणादाभीरमंडलं हत्वा पुनः समागत्य तूणीरे पूर्ववत्स्थितः । ततः सागरो विनयान्वितो राममब्रवीन्मम जले नलः सेतुं करोतु । स विश्वकर्मणः सुतो लब्धवरो धीमान् कपिरस्मिन्कार्ये समर्थः । लोकाः सकलमलापहां तव कीर्तिं जानंतु । इत्युक्त्वा राघवं नत्वा सिंधुरदृश्यतां ययौ । ततो रामो नलं सेतुबंधने शीघ्रमाज्ञापयत् । सोऽतिहृष्टः प्लवगेंद्रः सर्वैर्वानरैर्युतः शतयोजनायतं सुविस्तृतं दृढं सेतुं पर्वतपादपैः पंचभिर्दिनैर्बबंध॥

ततोऽतिहृष्टः प्लवगेंद्रयूथपै ॥
र्महानगेंद्रप्रतिमैर्युतो नलः ॥
बबंध सेतुं शतयोजनायतं ॥
सुविस्तृतं पर्वतपादपैर्दृढम् ॥ १ ॥

इति ग० रा० यु० कां० तृतीयः सर्गः ॥ ३ ॥

---

अथ सेतुमारभमाणो रामस्तत्र रामेश्वरं शिवं लोकहिताय संस्थाप्य पूजयित्वाह '**प्रणमेत्सेतुबंधं यो दृष्ट्वा रामेश्वरं शिवं । ब्रम्हहत्यादिपापेभ्यो मुच्यते मदनुग्रहात्**' । यो नरः संकल्पपूर्वकं सेतुबंधे स्नात्वा रामेश्वरं दृष्ट्वा वाराणसीं गत्वा गंगासलिलमानीय रामेशमभिषिंचेत्स ब्रह्म प्राप्नुयात् । ततः स नलेन प्रथमदिवसे चतुर्दश योजनानि सेतुं बंधयामास तथा द्वितीये विंश-

तिं तृतीय एकविंशतिं चतुर्थे द्वाविंशतिं पंचमे त्रयोविंशतिं च । एवं नलः शत योजनविस्तीर्णं सेतुं पंचभिर्दिनैर्बबंध तेनासंख्याताः कपयो द्रुतं जग्मुः । लंकां दिदृक्षू राघवौ मारुत्यंगदावारुह्य तुंगं गिरिशिखरं जग्मतुः । नानाचित्रध्वजाकुलां सुविस्तीर्णां चित्रप्रासादसंबाधां स्वर्णप्राकारतोरणां परिखाभिः शतघ्नीभिश्च विराजितां लंकां दृष्ट्वा तैः प्रासादसौधे सुविस्तीर्णप्रदेशे मंत्रिभिः सह स्थितः किरीटदशकोज्वलः कालमेघसमप्रभोऽनेकै रत्नदंडैः सितच्छत्रैश्च परिशोभितो दशकंधरोऽपि दृष्टः ॥

एतस्मिन्नंतरे वानरैस्ताडितो बद्धमुक्तः शुको रावणमुपागतः । तं दृष्ट्वा दशाननः प्रहसन्प्राह शुक परैः पीडितोऽसि किं ? शुको ऽब्रवीत्सागरस्योत्तरे तीरे गत्वा तव वचनमब्रवं । तत्क्षणे कपय उत्प्लुत्य मां गृहीत्वा मुष्टिभिर्नखैर्दंतैश्च हंतुं प्रचक्रमुः । ततो रक्ष रक्षेति क्रोशंतं मां विसृज्य रघूत्तमः कपीनाज्ञापयामास । ततो वानरबलं दृष्ट्वाहं भीत्यागतः । देवदानवयोरिव वानरराक्षसबलयोः संधिरशक्यः । पुरप्राकारमागतांस्तान्पश्य । रावण क्षिप्रमेकतरं कुरु, सीतां वा प्रयच्छ रामेण युध्यस्व वा । रामो मामाह शुक रावणं ममेदं वचनं ब्रूहि यद्बलमाश्रित्य मम प्रिया त्वया हृता तेनाधुना ससैन्यं सबांधवमात्मानं च यथाकामं दर्शय । श्वः प्रातःकाले सप्राकारां सराक्षसां लंकां मया शरैर्विध्वंसितां पश्य । इत्युक्त्वा रामो विरराम । रावण श्रीरामो लक्ष्मणः सुग्रीवो बिभीषण एते चत्वारः पुरुषर्षभा एव लंकां नाशयितुं समर्थाः । लंकामुत्पाट्य भस्मीकरणे सर्वे वानरास्तिष्ठंतु राम एक एव लंकानाशेऽलं । तामसंख्यां वानरसेनां पश्य । तत्र पर्वतसन्निभा वानरा गर्जंति ते गणयितुं न शक्या अतस्तेषां मुख्यानेव ब्रवीमि । एष यो यूथपानां सहस्राणां शतेन परिवारितो लंकाभिमुखो नदंस्तिष्ठति स सुग्रीवसेनाधिपतिरग्निनंदनो नीलः । एष यः पर्वतशृंगाभः पद्मकिंजल्कसन्निभः पुनः पुनर्लांगूलं स्फोटयति सोऽतिवीर्यवान्वालिपुत्रो युवराजोंऽगदनामा । एषोऽतिविख्यातो हनूमान्येनेहागत्य रामस्य प्रिया जनकजा दृष्टा तव पुत्रोऽक्षो हतश्च । एष रजतसंकाशो यः सुग्रीवमागत्य तूर्णं पुनर्गच्छति स महाबुद्धिपराक्रमः श्वेतः । यस्त्वेष सिंहसंकाशः स महासत्वो रंभः । य एष लंकां दिधक्षन्निव पश्यति स कोटियूथपनायकः शरभः । असौ बली विश्वकर्मसुतः सेतुकर्ता नलः । रावण वानराणां वर्णने वा संख्याने कः समर्थः ? सर्वे महाकायाः शूरा युद्धाभिकांक्षिणो रक्षोगणैः सह लंकां चूर्णयितुं शक्ताः । तस्मात्त्वमभिमानं त्यज

सीतां रामाय समर्प्य तत्पादानुचरो भव । तव हितं वदामि मद्वाक्यमंगीकुरु ।

सत्संगतिं कुरु भजस्व हरिं शरण्यम् ॥
श्रीराघवं मरकतोपलकांतिकांतम् ॥
सीतासमेतमनिशं धृतचापबाणम् ॥
सुग्रीवलक्ष्मणविभीषणसेवितांघ्रिम् ॥

इति रा० रा० यु० कां० चतुर्थः सर्गः ॥ ४ ॥

---

अथ रावणः शुकमुखोद्गीतं वाक्यं श्रुत्वा क्रोधताम्राक्षो दहन्निव तमब्रवीदनुजीव्य सुदुर्बुद्धे गुरुरिव कथं भाषसे ? अहं त्रिजगतां शासिता मां शिक्षयमाणः कथं न लज्जसे ? इदानीमेव त्वां हन्यां किंतु तव पूर्वकृतं स्मरामि तेन वधोचितमपि त्वां रक्षामि । विमूढ इतो गच्छ । तव दुर्वचः श्रोतुं न पारयेऽहं । शुको वेपमानो यथाज्ञापयति देव इत्युक्त्वा गृहं ययौ ॥

असौ शुकः पूर्वं ब्रह्मनिष्ठो ब्रह्मवित्तमः स्वकर्मकृद्ब्राह्मणो वानप्रस्थविधानेन वने तिष्ठन्नासीत् । देवनामभिवृद्ध्यर्थं सुरद्विषां विनाशाय च स यज्ञवितातिं चकार । शुको देवहितोद्यत इति ज्ञात्वा तस्मै राक्षसाश्चुकुपुः । तदा वज्रदंष्ट्र इति ख्यातः कश्चिदसुरः शुकापकारं विज्ञायावसरं प्रेप्सुरासीत् । अथ कदाचिदगस्त्यः शुकाश्रममागतः । स तेन संपूजितो भोजनार्थं निमंत्रितश्च । स मुनिः स्नानार्थं गंगां गतः । अत्रांतरे वज्रदंष्ट्रोऽगस्त्यरूपं धृत्वागत्य शुकं प्राह ब्रह्मन्यदि मे भोजनं दास्यसि सामिषं देहि, छागमांसं मया बहुकालं न भुक्तं । तथेत्युक्त्वा शुकः सविस्तरं मांसयुक्तं भोज्यं कारयामास । मुनौ अनंतरं भोक्तुमुपविष्टे स खलः शुकभार्यारूपं धृत्वा तस्मै सुपक्वं नरमांसं दत्वांतर्दधे । अगस्त्योऽमेध्यं मानुषं मांसं दृष्ट्वा चुकोपाब्रवीच्च दुर्मते मह्यमभक्ष्यं मांसं दत्तवानसि तस्मान्मानुषाशनो राक्षसो भूत्वा तिष्ठ । इति शप्तः शुकः प्राह मुने मेऽद्य मांसं देहीतीदानीं त्वया भाषितं तथैव दत्तं । किं मे शापं प्रददासि ? शुकस्य वचनं श्रुत्वा स सुधीर्मुहूर्तं ध्यानमास्थितस्तदा रक्षःकृतं सर्वं ज्ञात्वा शुकं प्राह ऋषे तवापकारिणा राक्षसेनेदं सर्वं कृतं । अविचार्यैव मया ते शापो दत्तस्तथापि मे वचोऽमोघं यथोक्तं भविष्यत्येव । यावद्रामो रावणवधायागमिष्यति तावत्त्वं रक्षोवपुरास्थाय रावणस्य साह्यकृत्-

ष । रामे लंकासमीपं प्राप्ते रावणेन प्रेषितस्त्वं चारो भूत्वा रमापतिं दृष्ट्वा शापाद्विनिर्मुक्तो भविष्यसि । ततो रावणं बोधयित्वा मुक्तः परं पदमवाप्स्यसि । इत्यगस्त्येनोक्तः शुको ब्राह्मणः सद्यो राक्षसो भूत्वा रावणं प्राप्य संस्थित इदानीं चाररूपेण रामं दृष्ट्वा पुनर्ब्राह्मणो भूत्वा वैखानसैः सह वने तस्थौ ॥

ततो माल्यवान्नामा महाबुद्धिमान्नीतिनिपुणो वृद्धो राक्षसो रावणस्य मातामहः समागमत् । स प्रशांतेनात्मना प्राह राजन्मम वचः शृणु पथ्यं यथेप्सितं कुरु । यदा जानकी नगरं प्रविष्टा तदारभ्य लंकायां घोरोत्पाता दृश्यंते । नाशसूचकांस्तान्वदामि । खरनिर्घोषा अतिभयंकरा मेघा उष्णेन शोणितेन लंकां सदाभिषिंचंति । देवप्रतिमाः स्विद्यंति प्रचलंति च । कालिका प्रतिराक्षसाभिमुखं पुरःस्थिता विकसितदंतैर्हसति । गोषु खराः प्रजायंते । मूषकौ मार्जारैर्युद्ध्यते । शृगालो विकटो मुंडः कृष्णपिंगलः पुरुषरूपधृक्कालः सर्वेषां गृहाणि सायं प्रातरवेक्षते । एवंविधान्यन्यान्यपि निमित्तान्युद्भवंत्यतो दशाननकुलस्य रक्षार्थं शांतिं कुरु । देव सीतां सत्कृत्य रामं प्रतियच्छ । रामं नारायणं विद्धि तस्मिन्विद्वेषं त्यज । तं भक्तिभावेन भज । राजेन्द्र कुलकुशलहेतवे मद्वाक्यं कुरु । इति माल्यवतोक्तं हितं कालवशमागतः स दुष्टात्मा नामर्षयदपिच क्रुद्धो भूत्वा प्राह शाखामृगैः सेवितमेकं मानवं मे पराजये कथं समर्थं मन्यसे ? त्वं नूनं रामेण प्रेरितोऽतोऽनर्गलं प्रलपसि । इतो गच्छ मत्कर्णपदवीमेतत्तव वचो दहति । त्वं वृद्धो बंधुरस्यतः सर्वमेतावत्सोढं । इत्युक्त्वा प्रासादाग्रं प्रतस्थे ॥

अथ सर्वसचिवैः सह तत्रासीनः कपिसैनिकान्पश्यन्रावणो राक्षसान्युद्धायायोजयत् । रामो रावणं समासीनं दृष्ट्वा कोपकलुषितो धनुरादाय शशांकनिभेनैकेन बाणेन निमिषार्धेन तस्य श्वेतच्छत्रसहितं किरीटदशकं चिच्छेद । तेन रावणोऽतिलज्जितस्तूर्णं गृहं प्रविश्य प्रहस्तप्रमुखान्सर्वान्राक्षसानाहूय युद्धाय नोदयामास । ततो भेरीमृदंगपणवानकगोमुखाद्यैर्वाद्यैर्महिषोष्ट्रखरसिंहद्वीपिवाहनाः खड्गशूलधनुःपाशयष्टितोमरशक्त्याद्यायुधधरा असंख्या राक्षसाः सर्वतः प्रतिद्वारमुपाययुः । तत्पूर्वमेव रामेण नोदिता वानरर्षभा महांति शैलशृंगाण्युद्यम्य विविधांस्तरूंश्चोत्पाट्य रावणस्यानीकानि प्रेक्षमाणा लंकाप्राकारमारुरुहुः “ **रामो जयत्यतिबलो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणानुपालितः** ” इति गर्जंतः प्लवमानाः पादपपर्वतहस्ताः सर्वे वानरा हनुमदंगदनलनीलशरभमैंदद्विविदजांबवद्दधिवक्त्रतारकेसर्यादिबलि-

यूथपानुगामिनो लंकाद्वाराण्युत्प्लुत्य सर्वतः पुरं भृशं रुरुधुः। वानरा नखैर्दं-तैश्चैव रक्षांसि निजघ्नुः। महाबला महाकाया भीमा राक्षसा द्वारेभ्यो रुषा निर्गत्य वानरांस्ततो निःसार्य भिंदिपालैः शूलैः खड्गैः परश्वधैश्च निर्जघ्नुः। वानरराक्षसानां समरोऽभूत्। रणभूर्मांसशोणितपंकिला बभूव। रक्षोव्याघ्राः कपिकेसरिणश्च परस्परजयैषिणो दशदिशो नादयंतोऽन्योऽन्यं जघ्नुः। हरयो दिविजांशजा रामेण विष्णुना दृष्टाः पीतामृता इव हृष्टाः पापेन रावणेन पालितान्हतश्रीकान्राक्षसानोजसा जघ्नुः। तै राक्षसबलं चतुर्थांशावशेषं निहतं दृष्ट्वा रावणात्मजो ब्रह्मदत्तवरः श्रीमान्मेघनादोऽतर्धाय सर्वास्त्रकुशलो ब्रह्मास्त्रेण सहितानि नानाविधानि शस्त्राणि शरधाराश्च ववर्ष तदद्भुतमिवाभवत्। रामः सर्वास्त्रविदां वरोऽपि ब्रह्मास्त्रं मानयन्क्षणं तूष्णीमुवास। अथ वानरबलं पतितं दृष्ट्वानलसन्निभः कुपितः प्राह सौमित्रे चापमानय ब्रह्मास्त्रेणासुरं क्षणाद्भस्मीकरोमि। अद्य मम बलं पश्य। मेघनादोऽपि तच्छ्रुत्वा भीतस्तूर्णं नगरं जगाम॥

वानरानीकं पतितं दृष्ट्वा रामोऽतिदुःखितो मारुतिमुवाच महामते क्षीरमहोदधिं शीघ्रं गच्छ। तत्र दिव्यौषधिसमुद्भवो द्रोणगिरिरस्ति तं द्रुतमानय। महासत्त्वान्वानरौघान्जीवय तेन तव कीर्तिः सुस्थिरा भवेत्। मारुतिर्यथाज्ञापयति देव इत्युक्त्वा सत्वरं जगाम द्रोणगिरिमानीय सर्वान्वानरान्जीवयित्वा पुनस्तं पर्वतं स्वस्थाने स्थापयित्वा द्रुतमाययौ। अथ वानराणां बलौघतः पूर्ववद्भैरवं नादमाकर्ण्य रावणो विस्मयमापन्नोऽब्रवीद्देवविनिर्मितोऽसौ मे महाञ्छत्रुः प्राप्तः। मम सेनानायका मंत्रिणो बांधवाश्च ये मत्प्रियकांक्षिणः शूरास्ते सर्वे मम शासनाद्युद्धाय समरभूमिं त्वरितं गच्छंतु। ये भीरवः प्राणविप्लवाद्योद्धुं न गच्छंति तान्मच्छासनपराङ्मुखानहं स्वयं हनिष्यामि। तच्छ्रुत्वा भयसंत्रस्ताः सर्वे निर्जग्मुः। अतिकायः प्रहस्तो महानादो महोदरो देवांतकनरांतकौ देवशत्रुर्निकुंभश्चापरे बहवः शूराः शतसहस्रशो राक्षसा निर्गत्य विविधैरस्त्रैर्वानरसैन्यं जघ्नुः। हरियूथपा रामतेजःसमावेशेन बलिष्ठाः सर्वान्राक्षसनायकान्व्यापादयामासुः॥

सर्वेश्वरः सर्वमयो विधाता॥
मायामनुष्यत्वविडंबनेन॥
सदाचिदानंदमयोऽपिरामो॥

युद्धादि लीलां वितनोति मायाम् ॥ २ ॥

इति ग० रा० यु० कां० पंचमः सर्गः ॥ ५ ॥

---

अतिकायमुखं महासैन्यं युद्धे नष्टमिति श्रुत्वा रावणो दुःखसंतप्तः क्रोधावृतश्चेंद्रजितं लंकारक्षणार्थं संस्थाप्य स्वयं युद्धाय जगाम। स महाबलो राक्षसेंद्रः सर्वशस्त्रास्त्रसंयुतं दिव्यस्यंदनमारुह्य राममेवाभिदुद्राव। आशीविषोपमैर्बाणैर्वानरान्बहुशो हत्वा सुग्रीवप्रमुखान्यूथनायकान्पातयामास। गदापाणिं स्वानुजं महासत्वं बिभीषणं दृष्ट्वा मयदत्तां महाशक्तिं तस्मिन्नुत्ससर्ज। बिभीषणविघातिनीं तामापतंतीमालोक्य रामेण दत्ताभयोऽयमसुरो न वधार्ह इत्युक्त्वा वीर्यवाँल्लक्ष्मणस्तस्य पुरतोऽचल इवाकंपस्तस्थौ। अमोघसामर्थ्या सा शक्तिस्तदा लक्ष्मणतनुं विवेश। यावंत्यः शक्तयो लोके संभवंति तासामाधारभूतस्य शेषांशस्य लक्ष्मणस्य तया का हानिर्भवेत्तथापि मानुषं भावमापन्नस्तदनुव्रतो सुमित्रासुतो भूमौ मूर्छितः पपात। दशाननस्तं हर्तुमैच्छत्परं हस्तैश्चालयितुमपि नाशक्नोत्तेनातिविस्मित आसीत्। सर्वजगदाधारं तं स लघुराक्षसः कथं तोलयेत्! मारुती रावणं सौमित्रिनाशोत्सुकं दृष्ट्वा क्रुद्धो वज्रकल्पेन मुष्टिना तमुरस्याजघान तेन प्रहारेण स जानुभ्यां भुव्यपतदुत्थाय चास्यैर्बहु रुधिरमुद्वमन्विघूर्णमाननयनो रथमुपाविशत्। अथ हनूमाँल्लक्ष्मणं बाहुभ्यां परिगृह्य रामसामीप्यमनयत्। मारुतेः सौहार्देन भक्त्याच रामस्तुतोष। सा शक्तिरपि लक्ष्मणं नारायणांशजं ज्ञात्वा त्यक्त्वा रावणस्य रथं प्रागात्। रावणः शनैः शनैः संज्ञामवाप्य बाणासनं गृहीत्वा रामं रुषाभिदुद्राव। रामोऽपि तं दृष्ट्वा क्रुद्धो हनूमंतमारुह्य वज्रनिष्पेषनिष्ठुरं ज्याशब्दं कृत्वासुरेंद्रमुवाच। राक्षसाधम पुरस्तिष्ठ ममापराधं कृत्वाद्य क्व गमिष्यसि? येन बाणेन जनालये ते राक्षसा निहतास्तेनैव त्वां हनिष्यामि। रामवचः श्रुत्वा रावणस्तं वहंतं मारुतात्मजं तीक्ष्णैः शरैरताडयत्। आहतस्यापि महाकपेस्तेजो व्यवर्धत स ननर्द च। हनूमंतं सव्रणं दृष्ट्वा रघूत्तमोऽपरः कालरुद्र इव क्रुद्धः शत्रोः साश्वं रथं ध्वजं सूतं शस्त्रौघं धनुश्छत्रं पताकां च शितसायकैस्तरसा चिच्छेद। ततः पाकारिः पर्वतमिव वज्रकल्पेन महाशरेण रावणमंजसा विव्याध। रामबाणहतः स वीरश्चचाल मुमोहच। तस्य हस्ताच्चापं पतितं दृष्ट्वा रामोऽर्धचंद्रेण बाणेन तस्योज्ज्वलं किरीटं छित्वा तं प्रत्युवाच बाणपीडितस्त्वमिदानीं

गृहं गच्छ । गंतुमनुजानामि त्वां । लंकामाश्वासय मम बलं श्वो द्रक्ष्यसि इति । रावणो हतदर्पो महत्या लज्जया युक्तो लंकां प्राविशत् ॥

अथ रामो लक्ष्मणं भुवि पातितं मूर्छितं दृष्ट्वा शोकाकुलो मारुतिं प्राह वत्स पूर्ववन्महौषधीः समानीय मम भ्रातरं वानरांश्च जीवय । स महाकपिस्तथेत्युक्त्वा वायुवेगेन जगाम । एतस्मिन्नंतरे चारात्तद्वृत्तं श्रुत्वा चिंतापरो भूत्वा रावणो रात्रावेकाकी कालनेमिगृहं जगाम । तं समालोक्य विस्मितः कालनेमिरर्घ्यादिकं कृत्वा प्रांजलिरुवाच । राजेंद्र किमागमनकारणं ? रावण उवाच । ममापि कालवशतः कष्टमुपस्थितं । मया शक्त्या हतो लक्ष्मणो भुवि पतितोऽस्ति । तं जीवयितुमौषधीरानेतुं हनुमान्गतः । यथा तस्य विघ्नं भवेत्तथा कृत्वा गृहमेहि । कालनेमिः प्रत्युवाच रावणाद्य मम वचस्तत्त्वतोऽवधारय । अहं तव प्रियं करवाण्येव प्राणान्न धारयामि । पुरा मृगरूपिणो मारीचस्य या गतिरभूत्सैव मम भविष्यति । दशानन तव पुत्राः पौत्रा बांधवा राक्षसाश्च हताः । राजन्नसुरकुलं घातयित्वा जीवितेन राज्येन देहेन वा तव किं फलं ? सीतां रामाय प्रयच्छ राज्यं बिभीषणाय दत्वा वनं याहि । प्रातः शुभजले स्नात्वा संध्यादिकाः क्रियाः कृत्वा तत एकांतमाश्रित्य सर्वतः संगं विसृज्य प्रकृतेर्भिन्नमात्मानं विचारय ततो मुक्तो भविष्यसि ॥

भजस्व रामं परिपूर्णमेकं<br>
विहाय वैरं निजभक्तियुक्तः ।<br>
हृदा सदाभावितभावरूप<br>
मनामरूपं पुरुषं पुराणम् ॥ १ ॥

इति रा० रा० यु० कां० षष्ठः सर्गः ॥ ६ ॥

---

रावणस्तदमृतसन्निभं कालनेमिवचः श्रुत्वा क्रोधताम्राक्षोऽद्भिरग्निमत्सर्पिरिव जज्वालेवाच च मच्छासनपराङ्मुखं दुरात्मानं त्वां निहन्मि । परैर्दत्तं किंचिद्गृहीत्वा त्वमेवं भाषसे । कालनेमिरुवाच देव किं क्रुधा ? यदि मे वचस्ते न रोचते तद्गत्वा तवाज्ञापितं करोमि । इत्युक्त्वा प्रतस्थे । अथ हिमवत्पार्श्वे गत्वा गच्छतो महामतेर्मरुत्सूनोर्मार्गमासाद्य मुनिवेषधरः शिष्यैः परिवृतस्तपोवनमकल्पयत् । श्रीमान्पवननंदनस्ततो गत्वा शुभमाश्रमपदं दृष्ट्वा चिंतयामासैतन्मुनिमं

डलं मया पूर्वं न दृष्टं । नन्वयं मे मार्गभ्रंशो वा दृष्टिभ्रंशः ? अथवा किमनेन विचारेण ? आश्रमं प्रविश्य मुनीन्द्रं दृष्ट्वा जलं पीत्वा ततो द्रोणाचलं यास्यामि । इत्युक्त्वा सर्वतो योजनायतं कदलीशालखर्जूरपनसादिभिरानम्रशाखैः पक्वफलपादपैः समावृतं शुभलक्षणमाश्रमं प्रविवेश । तत्र स कालनेमिः कपटमुनिः शिवपूजनं चकार । हनूमांस्तं गौरवेणाभिवाद्याह भगवन्रामदूतोऽहं नामतो हनूमान्कार्यगौरवेण क्षीराब्धिं गंतुमुद्यतः । मां तृषा बाधते । ब्रह्मन्जलं कुत्र विद्यते कथ्यतां । राक्षस उवाच मम कमंडलुगतमुदकं पातुमर्हसि । इमानि पक्वानि फलानि भुंक्ष्व तदनंतरमत्र निद्रामेहि गमने त्वरा मास्तु सुखेनात्र निवस । भूतं भवत् भविष्यच्च तपसा जानामि । लक्ष्मणः सर्वे वानराश्च रामवीक्षिताः सुप्ता इवोत्थिताः । हनुमानाह कमंडलुजलेन मे तृषा न शाम्यत्यधिका वर्तते जलं दर्शय । स तथेति बटुमाज्ञापयामास बटो वायुसूनुं जलाशयं दर्शय । अथ हनूमंतं प्राह तोयं पीत्वाक्षिणी निमील्य ममांतिकमागच्छ मंत्रमुपदेक्ष्यामि तेनौषधीर्द्रक्ष्यासि । तथेति बटुदर्शितं तोयाशयं प्रविश्य हनुमान्मीलितेक्षणः पानीयमपिबत् । ततो महामाया घोररूपिणी मकर्यागत्य तं महावेगादग्रसत् । आत्मानं ग्रसमानां तां रुषा दृष्ट्वा मारुतिस्तस्या वदनं हस्ताभ्यां दारयामास तेन सा ममार । ततोऽतरिक्षे दिव्यरूपधरांगना ददृशे । साब्रवीत्कपीश्वर अहं धान्यमालीति विख्याताप्सराः कारणविशेषेण मुनिना शप्ता त्वत्स्पर्शाद्धतकल्मषा शापाद्विमुक्ता ब्रह्मलोकं गच्छामि । यस्तु त्वयाश्रमे मुनिवेषधरो दृष्टोऽसौ महासुरः कालनेमिस्तव मार्गे विघ्नं कर्तुं रावणेन प्रहितस्तं दुष्टं जहि । इत्युक्त्वा सा स्वर्गं ययौ । हनूमानप्याश्रमं ययौ । तं समालोक्य कालनेमिरभाषत वानरसत्तमातिविलंबः किं कृतः ? मत्तो मंत्रान्गृहाण मे गुरुदक्षिणां देहि । इत्युक्तो मुष्टिं बद्ध्वा गृहाणैतां दक्षिणामित्युक्त्वा तं निजघान । कालनेमिर्मुनिवेषं विसृज्य नानामायाविधानतो युयुधे । हनूमांस्तं मुष्टिना शिरस्याजघान तेन भग्नमूर्धा स ममार ॥

ततः क्षीरनिधिं गत्वा द्रोणगिरावौषधीरदृष्ट्वा मारुतिस्तमेवोत्पाट्य गृहीत्वा सत्वरं रामसन्निधिं गत्वोवाच देवेशायं महागिरिरानीतः । यद्युक्तं तत्कुरु विलंबो न युज्यते । रामः संतुष्टमानस औषधीर्गृहीत्वा लक्ष्मणस्यामयचिकित्सां कारयामास । ततः सुप्तोत्थित इव सौमित्रिरुवाच दशानन तिष्ठतिष्ठ क्व गंतासि ? त्वामिदानीं हन्मि । इति ब्रुवंतं तमालिंग्य मूर्ध्न्यवघ्राय रामः प्राह महाकपे मारुते त्वत्प्रसादादद्य मम भ्रातरं निरामयं पश्यामि । अ-

थ युयुत्सुभिर्वानरैः सार्धं बिभीषणमतेन पुनर्युद्धाय समुपस्थितः ॥

रामबाणैर्विद्धो रावणः सिंहेन मातंग इव व्यथितो गृहमगच्छत् । तत्र सिंहासन उपविश्य राक्षसानब्रवीत्पूर्वं पितामहो मानुषेणैव मे मृत्युमाह । भुवि कोऽपि मर्त्यो मां हंतुं शक्तो नास्ति । ततः साक्षान्नारायणो मानुषो भूत्वा मां हंतुं समुपस्थितो न संशयः । अनरण्येन पूर्वमहं शप्त आसं । मद्वंशे परमात्मोत्पत्स्यते तेन त्वं सकुलं हनिष्यस इति मां शप्त्वा स दिवं गतः । स एव रामो मद्वधार्थं संजातो मां हनिष्यति इति । कुंभकर्णो मूढः सदा निद्रावशं गतः । तं विबोध्य ममांतिकमानयत । इत्युक्ता राक्षसाः केचित्तूर्णं गत्वा यत्नतस्तं विबोध्य भ्रातृसान्निध्यं निन्युः । स राजानं नमस्कृत्यासनमुपविवेश । अथ रावणो दीनया गिरा तमाह कुंभकर्ण जागृहि महत्कष्टमुपस्थितं । मम पुत्राः पौत्रा बांधवाः सैनिकाश्च रामेण निहताः । किं कर्तव्यमिदानीं न जाने । रामः समुद्रं तीर्त्वा नो मूलं परिकृंतति । युद्धे वानराणां क्षयं न पश्याम्यतस्त्वं परिबोधितोऽसि । महाबाहो भ्रातुरर्थे सुदुष्करं कर्म कुरु । इति रावणस्य परिदेवितं वचनं श्रुत्वा कुंभकर्ण उच्चैर्जहासाब्रवीच्च राक्षसेश्वर पुरा मंत्रविचारे यन्मया गदितं तदद्य पापकर्मणः फलं त्वामुपतिष्ठति । मायामानुषविग्रहे रामे वैरं त्यज । इदानीमपि तं भक्तिभावेन भज तेन भगवान्प्रसीदति ।

ये राममेव सततं भुवि शुद्धसत्वा
ध्यायंति तस्य चरितानि पठंति संतः ।
मुक्तास्त एव भवभोगमहाहिपाशैः
सीतापतेः पदमनंतसुखं प्रयांति ॥ १ ॥

इति ग० रा० यु० कां० सप्तमः सर्गः ॥ ७ ॥

---

कुंभकर्णवचः श्रुत्वा दशग्रीवो भ्रुकुटीविकटानन आसनादुत्पतन्निव जगाद त्वं सुबुद्धिमानिति ज्ञानबोधाय न मया प्रार्थ्यसे । मया कृतमंगीकुरु यदि रोचते युद्धयस्व नोचेन्निद्रावशो भव । अधुना त्वां निद्रा बाधते । रावणमतं ज्ञात्वा कुंभकर्णस्तूर्णं युद्धाय निर्ययौ । महापर्वतसन्निभः स राक्षसः प्राकारं लंघयित्वा महास्वनेन समुद्रमभिनादयन्वानरान्रुषा भक्षयन्बाहुभ्यां पीडयामास । हरिवाहिन्यां कालांतकमिव भ्रमंतं मुद्गरेण हरींस्ताडयंतं पाणिपादेन

चूर्णयंतं भक्षयंतं च दृष्ट्वाखिला वानरा दुद्रुवुः । गदापाणिर्विभीषणस्तं दृष्ट्वा महामते भ्रातरि दयां कुरु तवानुजोऽहमित्युक्त्वा चरणौ ननाम । तस्य वृत्तांतं श्रुत्वा तं समालिंग्य कुंभकर्णोऽब्रवीद्वत्स राक्षसानां कुलसंरक्षणार्थं त्वं रामाश्रयेण जीव । त्वं महाभागवतोऽसीति मया पुरा नारदाच्छ्रुतं । तात इदानीं गच्छ मदमत्तविलोचनस्य मे स्वकीयपरकीयविवेकोऽधुना नष्टः । इत्युक्तोऽश्रुमुखो बिभीषणो भ्रातुः पादावभिवंद्य रामपार्श्वमुपागत्य चिंतापर उपस्थितः । कुंभकर्णोऽपि कराभ्यां चरणाभ्यांच हरीन्पेषयन्गंधहस्तिवद्वानरीं सेनां नाशयामास । राघवस्तं दृष्ट्वा क्रुद्धस्तस्मिन्वायव्यास्त्रं चिक्षेप तेन तस्य समुद्गरो दक्षहस्तश्चिच्छिदे । स हस्तोऽनेकान्कपीनर्दयन्भूमौ पतितः । अथ वानरा भयेन वेपमाना रामकुंभश्रवणयोर्युद्धं पश्यंतस्तूष्णीं बभूवुः ॥

---

कुंभकर्णश्छिन्नहस्तः शालमुद्यम्य राघवं हंतुं दुद्राव । स ऐंद्रास्त्रेण स शालं तं भुजमच्छिनत् । पुनश्छिन्नबाहुं नर्दंतं तमायांतं वीक्ष्य रामोऽर्धचंद्राकारौ द्वौ बाणावादाय तस्य पदद्वयं चिच्छेद । निकृत्तपाणिपादः कुंभकर्णो विकटं वक्त्रं व्यादाय राहुश्चंद्रमसमिव रामचंद्रं ग्रस्तुमभिदुद्राव । रघूत्तमः सिताग्रैः सायकैस्तस्य वदनं पूरयित्वा सूर्यप्रतीकाशं वज्रसममुत्तमं शरं तस्य मृत्यवे चिक्षेप । तेन कृत्तं पर्वतसन्निभं स्फुरत्कुंडलदंष्ट्रकं रक्षोधिपतेः शिरो लंकाद्वारं रुरोध । तत्कबंधो महोदधौ पतितो नक्रादीनचूर्णयत् । ततो देवाः समुनयो गंधर्वाः किन्नराः सिद्धाश्च कुसुमासारान्रामे वर्षंतस्तमीडांचक्रिरे । अथ देवमुनीश्वरो नारदो रामं द्रष्टुं गगनातूर्णमाजगाम । स इंदीवरश्याममीषत्ताम्रविशालाक्षमिंद्रनीलांचितबाहुकं शरपीडितान्वानरान्दयार्द्रदृष्ट्या पश्यंतं साष्टांगं प्रणिपत्य हर्षगद्गदया वाचा स्तुत्वोवाच राम त्वया देवहितेच्छया महत्कार्यं कृतं । कुंभकर्णवधेनाद्य भूभारो नष्टप्रायः । श्वः सौमित्रिरिंद्रजितं हनिष्यति । अहं नभोगतः सुरसिद्धसंघैः सह सर्वं पश्यामि । देवेश मामनुगृण्हीष्व सुरालयं गच्छामि । इत्युक्त्वा पुनर्नत्वा नारदो ब्रह्मलोकं ययौ ॥

महाबलं भ्रातरं कुंभकर्णं निहतं श्रुत्वा रावणः शोकसंतप्तो भूमौ मूर्छितः पपातोत्थाय च पुनर्विललाप । पितृव्यं निहतं श्रुत्वा तथा पितरं भ्रातिविव्हलं दृष्ट्वेंद्रजित्प्राह राजेंद्र शोकं त्यज महाबले मयि जीवति दुःखावसरः कुतस्ते ? महामते देवांतक स्वस्थो भव तवाखिलं दुःखं व्येतु । अहं सर्वान्रिपून्हनिष्यामि । निकुंभिलां सद्यो गत्वा हुताशनं तर्पयित्वा ततो रथादिकं लब्ध्वाजेयो भवामि । इत्युक्त्वा निर्दिष्टं हवनस्थलं त्वरितं गत्वा रक्तमाल्यांबर-

वरो रक्तगंधानुलेपनो भूत्वा मौनी हवनायोपचक्रमे ॥

मेघनादस्य चेष्टितं श्रुत्वा बिभीषणो रामाय प्राह दुर्मतेरयं होमः समाप्यते चेदसौ सुरासुरैरजेयो भविष्यति । अतो मयासार्धं शीघ्रं गंतुं लक्ष्मणमाज्ञापय तेन रावणिं घातयिष्यामि । श्रीराम उवाचइंद्रजितं हंतुमहमेवागमिष्यामि । बिभीषणोऽब्रवीद्देव नासावन्येन निहंतुं शक्यते । यस्तु द्वादश वर्षाणि निद्राहारविवर्जितस्तेनैव तस्य मृत्युर्ब्रह्मणा निर्दिष्टः । लक्ष्मणोऽयोध्याया निर्गम्यागतस्तदहात्तव सेवातत्परो निद्राहारादीन्न जानाति । स एव तं हनिष्यति तस्मात्तं मयासह त्वरया गंतुमाज्ञापय । प्रभो त्वं सर्वं जानास्येव ॥

**त्वमेव साक्षाज्जगतामधीशो ॥**
**नारायणो लक्ष्मण एव शेषः ॥**
**युवां धराभारनिवारणार्थं ॥**
**जातौ जगन्नाटकसूत्रधारौ ॥ १ ॥**

इति ग० रा० यु० कां० अष्टमः सर्गः ॥ ८ ॥

---

बिभीषणवचः श्रुत्वा रामोऽब्रवीत्तस्य रौद्रस्य कृत्स्नां मायां जानामि । स ब्रह्मास्त्रविच्छूरो महाबलोऽस्ति । लक्ष्मणस्यापि स्वरूपं जानामि । सर्वं ज्ञात्वैव भविष्यत्कार्यगौरवात्तूष्णीमासं । इत्युक्त्वा लक्ष्मणं प्राह वत्स हनूमत्प्रमुखैः सर्वयूथपैर्महता सैन्येन सह च गत्वा रावणिं जहि । बिभीषणः सचिवैः सह त्वामनुयास्यति । स तं देशं जानाति । रामस्य वचनं श्रुत्वा लक्ष्मणोऽन्यच्छ्रेष्ठं कार्मुकं जग्राह रामपादांबुजं स्पृष्ट्वाब्रवीच्चाद्य मत्कार्मुकान्मुक्ता बाणा इंद्रजितं भित्वा भोगवतीजले स्नातुं पातालं गच्छंतु । एवमुक्त्वा रामं परिक्रम्येंद्रजिन्निधनाकांक्षी सौमित्रिस्त्वरितं ययौ । बहुसहस्रवानरैः सह हनूमत्प्रमुखाः कपींद्रा जांववत्प्रमुखा ऋक्षा मांविभिः सहितो बिभीषणश्च तं त्वरयान्वगुः । निकुंभिलादेशं गत्वा सौमित्रिर्धनुरानम्य सर्ववीरैः सह सन्नद्धोऽभूत् । इन्द्रजिद्रक्षकान्राक्षसान्दृष्ट्वा बिभीषण उवाच । लक्ष्मण यदेतन्मेघश्यामं रक्षोऽनीकं दृश्यतेऽस्य भेदने यत्नवान्भव । अस्मिन्भिन्ने रावणिर्दृग्गोचरो भविष्यति । यावत्तस्य हवनकर्म न समाप्यते तावदभिद्रव । दुरात्मानं जहि । बिभीषणवचः श्रुत्वा लक्ष्मणः शरजालानि ववर्ष । हरियूथपाः सर्वतः पाषाणैः

पादपैश्च दैत्यान्निर्जघ्नुः । तेऽपि परश्वधैर्यष्टितोमरैश्च वानरान्जघ्नुः । तदा महाच्छब्दोऽभूत् । हरिरक्षसां संप्रहारस्तुमुलः संजज्ञे । इंद्रजित्सर्वं स्वबलं मृद्यमानं विलोक्य निकुंभिलां होमं च त्यक्त्वा शीघ्रं रथमारुह्य महता क्रोधेन योद्धुमगमत् । रणमूर्धानि गत्वा सौमित्रिं युद्धाय समाहूयाह लक्ष्मण मेघनादोऽहं मया त्वं जीवन्न मोक्ष्यसे । अथ तत्र पितृव्यं दृष्ट्वा तं निष्ठुरं वचः प्राह दुर्मते त्वमिहैव जातः संवृद्धश्च मम पितुः साक्षाद्भ्राता स्वजनमुत्सृज्य परस्य भृत्यत्वं गतोऽसि, मदीयं छिद्रं शत्रुभ्यो दर्शयसि, पापीयान्मे द्रुह्यसि, धिग्धिक्त्वां कुलघातकं ॥

इत्युक्त्वा महाप्रमाणं घोरं धनुर्विस्फारयन्हनूमत्पृष्ठारूढं लक्ष्मणमब्रवीदद्य मम बाणास्तव प्राणान्हारिष्यंति । ततः सौमित्रिः क्रुद्धः सर्प इव श्वसन्धनुषि बाणं संधाय तस्मिन् ससर्ज । इंद्रजिद्रक्तनयनो लक्ष्मणं समपश्यत् । शक्राशनिसमस्पर्शैर्लक्ष्मणाशुगैराहतो मुहूर्तं मूढो भूतः पुनः प्रत्याहृतेन्द्रियः शरसंपातं वर्षन्लक्ष्मणमब्रवीद्यदि प्रथमे युद्धे मम पराक्रमस्त्वया न दृष्टोऽद्य त्वां दर्शयिष्यामि । इदानीं व्यवस्थितस्तिष्ठ । इत्युक्त्वा सप्तभिर्निशितैः शरोत्तमैर्लक्ष्मणं दशभिर्हनूमंतं शतेनविभीषणं च विव्याध । लक्ष्मणोऽपि तथैव तस्मिञ्छरवर्षाण्यवाकिरत् । तैस्तस्य कांचनप्रभं सुसंविद्धं कवचं च पातयामास । अभीक्ष्णं निश्वसंतौ शरसंवृतसर्वांगौ सर्वतो रुधिरोक्षितौ जयाजयविवर्जितौ महासत्वौ तौ वीरौ सुदीर्घकालमन्योन्यमयुध्येतां । एतस्मिन्नंतरे लक्ष्मणो हस्तलाघवं दर्शयन्पंचभिर्बाणै रावणेः सारथिं साश्वं रथं च समचूर्णयत्तस्य कार्मुकं चिच्छेद च । सोऽपि त्वरितमन्यज्जग्राह । तच्चापि लक्ष्मणः क्षणादच्छिनत् । एवं छिन्नधन्वानं तमनेकसायकैर्विव्याध । भीमविक्रमः स पुनरन्यत्कार्मुकं समादाय शितैर्बाणैर्लक्ष्मणं बिभेद । तत ऐंद्रास्त्राभिमंत्रितं बाणं धनुषि संधायाकर्णांतं ज्यामाकृष्य रामपदांबुजं स्मरन्धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि त्रिलोक्यामप्रतिद्वंद्वस्तदेनं जहि रावणिमिति ब्रुवँल्लक्ष्मणस्तं जिह्मगमिंद्रजिति चिक्षेप । स शरः श्रीमज्ज्वलितकुंडलमिंद्रजिच्छिरश्छित्वा कबंधं भूतले पातयामास । ततः प्रमुदिताः सर्वे देवा रघूत्तमं कीर्तयंतो मुहुर्मुहुः स्तुवंतश्च पुष्पौघान्ववृषुः । शक्रो जहर्ष । आकाशे देवदुंदुभिस्वनःशुश्रुवे । रावणिं निहतं दृष्ट्वा जयश्रीसमन्वितो गतश्रमः सौमित्रिः शंखमापूरयत् ततः सिंहनादं ज्याघोषमकरोच्च । तेन संहृष्टा गतश्रमा वानरास्तुष्टमानसैस्तमीडांचक्रिरे । लक्ष्मणः परितुष्टात्मा हनूमद्विभीषणाभ्यां सहितो राघवमभ्येत्य तं

ज्येष्ठं भ्रातरमभिवंद्याब्रवीत्प्रभो त्वत्प्रसादाद्रावणिः समरे मया जघ्ने । तच्छ्रुत्वा प्रमुदितो रघूत्तमो लक्ष्मणमालिंग्य मूर्ध्न्यवघ्राय सस्नेहमब्रवीत्साधु लक्ष्मण साधु । त्वया दुष्करं कर्म कृतं । तुष्टोऽस्मि निःसपत्नः कृतोऽस्मि । मेघनादस्य निधने सर्वं जितं । तं हतं श्रुत्वाद्य रावणः पुत्रशोकान्मयासह योद्धुं निर्यास्यति तं हनिष्यामि ॥

राक्षसेंद्रो मेघनादं हतं श्रुत्वा भूमौ मूर्छितः पतितः पुनरुत्थाय दीनात्मा पुत्रशोकेन विललाप । रावणः पुत्रस्य गुणकर्माणि संस्मरन्नद्य देवगणः सर्वे लोकपाला महर्षयश्चेंद्रजितं हतं श्रुत्वा निर्भया सुखं स्वप्स्यंतीत्यादि बहुशः पर्यदेवयत् । ततः परमसंक्रुद्धो सर्वान्राक्षसान्युद्धाय गच्छतेत्युक्त्वा सीतां हंतुं प्रदुद्राव । अथ खड्गपाणिं क्रुद्धं दशाननमायांतं दृष्ट्वा राक्षसीमध्यगा सीता भयाकुलाभवत् । एतस्मिन्नंतरे सुपार्श्वो नाम तस्य मेधावी सचिवो रावणमब्रवीद्धो दशानन त्वं साक्षाद्वैश्रवणानुजो वेदविद्याव्रतस्नातोऽनेकगुणसंपन्नः कथं स्त्रीवधमिच्छसि ? अस्माभिः सह युद्धे रामं हत्वा जानकीं प्राप्स्यसीत्युक्त्वा तं सीतावधात्पराङ्मुखं चकार ॥

ततो दुरात्मा सुहृदा निवेदितं ॥
वचः सुधर्म्यं प्रतिगृह्य रावणः ॥
गृहं जगामाशु शुचा विमूढधीः ॥
पुनः सभां च प्रययौ सुहृद्वृतः ॥ १

इति ग० रा० यु० कां० नवमः सर्गः ॥ ९ ॥

---

अथ दशग्रीवः सभामध्ये मंत्रिभिः सह विचार्यावशिष्टै राक्षसैः सह शलभैर्युक्तः शलभः प्रज्वलंतमनलमिव राघवं युद्धेऽभ्यगृष्णोत् । तत्र रामेणैकेन तीक्ष्णबाणेन वक्षसि निहतो व्यथितस्त्वरितं लंकां प्रययौ । रामस्यामानुषं पौरुषं दृष्ट्वा रावणः शीघ्रं शुक्रं गत्वा तं नमस्कृत्य प्रांजलिरब्रवीत् । भगवन्राघवेण लंका विनाशिता । दैत्या मम पुत्राः पौत्रा बांधवाश्च तेनैव निहताः । सद्गुरौ त्वयि तिष्ठति कथं मे दुःखसंदोहः ? इति विज्ञापितः कविरसुरगुरुः प्राह दशानन त्वं रहसि स्थित्वा प्रयत्नेन होमं कुरु । यदि होमेंऽतरायो न भवेत्तर्हि होमानलोत्थितैः साश्वमहारथचापतूणीरसायकैर्युक्तस्त्वमजेयो भविष्य-

सि। द्रुतं मदुपदिष्टैर्मंत्रैर्होमं कुरु। इत्युक्तो रावणः स्वमंदिरे पातालसदृशीं गुहां चकार। लंकाद्वारकपाटानि सर्वत्र यत्नतो बद्ध्वाभिचारकोक्तानि होमद्रव्याणि संपाद्य गुहां प्रविश्य मौनी होमं प्रचक्रमे। तत्रोत्थितं महांतं धूममालोक्य रावणानुजो भयाकुलस्तं धूमं रामाय दर्शयित्वाह राम लंकेश्वरो होमं करोति। यदि होमः समाप्तः स्यात्सोऽजेयो भविष्यति। अतो होमस्य विघ्नाय हरीश्वरानाशु प्रेषयेति। रामस्तथेत्युक्त्वा हनुमत्प्रमुखान्वीरानादिदेश। ते लंकाप्राकारं लंघयित्वा रावणमंदिरं गत्वा रक्षकांश्चूर्णयामासुर्गजाश्वांश्च क्षणादघ्नन्॥

ततश्च सरमानाम्नी बिभीषणस्य भार्या हस्तसंज्ञया होमस्थानमसूचयत्। तज्ज्ञात्वांगदः पादप्रहारैर्गुहापिधानपाषाणं चूर्णयित्वांतः प्रविश्य तत्र दृढासनं मीलिताक्षं दशाननं ददर्श। ततोऽगदाज्ञया सर्वे वानरा द्रुतं गुहां विविशुस्तत्र लोकाहलं चक्रुः सेवकांस्ताडयामासुर्होमसंभारान्कुंडे चिक्षिपुश्च। प्लवगाग्रणीर्हनुमान्रावणस्य हस्तात्स्रुवमाच्छिद्य तं रुषा ताडयामास। अन्येऽपि तं काष्ठैर्दंतैश्चाघ्नन्। तथापि रावणो ध्यानं न जहौ। तदांगदोऽतःपुरं प्रविश्य मंदोदरीं केशपाशे धृत्वानाथामिव विलपंतीं तां रावणस्य पुरतः समानयत्तस्या रत्नभूषितं कंचुकं विददार च। रत्नभूषणानि मुक्ताहारश्च तस्या वपुषो भूमाववाकिरन्। सर्वाणि भूषणानि समंततः पतितानि श्रोणिसूत्रं त्रुटितं। कटिप्रदेशान्नीवी विस्रस्ता। तदा मंदोदरी रावणस्याग्रतो भृशं रुरोद। सकरुणं क्रोशंती दीना तं जगाद रावण त्वं निर्लज्जोऽसि यत्तव भार्याहं तव पुरतः परैरेवं केशपाशे धृत्वा विकृष्यते। किं जुहोषि? कथं न लज्जसे? यस्य पश्यतो भार्या शत्रुभिर्हन्यते तेन तत्रैव देहत्यागः कार्यः। तस्य जीवितान्मरणं वरं। हा मेघनाद ते माता वानरैः क्लिश्यते। त्वमजीविष्यश्चेन्मम कुत ईदृशं दुःखमभविष्यत्? मे भर्त्रा जीविताशया भार्या लज्जा च त्यज्यते। मंदोदर्यास्तत्परिदेवनं श्रुत्वा दशाननः खड्गमादायोत्तस्थौ देवीं त्यजेति ब्रुवन्नंगदं कटिदेशे प्रजहार। ततस्तामुत्सृज्य प्रहर्षिताः सर्वे वानरा रामपार्श्वमुपागम्य तस्थुः॥

ततो रावणो भार्यां परिसांत्वयन्नुवाच देवि शोकं त्यज। जीवता किं न दृश्यते? इदानीमेव गच्छामि रामलक्ष्मणौ हत्वागमिष्यामि नोचेच्छ्रीरामो मां वज्रकल्पैः सायकैर्मारयिष्यति। ततस्तत्पदं गमिष्यामि। तदा त्वया मच्छासनान्मे हेतुः पूरणीयः। त्वं सीतां हत्वा मया सार्धं पावकं प्रवेक्ष्यसि।

एवं नाथवचनं श्रुत्वातिदुःखिता मंदोदर्युवाच नाथ मे सत्यं वाक्यं शृणु तथा कुरु । त्वया चान्यैर्दैत्यै राघवो रणे जेतुं न शक्यः । रामः साक्षात्प्रधानपुरुषः परमेश्वरः । स एव पूर्वस्मिन्कल्पे मत्स्यो भूत्वा वैवस्वतं मनुं सकलापद्भ्यो ररक्ष । समुद्रमंथने लक्षयोजनविस्तृतः कूर्मो भूत्वा कनकाचलं पृष्ठे दधार । वराहरूपेण वपुषा क्षोणीमुद्धरता तेनैवातिदुर्वृत्तो हिरण्याक्षोऽहन्यत । नारसिंहस्य वपुषा लोकत्रयकंटकं हिरण्यकशिपुं दैत्यं स एव व्यापादयामास । त्रिभिः पादैर्जगत्त्रयमाक्रम्य बलिं बद्ध्वासावेव सुरेंद्रं विज्वरमकरोत् । यदा राक्षसाः क्षत्रियाकारा जातास्तदा एष एव परशुरामो भूत्वा भूमेर्भारावहांस्तान्हत्वाखिलां पृथ्वीं काश्यपाय ददौ । स एव परात्परः सांप्रतं भवन्नाशार्थं मानुषत्वमुपागतो रघुवंशे जातः । तस्य भार्या सीता मम पुत्रविनाशार्थं स्वनाशार्थं च त्वया बलात्किमर्थमपहृता ? इतःपरं वैदेहीं रघूत्तमाय प्रेषयस्व । राज्यं बिभीषणाय दत्वावां वनं गच्छाव ॥

इति मंदोदरीवचः श्रुत्वा रावणोऽब्रवीत्प्रिये रणे पुत्रान्भ्रातॄन्राक्षसमंडलंच घातयित्वा जीवितं कथमिच्छामि ? रामेण सह योत्स्ये । तस्य सुग्रीवैर्बाणैर्विदीर्यमाणो विष्णोः परमं पदं यास्यामि । राघवं विष्णुं जानामि । जानकीं लक्ष्मीं ज्ञात्वैव सा मया बलादानीता । संयुगे रामेण निधनं प्राप्य मुमुक्षुभिर्ध्वनितां गतिं प्राप्स्यामि ॥

क्लेशादिपंचकतरंगयुगं भ्रमाढ्यम् ॥
दारात्मजाप्तधनबंधुझषाभियुक्तम् ॥
और्वानलाभनिजरोषमनंगजालम् ॥
संसारसागरमतीत्य हरिं व्रजामि ॥ १ ॥

इति रा० रा० यु० कां० दशमः सर्गः ॥ १० ॥

---

अथ रावणो घोरैर्निशाचरैर्वृतः षोडशभिश्चक्रैर्युक्तं सवरूथं सकूबरं पिशाचवदनैर्घोरैः खरैर्युक्तं सर्वास्त्रशस्त्रसहितं सर्वोपस्करसंयुतं भयावहं दृढं स्यंदनमास्थाय संयुगे रामेण सह योद्धुं प्रययौ । तदा रामपालिता वानरीसेना रणकर्कशं भीषणं तमायांतं दृष्ट्वा संत्रस्ताभूत् । अथ हनूमानुत्प्लुत्य दृढं मुष्टिं बद्ध्वा रावणं वक्षसि ताडयामास । तेन मुष्टिप्रहारेण मूर्छितो दशाननो जा-

नुभ्यां रथेऽपतत् । मुहूर्तेन पुनरुत्थितः प्लवगाधिपमुवाच शूरस्त्वं मम संमतोऽसि । मारुतिराह रावण धिङ्मां यत्त्वं मया हतो जीवसि । त्वं तावन्मम वक्षो मुष्टिना ताडय पश्चान्मया ताडितः प्राणैर्मोक्ष्यसे । रावणस्तदंगीकृत्य तमताडयत्। स कपिराण्निघूर्णमाननयनः किंचित्कश्मलमाययौ पुनः संज्ञामवाप्य रावणं हंतुमुद्यतस्तदा स रक्षोधिपः साध्वसात्ततोऽन्यत्र गतः । अथ हनूमानंगदो नलो नीलश्च समवेता अग्रेऽग्निवर्णं सर्परोमाणं खड्गरोमकं वृश्चिकरोमाणंच भीमविक्रमान्राक्षसान्दृष्ट्वा चत्वारश्चतुरस्तान् हत्वा सिंहनादं च कृत्वा रामपार्श्वमुपागच्छन् । ततः क्रुद्धो दशग्रीवो दशनच्छदं संदश्य नयने विवृत्य राममेवान्वधावद्वज्रोपमैः शरैस्तमाजघान वानरानपि विव्यथे । ततो रामः पावकसंकाशैः कांचनभूषणैः शरैस्तोयदो धाराभिः पर्वतमिव दशकंठमभ्यवर्षत् ॥

तं रक्षोधिपं रथस्थं रघुनंदनं भूमिष्ठं च दृष्ट्वा शक्रो मातलिमाहूयाब्रवीन्मम रथमारुह्य रघूत्तमस्य साहाय्यार्थं शीघ्रं याहि । भूतलं त्वरितं गत्वा मम कार्यं कुरु । एवमुक्तो देवसारथिरिंद्रं नत्वा हरितैर्हयैः स्यंदनोत्तमं संयोज्य स्वर्गाद्रामसमीपमाजगाम । तत्राद्भुतरथे स्थितो मातलिः प्रांजलिरब्रवीद्राम देवराजेन प्रेषितोऽस्मि । प्रभो मघोनोऽयं रथस्तव विजयाय भूयात् । महाराज ऐंद्रचापभूषितमभेद्यकवचखड्गदिव्यतूणीरयुगसमन्वितमेनं रथमारुह्य मया सारथिना वृत्रासुरं शतमन्युरिव देवरिपुममुं राक्षसं जहि । इत्युक्तो रामस्तं दिव्यं रथोत्तमं नमस्कृत्य परिक्रम्य चारुरोह । ततो महात्मनो राघवस्य धीमतो रावणस्य च भैरवं रोमहर्षणं महायुद्धमभवत् । रामः परमास्त्रविद्राक्षसेंद्रस्याग्नेयमस्त्रमाग्नेयेन दैवं दैवेन च प्रतिचकार । दशग्रीवो महता क्रोधेनाविष्टो रामस्योपरि पन्नगास्त्रं मुमोच । तस्य धनुर्मुक्ताः शरा महाविषाः सर्पा भूत्वा राघवं परितोऽपतन् । सर्पवदनैरनलं वमद्भिस्तैः शरैर्दिशश्च व्याप्ता अभवन् । रामः समंतात्सर्पान्पतितान्दृष्ट्वा घोरं सौपर्णमस्त्रं प्रावर्तयत् । राममुक्ताः सायकास्तार्क्ष्यरूपिणो भूत्वा तान्सर्पबाणांश्चिच्छिदुः । युद्धेऽस्त्रे प्रतिहते दशकंठो घोराभिः शरवृष्टिभी राममभ्यवर्षत् । तमर्दयित्वा मातलिं प्रत्यविध्यत् । रथोपस्थं कांचनं केतुं पातयित्वैंद्रानश्वानभ्यहन् । श्रीराममार्ताकारं दृष्ट्वा देवगंधर्वकिन्नरसिद्धचारणर्षयो विषेदुः । सविभीषणा वानरेंद्रा व्यथिता बभूवुः । दशास्यो विंशतिभुजः प्रगृहीतशरासनोऽसुरेंद्रो मैनाकपर्वत इव ददृशे । रामः क्रोधसंरक्तलोचनः कालानलप्रभं बाणमादाय भ्रुकुटिं बद्ध्वा चक्षुर्भ्यां निर्दहन्निवांतिके रिपुं दृष्ट्वा चापमाकृष्य रावणं प्रतिविध्य वानरानीकं हर्षयन्का-

लांतक इवाबभौ । शतं प्रधावतस्तस्य महारौद्रं वदनं दृष्ट्वा सर्वभूतानि तत्रसुः । सर्वंसहा चचाल रावणोऽपि बिभाय । विमानस्थाः सुरगणास्तन्महायुद्धमेकाग्रमनसा ददृशुः । राम ऐंद्रमस्त्रं समादाय रावणस्य शिरांस्यच्छिनत् । तालफलानीव तस्य बहवो मूर्धानो रुधिरोक्षिता रामबाणकृत्ता गगनात्प्रपतंतिस्म । एवमनेकदिनपर्यंतं दारुणं युद्धं ववृते । न दिनं न निशा न संध्या वा लोकैरज्ञायत । रावणस्य शिरसामेकोत्तरशतं छिन्नं तथापि जीवितांतो न बभूव । पुनः पुनः शिरःप्रादुर्भावं दृष्ट्वा रामो विस्मयाविष्टमानसो बभूव । महासत्वपराक्रमा दैत्या यैर्यैर्बाणैर्हतास्त एवैते रावणस्य निपातने निष्फलत्वं याता इति सर्वास्त्रविदि धीरे रामे चिंताकुले समीपस्थो बिभीषण उवाच राघव ब्रह्मदत्तवरो ह्यसौ । अस्य बाहवो मूर्धानश्च विच्छिन्नाः पुनः शीघ्रमुत्पत्स्यंतीति भगवानज आह । तस्य नाभिदेशे कुंडलाकारे गर्तेऽमृतं संस्थितमस्ति । तदाग्नेयास्त्रेण शोषय ततस्तस्य मृत्युर्भवेत् । बिभीषणवचःश्रुत्वा रामः पावकास्त्रेण राक्षसेंद्रस्य नाभिं विव्याध । ततोऽमर्षविव्हलो रावणो घोरां महाशक्तिं बिभीषणवधार्थं चिक्षेप । राघवः शितैर्बाणैस्तां ततो रावणस्य शिरांसि चिच्छेद । दशग्रीवस्य छिन्नेभ्यः शिरोभ्यस्तेजो विनिर्गतं । छिन्नैः शीर्षैर्विकटाकारो म्लानरूपो मुख्यशिरसा युक्तो बाहुभ्यां रामे शरवृष्टिं ववर्ष । ततो घोरं तुमुलं युद्धमभूत् । अथ मातली राघवं संस्मारयामास प्रभो यः सुरैरस्य विनाशकालः कथितः सोऽद्य वर्तते । तस्योत्तमांगं नच्छेत्तव्यं यतोऽसौ शीर्ष्णि न वध्यो मर्मण्येव वध्यः । इति मातलेर्वाक्येन संस्मारितो रामो निःश्वसंतमुरगमिवैकं बाणं जग्राह । तस्य पार्श्वे पवनं फले भास्करपावकौ गौरवे मेरुमंदरौ पर्वणि लोकपालांश्च विन्यस्य भास्करवर्चसोऽपि देदीप्यमानं तं महेषुं वेदप्रोक्तेन ब्रह्मास्त्रविधिनाभिमंत्र्य धनुषि संधाय तं रावणोरसि चिक्षेप । वज्र इव दुर्धर्षः कृतांत इव घोरास्यः शरीरांतकरः स शरो रावणस्य हृदयं तूर्णं विभिद्य प्राणान्हत्वा भूमौ प्रविश्य पुना रामतूणीरं विवेश । स राक्षसेंद्रो गतासुर्वेगेन भुव्यपतत् । तस्य हस्तात्सशरं महत्कार्मुकं पपात । रावणं पतितं दृष्ट्वा हतशेषा राक्षसा अनाथा भयत्रस्ताः सर्वदिशो दुद्रुवुः । दशाननस्य निधनं दृष्ट्वा संहृष्टा वानरा रामविजयं वदंत उच्चैः सिंहनादं चक्रुः । अंतरिक्षे त्रिदशदुंदुभयो व्यनदन् । राघवोपरि स्वर्गात्पुष्पवृष्टिः पपात । देवमुनिसिद्धचारणगंधर्वास्तुष्टुवुरंतरिक्षेऽप्सरसः सर्वतो मुदा ननृतुश्च । रावणस्य देहोत्थमादित्यवत्स्फुरज्ज्योतिर्देवानां पश्यतां रघुश्रेष्ठं प्रविवेश । तद्दृष्ट्वा देवा ऊचुरहो भाग्यं रावणस्य ! वयं तु

सात्विका विष्णोः कारुण्यभाजना भयदुःखादिभिर्व्याप्ताः । अयं तु राक्षसः क्रूरो ब्रह्महातितामसः परदाररतो विष्णुद्वेषी तापसहिंसकोऽपि सर्वभूतेषु पश्यत्सु राममेव प्रविष्टवान् । देवेष्वेवं ब्रुवत्सु नारदः प्राह भो भोः सुरा यूयं धर्मतत्वाविचक्षणा अत्र कारणं शृणुत । रावणो रामात्स्वनिधनं भविष्यमाणं श्रुत्वा भयात्तं सर्वत्र पश्यन्ननिशं हृदि भावयन्स्वप्नेऽपि तत्व्यानपरायण आसीत् । तस्य क्रोधोऽपि गुरुबोधादधिकोऽभवत् । रामध्यानतो निर्धूताशेषकल्मषो रामेण निहतः सायुज्यं प्राप इति ॥

पापिष्ठो वा दुरात्मा परधनपरदारेषु सक्तो यदिस्या ॥
नित्यं स्नेहाद्भयाद्वा रघुकुलतिलकं भावयन्संपरेतः ॥
भूत्वा शुद्धांतरंगो भवशतजनितानेकदोषैर्विमुक्तः ॥
सद्यो रामस्य विष्णोःसुरवरानियुतं याति वैकुंठमाद्यं ॥ १ ॥
हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं ॥
भूमौ विष्टभ्य तिष्ठन्नितरकरधृतं भ्रामयन्बाणमेकं ॥
आरक्तोपांतनेत्रः शरदलितवपुः सूर्यकोटिप्रकाशो ॥
वीरश्रीबंधुरांगस्त्रिदशपतिनुतः पातु मां वीररामः ॥ २ ॥

इति रा० रा० यु० कां० एकादशः सर्गः ॥ ११ ॥

---

अथ श्रीरामो बिभीषणं हनुमंतमंगदं लक्ष्मणं जांबवंतं तथापरान्वीरान्परितुष्टांतःकरणेन दृष्ट्वाब्रवीद्भवतां बाहुवीर्येण मया रावणो निहतः । यावच्चंद्रदिवाकरं वः कीर्तिः स्थास्यति । तां ये कीर्तयिष्यंति ते परमां गतिं यास्यंति । एतस्मिन्नंतरे रावणं भुवि पतितं दृष्ट्वा मंदोदरीप्रमुखास्तस्य स्त्रियः शुशुचुः । बिभीषणो महता शोकेनावृतो बहु विललाप । तस्य परिदेवनं श्रुत्वा रामो लक्ष्मणं प्राह बिभीषणं बोधय । स भ्रातृसंस्कारं करोतु किं विलंबेन । मंदोदरीमुख्याः स्त्रियः पतिता विलपांति ताः स एव निवारयतु । रामेणैवमुक्तो लक्ष्मणो मृतोपांते मृतकोपमं पतितं शोकाकुलं बिभीषणं बहुभिः सूक्तिवचनैः सांत्वयित्वा तत्वोपदेशं कृत्वा शोकान्निवर्तयामास । अथ स विगतमोहो रामपार्श्वमुपागम्याब्रवीत्प्रभो त्यक्तधर्मव्रतं परदाराभिमर्शिनं नृशंसं सं-

स्कर्तुं नार्हामि । तद्वचनं श्रुत्वा रामोऽब्रवीद्विभीषण मरणांतानि वैराणि, नः प्रयोजनं निवृत्तं तस्मादस्य संस्कारः क्रियतां । रामाज्ञां शिरसि धृत्वा स धर्मात्मा महाबुद्धि राज्ञीं मंदोदरीं सांत्वयित्वा स्वबांधवान्संस्कारार्थं त्वरयामास । रावणदेहं चितायां निवेश्य तस्यौर्ध्वदेहिकं पितृमेधविधानत आहिताग्नेर्यथा कार्यं तथा सर्वमकरोत् । विधिपूर्वकं तिलांजलिं दत्वा मूर्ध्ना प्रणम्य ताः स्त्रियः पुनःपुनः सांत्वयामास । तासु सर्वासु राक्षसीषु नगरं प्रविष्टासु बिभीषणो रामपार्श्वमुपागत्य विनीतोऽतिष्ठत् ॥

रामो रिपुं हत्वा सैन्येन सह हर्षं लेभे । मातली रामं परिक्रम्याभिवंद्यच तेनानुज्ञातः स्वर्गं ययौ । ततो हृष्टमना रामो लक्ष्मणमब्रवीद्वत्स मया बिभीषणाय लंकाराज्यं पुरैव दत्तं । इदानीं त्वं गत्वा तं लंकामध्ये विप्रैर्मंत्रविद्भिर्विधिपूर्वकमभिषेचय । इत्युक्तो लक्ष्मणो वानरैः सह तूर्णं गत्वा समुद्रजलपूरितैः सुवर्णकलशै रक्षसेंद्रमभिषिषेच । ततो नानोपायनपाणिभिः पौरैजनैः सार्धमागत्य बिभीषणो रामं दंडवत्प्रणनाम। रामस्तं प्राप्तराज्यं दृष्ट्वा मुदान्वित आत्मानं धन्यं मेने। अथ रामः सुग्रीवं समालिंग्याब्रवीद्वीर तव साहाय्येन रावणो महाबलः शत्रुर्मया जितो बिभीषणोऽपि लंकायां राज्येऽभिषिक्तः । ततः पार्श्वस्थं विनयान्वितं हनूमंतं प्राह त्वं बिभीषणानुमतेन रावणालयं गच्छ । जानक्यै दशाननवधादिकं सर्वं वृत्तमाख्याहि, तस्याः प्रतिवाक्यं मे शीघ्रं निवेदय । एवमाज्ञापितो धीमान्पवननंदनो निशाचरैः पूज्यमानो रावणगृहं प्रविश्य शिंशपामूलमाश्रितां राक्षसीभिः परिवृतां कृशां दीनां राममेव ध्यायंतीं जानकीं दृष्ट्वा प्रणम्य कृतांजलिपुटो भूत्वाग्रतस्तस्थौ । तं दृष्ट्वा सीता तूष्णीं स्थित्वा पूर्वस्मृतिं ययौ । तं रामदूतं ज्ञात्वा सा हर्षात्सौम्यमुखी बभौ । तां प्रसन्नाननां दृष्ट्वा वायुसूनू रामभाषितमाख्यातुमुपचक्रमे । भर्तुः प्रियं वाक्यं श्रुत्वा वैदेही हर्षगद्गदया गिराब्रवीत्किं तेऽद्य प्रियं करोमि ? त्वत्समं भक्तिकारुण्यपूर्णं कमपि न पश्यामि । सीतयैवमुक्तः कपीश्वरः प्रत्युवाच देवि हतशत्रुं विजयिनं रामं यत्पश्यामि तद्विविधरत्नौघाद्देवराज्यादपि विशिष्यते । तस्य वचनं श्रुत्वा मैथिली प्राह सौम्य त्वयि सर्वे सौम्या गुणाः परिनिष्ठिताः । रामं शीघ्रं द्रक्ष्यामि । राघवो मामाज्ञापयतु । स तथेति तां नमस्कृत्य ययौ । अथ रामाय जानक्याः सर्वं भाषितं निवेद्याब्रवीद्देव यन्निमित्तोऽयमारंभः कर्मणां च फलोदयस्तां शोकसंतप्तां देवीं द्रष्टुमर्हसि । हनुमतैवमुक्तो ज्ञानिनां वरो रामो मायासीतां परित्यक्तुमनःस्थापितां प्रियामादातुं च मनसा

ध्यात्वा बिभीषणं प्राह राजन्नाशु गच्छ जनकजां स्नातां विमलवस्त्राढ्यां स-र्वाभरणभूषितां ममांतिकमानय । बिभीषणस्तच्छ्रुत्वा मारुतिना सह जगाम सुवृद्धाभी राक्षसीभिः सीतां स्नापयित्वा सर्वाभरणसंपन्नां तां शिबिकायामा-रोप्य प्रतस्थे । कंचुकोष्णीषवद्भिर्बहुभिर्याष्टीकैर्गुप्तां तां शुभां देवीं द्रष्टुं सर्वे वानरा आगताः । वेत्रपाणयस्तान्वारयंतः सर्वतः कोलाहलं प्रकुर्वंतो राम-पार्श्वमुपाययुः । रामस्तद्दूरादेव दृष्ट्वा प्राह बिभीषण किमर्थं ते वानरान्वार-यंति ? सर्वे वानरा जानकीं मातरमिव पश्यंतु । सा पादचारेण मम स-न्निधिमायातु । तच्छ्रुत्वा सा शिबिकाया अवरुह्य पादचारेण रामांतिकं शनै-रगच्छत् । रामोऽपि तां कार्यनिर्मितां दृष्ट्वा बहुशोऽवाच्यवादानब्रवीत् । रा-घवोदितं तद्वचनममृष्यमाणा सा लक्ष्मणं प्राह देवर हुताशनं शीघ्रं प्रज्वा-लय । रामस्य विश्वासाय लोकानां प्रत्ययायच्च दिव्यं करोमि । राघवानुमतः सौमित्रिर्महाकाष्ठचयं कृत्वा हुताशनं प्रज्वाल्य रामपार्श्वमुपागम्य तूष्णीं तस्थौ । ततः सीता राघवं परिक्रम्य लोकानां देवराक्षसयोषितां चाग्रे देवब्राह्मणां-श्च प्रणम्याग्निसमीपगा बद्धांजलिपुटोवाच यथा मे हृदयं राघवान्नापसर्पति तथा सर्वलोकसाक्षी पावको मां सर्वतः पातु । एवमुक्त्वा सीता दीप्तं ज्वलनं परिक्रम्य निर्भयेन हृदा विवेश । ततो भूतगणाः सीतां महावन्हिगतां दृष्ट्वा दुःखार्ताः परस्परं प्राहुरहो ! रामः सर्वज्ञोऽपि स्वप्रियां श्रियं कथं त्यक्तवा-न् ? इतिवदत्सु तेषु वन्हेर्विनिर्गता सीता रामांतिकमाययौ । तां दृष्ट्वा सर्वे-ऽतिहर्षान्विता बभूवुः ॥

प्रोवाच साक्षी जगतां रघूत्तमम्
प्रपन्नसर्वार्तिहरं हुताशनः ॥
गृहाण देवीं रघुनाथ जानकीम्
पुरात्वया मय्यवरोपितां वने ॥
तिरोहिता सा प्रतिबिंबरूपिणी
कृता यदर्थं कृतकृत्यतां गता ॥
ततोऽतिहृष्टां परिगृह्य जानकीम्
रामः प्रहृष्टः प्रतिपूज्य पावकम् ॥ १ ॥

इति ग० रा० यु० कां० द्वादशः सर्गः ॥ १२ ॥

---

ततः शक्रः कुबेरो वरुणो यमो ब्रह्मा पिनाकी वसवो दिक्पालाः सिद्धाश्चारणा गंधर्वा मुनयः पितरः साध्या अप्सरस उरगाश्चान्ये रामसन्निधिमागत्य प्रांजलयोऽब्रुवन्प्रभो त्वमेव सर्वलोकानामुत्पत्तिस्थितिहेतुः। रावणेनास्माकं तेजसासह स्थानं हतमासीत्तत्त्वत्प्रसादादद्यास्माभिः पुनः प्राप्तं। ततो ब्रह्मेंद्रादयः पृथक्पृथक् तं स्तुतिभिरीडांचक्रिरे। तेषां स्तोत्रैः श्रीरामे प्रसन्ने विमानस्थो भवान्यासहितो भवः प्रोवाच राम त्वां राज्यसत्कृतं द्रष्टुमयोध्यायामागमिष्यामि। इदानमिस्य तव देहस्य जनयितारं द्रष्टुमर्हसि। ततो रामः पुरःस्थितं वैमानिकं दशरथमवलोक्य सहानुजो मुदा भक्त्या तस्य पादौ शिरसा ननाम। दशरथः पुत्रमालिंग्य मूर्ध्न्यवघ्रायाब्रवीद्राम त्वया संसारदुःखसागरे तारितोऽस्मि। इत्युक्त्वा पुनरालिंग्य ययौ। अथ रामो देवराजं कृतांजलिं दृष्ट्वा प्राह सहस्राक्ष मत्कृते संख्ये निहतान्भुवि पतितान्वानरान्ममाज्ञया सुधावृष्ट्याशु संजीवय। स तथेति तानमृतवर्षेण संजिवियामास। ये ये पूर्वं समरे मृतास्ते सुप्तोत्थिता इव पूर्ववद्बलिनो हृष्टा रामपार्श्वमुपाययुः। तत्रैव पतिता राक्षसाः पीयूषस्पर्शादपि नोत्थिताः॥

अथ बिभीषणः साष्टांगं प्रणिपत्याब्रवीद्देव यदि मयि तव कृपा तर्हि मामनुगृण्हीष्व। अद्य त्वं सीतासमन्वितो भ्रात्रासह मंगलस्नानं कुरु। अयोध्यां श्वो गमिष्यामः। बिभीषणस्य वचः श्रुत्वा रघूत्तमः प्रोवाच ममाऽतिभक्तः सुकुमारो बंधुर्भरतो जटावल्कलधारी मामवेक्षते तेन विना मंगलस्नानालंकाराश्च मे कथं रोचिष्यंते? अतस्त्वं सुग्रीवमुख्यानाशु पूजय। कपींद्रेषु पूजितेष्वहं पूजितोऽस्म्येव। राघवेणैवमुक्तो राक्षसेंद्रः सर्वेभ्यः स्वर्णरत्नांबराणि यथाकामं यथारुचि प्रायच्छत्। हरीश्वरान्पूजितान्दृष्ट्वाभिनंद्य श्रीरामो बिभीषणसमानीतं सूर्यवर्चसं विमानोत्तमं पुष्पकविमानं धनुष्मता भ्रात्रा सहारुह्याग्निपूतां यशस्विनीं वैदेहीमंके निधाय सुग्रीवांगदप्रमुखान्सर्वान्वीरानब्रवीद्भवद्भिः सर्वं मित्रकार्यमकारि। अधुना मयानुज्ञाताः सर्वे यथेष्टं गंतुमर्हथ। सुग्रीव त्वं सर्वैः सैनिकैः सह किष्किंधामाशु प्रतियाहि। मद्भक्त बिभीषण त्वं स्वराज्ये लंकायां वस। सेंद्राःसर्वे दिवौकसोऽपि त्वां धर्षयितुं न क्षमाः। अहमधुना पितृराजधानीमयोध्यां गंतुमिच्छामि॥

रामेणैवमुक्ताः सर्वे वानराः सविभीषणाः प्रांजलय ऊचुः प्रभो रघूत्तम त्वया सहायोध्यां गंतुमिच्छामः तत्र त्वामभिषिक्तं दृष्ट्वा कौसल्यामभिवाद्यच पश्चाद्राज्यं वृणीमहे। प्रभो त्वं नोऽनुज्ञातुमर्हसि। रामस्तथेति तान्सर्वान्पुष्पकमारोढुमाज्ञापयामास। तेषु सर्वेष्वारूढेषु तत्कौबेरं परमोत्तमयानं विहायसोत्पपात। हंसयुक्तेन तेन यानेन गच्छन्प्रहृष्टो रामोऽपरश्चतुर्मुख इव बभौ

ततो बभौ भास्करबिंबतुल्यम्
कुवेरयानं तपसानुलब्धम् ॥
रामेण शोभां नितरां प्रपेदे
सीतासमेतेन सहानुजेन ॥ १ ॥

इति ग० रा० यु० कां० त्रयोदशः सर्गः ॥ १३ ॥

---

श्रीमहादेव उवाच। ततः सर्वत्र चक्षुः पातयित्वा रामः शशिमुखीं सीतामब्रवीदेतां त्रिकूटशिखराग्रस्थां महाप्रभां लंकां पश्य। एषा मांसपंकिला रणभूः। अत्रैव प्लवगाशराणां महदायोधनमभूत्। मया हतो राक्षसेश्वरो दशाननोऽत्र शेते। कुंभकर्णेन्द्रजिन्मुख्या रक्षोगणा अत्र निपतिताः। एष सलिलाशये मया बद्धः सेतुर्दृश्यते। एतत्सेतुबंध इतिख्यातं त्रैलोक्यपूजितं परमपवित्रं दर्शनात्पातकापहं सागरस्य तीर्थं दृश्यते। अत्र मया रामेश्वरः शंभुः प्रतिष्ठापितः। अत्रैव मंत्रिभिः सह विभीषणो मां शरणं प्राप्तः। एषा चित्रकानना सुग्रीवनगरी किष्किंधा। तत्र रामाज्ञया सुग्रीवः सीतायाः प्रियकाम्यया ताराप्रमुखा हरियोषित आनयामास। ताभिः सह विमानं शीघ्रमुत्थितं। रामः सीतां पुनः प्राह प्रियेऽमुमृष्यमूकाद्रिं पश्य। अत्र मया वाली हतः। एषा पंचवटी। अत्र मया खरदूषणाद्या राक्षसा हताः। एतावगस्त्यस्य सुतीक्ष्णस्य चाश्रमौ। त एत आश्रमास्तापसानां दृश्यंते। असौ शैलवरश्चित्रकूटः प्रकाशते। अत्र कैकेयीसुतो मां प्रसादयितुमागतः। पश्याग्रे यमुनातटे भारद्वाजाश्रमपदं दृश्यते। एषा लोकपावनी भागीरथी। एषा यूपमालिनी सरयूः। एषायोध्या दृश्यते। प्रिये तां प्रणम। एवं क्रमेण पूर्वदृष्टस्थलानि दर्शयन्रघुनंदनश्चतुर्दशे वर्षे पूर्णे भरद्वाजाश्रमं प्राप। तं मुनिं समासीनं दृष्ट्वाभिवाद्य च रघूत्तमो विनयेन पप्रच्छ कच्चिद्भरतः सहानुजः कुश-

ल्यास्ते ? कच्चिदयोध्यायां सुभिक्षं वर्तते ? मम मातरो जीवंति कच्चित् ; रामस्य वचनं श्रुत्वा भरद्वाजः प्रहृष्टधीः प्राह रघुनाथ सर्वे कुशलिनो वर्तंते । महामना भरतः फलमूलकृताहारो जटावल्कलधारकः सकलं राज्यं तव पादुकयोः संन्यस्य त्वां प्रतीक्षते । भो राम दंडकारण्ये त्वया यद्यत्कर्म कृतं तत्सर्वं तव प्रसादात्तपसा मया ज्ञातं । त्वं जगतामीशः सर्वलोकनमस्कृतः साक्षान्नारायणोऽसि त्वया देवकार्यमशेषेण कृतं । लोकद्वयहिताय दुष्करकर्माणि कुर्वंस्त्वं स्वयशसा भुवनं पूरयिष्यसि । जगन्नाथ मम गृहं पुनीहि । अद्यात्र स्थित्वा भुक्त्वा श्वोऽयोध्यां गमिष्यसि । यथाज्ञापयति भगवानित्युक्त्वा रामस्तस्मिन्नाश्रमेऽतिष्ठत् । स मुनिः सीतालक्ष्मणोपेतं ससैन्यं तं पूजयामास ॥

ततो मुहूर्तं चिंतयित्वा रामो मारुतिं प्राह हनूमंस्त्वमितोऽयोध्यां सत्वरं गच्छ । नृपमंदिरस्थानां सर्वेषां जनानां कुशलं नो निवेदय । शृंगवेरपुरं गत्वा मम मित्राय गुहाय ममागमनवार्तां निवेदय । ततो नंदिग्रामं गत्वा मम भ्रातरं सभार्यस्य सवंधोर्मम कुशलं ब्रूहि । सीताहरणादि रावणवधांतं सर्वं तत्र विचेष्टितं क्रमेणाख्याहि । रामः सीतालक्ष्मणर्क्षहरीश्वरैः सह कृतकृत्य उपयातीत्युक्त्वा भरतस्य विचेष्टितं सर्वं वृत्तांतं च ज्ञात्वा मम सन्निधिं पुनः शीघ्रमागच्छ । हनुमांस्तथेति वदन्वायुवेगेन ययौ । शृंगवेरपुरं प्राप्य गुहमासाद्य भारद्वाजेनानुज्ञातो रघुनाथोऽद्यागमिष्यति तं द्रक्ष्यस्येवमुक्त्वा पुनरुत्पत्य रामतीर्थं सरयूंचापश्यत् । तामतिक्रम्य नंदिग्रामं ययौ । अयोध्यायाः क्रोशमात्रं आश्रमवासिनं जटावल्कलांबरधरं फलमूलकृताहारं कृशं दीनं रामाचिंतापरायणं पादुके पुरस्कृत्य वसुंधरां शासितारं काषायांबरधारिभिर्मंत्रिभिः पौरमुख्यैश्च परिवेष्टितं मूर्तिमंतं साक्षाद्धर्ममिव स्थितं तं दृष्ट्वा मारुतात्मजः प्रांजलिर्भूत्वोवाच देव दंडकायां स्थितं यं रामं त्वं चिंतयसेऽनुशोचसि च स काकुत्स्थस्त्वां कुशलमब्रवीत् । सुदारुणं शोकं त्यज । ते प्रियमाख्यामि । त्वमस्मिन्मुहूर्ते रामेणसह संगतो भविष्यसि । समरे रावणं हत्वा सीतामवाप्य समृद्धार्थो जानकीलक्ष्मणोपेतो राम उपयाति । एवमुक्तो भरतो हर्षमूर्छितो भुवि पपात । कालेन संज्ञां लब्ध्वा भरतः प्रियवादिनं मारुतिं शीघ्रमालिंग्यानंदाश्रुजलैः सिषेच । देवो वा मानुषो वा त्वमनुक्रोशादिहागतोऽसि । प्रियं ब्रुवतस्ते प्रियाख्यापकस्य प्रतिप्रियं करोमि । गवां शतसहस्रं ग्रामाणां शतं सर्वाभरणसंपन्नाः षोडशकन्यकाश्च गृहाण । एवमुक्त्वा भरतः पुनः प्राहेमानि बहूनि वर्षाणि घोरं दंडकारण्यं गतस्य मम नाथस्याद्य प्रीतिकरं कीर्तनं शृ-

णोमि तस्मात् **कल्याणि बत गाथेयं लौकिकी प्रतिभाति मे । एति जीवंतमानंदो नरं वर्षशतादपि** राघववानराणां समागमः कथमासीत्तत्कथय तेन तवद्वचो विश्वसेयं । एवमुक्तो हरीश्वरो कृत्स्नं चरितं क्रमादाचख्यौ । तच्छ्रुत्वा परमानंदं प्राप्तो भरतः शत्रुहणमाज्ञापयद्रघुनंदन नगरे यावंति दैवतानि तिष्ठंति तावंति नानोपहारबलिभिः पूजय । सूता वैतालिका बंदिनश्चाचैव संघशो निर्यांतु । राजदारा अमात्या हस्त्यश्वरथपत्तियुता सेना ब्राह्मणाः पौरास्तथा राजानो ये श्रीरामं द्रष्टुमिच्छंति ते सर्वे निर्यांतु ॥

भरतस्य वचनं श्रुत्वा शत्रुघ्नचोदिता जना मुक्तारत्नमयोज्ज्वलैस्तोरणैर्विचित्राभिः पताकाभिश्च नगरीमनेकधालंचक्रुः । सर्वे रामदर्शनलालसा ईश्वराहार्ण्युपायनानि विविधानि द्रव्याण्युपादाय स्वर्णसूत्रविभूषितैर्गजैरश्वैःस्यंदनैर्निर्ययुः । ततः शिबिकारूढा राजयोषितो निर्गताः । भरतो रामपादुके शिरस्याधाय कृतांजलिः शत्रुघ्नसहितः पादचारेण निर्ययौ । तदैव दूराच्चंद्रसन्निभं पुष्पकमदृश्यत । तद्दृष्ट्वा मारुतिः प्राह जनाः पश्यत एतस्मिन्भ्रातरौ रामलक्ष्मणौ सीता कपिश्रेष्ठः सुग्रीवो मंत्रिभिः सहितो बिभीषणो बहवो वानरभटाश्च दृश्यंते । ततस्त्रीबालयुववृद्धानामयं रामोऽयं राम इति हर्षसमुद्भूतो निःस्वनो दिवमस्पृशत् । रथकुंजरवाजिस्थाः सर्वेऽवतीर्य विमानस्थं राममंबरे सोममिव ददृशुः । भरतः प्रहृष्टो राघवोन्मुखस्तिष्ठन्विमानाग्रगतं तं मेरुस्थं भास्करमिव ववंदे । ततो रामाज्ञया पुष्पकं भुवमवातरत् । सानुजो भरतो रामेण विमानमारोपितो मुदितस्तं पुनरभ्यवादयत् । रामश्चिराद्दृष्टं भ्रातरं स्वांकमारोप्य परिषस्वजे । ततः स प्रेमपूरितः सीतां लक्ष्मणं चाभिवाद्य सुग्रीवजांबवदादीन्परिषस्वजे । ते सर्वे मानुषं रूपं धृत्वा स्थिता भरतं कुशलं पप्रच्छुः । ततः सुग्रीवमालिंग्य भरतः प्राह त्वत्साहाय्येन रामेण रावणो हतः । त्वमस्माकं चतुर्णां पंचमो भ्राता । शत्रुघ्नोऽपि विनयान्वितो रामलक्ष्मणावभिवाद्य सीतायाश्चरणौ ववंदे । रामो मातुर्मनः प्रसादयंश्छोकविह्वलां विवर्णां तामासाद्य प्रणतः पादौ जग्राह । ततः कैकेयीं सुमित्रामितरामातृश्च ववंदे । भरतस्ते सुपूजिते पादुके रामस्य पादयोर्योजयित्वा बद्धांजलिपुटः प्राह प्रभो न्यासभूतमेतद्राज्यं मया ते प्रतिदत्तं । अद्य मे जन्म फलितं मम मनोरथः फलितो यत्त्वामयोध्यां समायातं पश्यामि । जगन्नाथ त्वत्तेजसा मया कोशबले दशगुणं विवर्धिते स्वकं पुरं त्वमधुना पालयस्व । इति ब्रुवाणं भरतं दृष्ट्वा सर्वे कपीश्वरास्तं प्रशंसंतो मुदा नेत्रेभ्यस्तोयं मुमुचुः । रामः प्रहृष्टात्मा भरतं

स्वांकगं कृत्वा विमानेन तस्याश्रमं ययौ । तत्रावरुह्य रामः पुष्पकमब्रवीद्विमानराज त्वां कुबेरमनुगंतुमनुजानामि । गच्छ वैश्रवणं वह ॥

रामो वसिष्ठस्य गुरोः पदांबुजं
नत्वा यथा देवगुरोः शतक्रतुः ॥
दत्वा महार्हासनमुत्तमं गुरोरुपा
विवेशाथ गुरोः समीपगः ॥ १ ॥

---

इति रा० रा० यु० कां० चतुर्दशः सर्गः ॥ १४ ॥

श्रीमहादेव उवाच । ततो भरतः शिरस्यंजलिमाधाय राममब्रवीद्भ्रातर्मे मातरं सत्कृत्य त्वया यथा मे राज्यं दत्तं तथाद्य तत्पुनर्गृहाण । अथ कैकेय्यापि तथैव प्रार्थितः प्रभुर्भरताद्राज्यं प्रतिजग्राह । ततः शत्रुघ्नवचनादेको निपुणो नापितो रामस्य श्मश्रुसंस्कारं चकार । पूर्वं भरते लक्ष्मणे सुग्रीवे राक्षसेंद्रे च स्नाते रामो विशोधितजटः केशोद्वर्तनादिपूर्वकं स्नातश्चित्रमाल्यानुलेपनो महार्हवसनोपेतः श्रियोज्ज्वलस्तस्थौ । राजयोषितः सीतायाः प्रतिकर्म कृत्वा तां महार्हवस्त्राभरणैरलंचक्रुः । पुत्रवत्सला कौसल्या सर्वासां वानरीणां प्रसाधनमकारयत् । ततः सुमंत्रः सूर्यसंकाशं स्यंदनं वाहैर्योजयित्वाग्रतस्तस्थौ । रामे रथारूढे सुग्रीवो युवराजो हनूमान्विभीषणश्च स्नाता दिव्याभरणभूषिता रथाश्वगजवाहनास्तमन्वीयुः । देवैर्युतो वज्रपाणिरिव रामस्तन्महत्पुरं प्रययौ । भरतः सारथ्यं चक्रे । शत्रुघ्नो रत्नदंडं महाद्युति श्वेतातपत्रं दधौ । लक्ष्मणः समीपस्थो व्यजनं धारयामास । सुग्रीवविभीषणौ चामरे न्यवीजयतां । दिविजैः सिद्धसंघैश्च स्तूयमानस्य रामस्य स्तोत्राणां मधुरध्वनिर्दूरतः शुश्रुवे । सर्वे वानरा मानुषं रूपमास्थाय गजारूढा जग्मुः । महार्हकिरीटरत्नाभरणांचितांगं दूर्वादलश्यामतनुं पीतांबरधारिणं पीनभुजांतरालं मुक्ताफलदिव्यहारैर्विरोचमानं प्रभुमायांतं दृष्ट्वा पुरवासिनोऽत्यंतं मुदमाययुः । प्रहर्षवेगोत्कलितानन श्रियः स्त्रिय आहितमपि गृहकार्यमपास्य सौधानारुह्य सर्वदृगुत्सवाकृतिं श्रीरामं दृष्ट्वा तस्मिन्पुष्पाणि किरंत्यः स्वानंदमूर्तिं हृदि धृत्वा मनसाभिरेमिरे । रामः स्मितयुतास्निग्धदृशस्ताः पश्यन्पितुर्गृहं शनैः शनैर्जगाम । ततो भरतमाह सर्वसंपत्समायुक्तं मम मंदिरं मित्राय वानरेंद्राय प्रदीयतां । सर्वेभ्यः सुखवासाय

मंदिराणि प्रकल्पय । भरतस्तथाकरोत् ॥

अथ भरतः सुग्रीवमुवाच । राघवस्याभिषेकार्थं शुभं सप्तसिंधुजलमानेतुं त्वरितविक्रमान्दूतानाशु प्रेषय । तदा स जांबवंतं हनुमंतमंगदं सुषेणमन्यान्कपीश्वरांश्च प्रेषयामास । ते वायुवेगतो गत्वा जलपूर्णान्सुवर्णकुंभान्समानयन् । शत्रुघ्नस्तत्तीर्थसलिलमानीतं वसिष्ठाय न्यवेदयत् । ततः स गुरुः ससीतं रामं रत्नपीठं सन्निवेश्य वामदेवगौतमजाबालिवाल्मीकिप्रमुखैः श्रेष्ठैर्द्विजैः सह कुशाग्रतुलसीयुक्तपुण्यगंधजलैः सर्वौषधिरसैश्चाभिषेकं चकार । सर्वे देवा लोकपालाश्च नभसि स्थिताः स्तुतिभी रामं तुष्टुवुः । वायुः कांचनीं मालां रामाय ददौ तथा शक्रो मणिकांचनभूषितं हारं ददौ । देवगंधर्वाः प्रजगुः । अप्सरोगणा ननृतुः । देवदुंदुभयो नेदुः । अंबरात्पुष्पवृष्टिः पपात । ततः सर्वातिशयशोभाढ्यं वामकरेण सीतामालिंग्य संस्थितं रामं दृष्ट्वा उमयासहितः शंकरः सर्वदेवगणैर्युक्तः स्तोतुं समुपचक्रमे । एवं महोरगाः सिद्धाः किन्नरा वसवो मुनयो गुह्यका अप्सरोगणाः पत्रिणस्तथाचान्ये मुदा रामं प्रशंसंतस्तस्य चेष्टितं गायंतो नेत्रमहोत्सवं दृष्ट्वा रामेणाभिवंदिताः सीतालक्ष्मणसंयुतं सिंहासनस्थं तं ध्यायंतः स्वं स्वं पदं ययुः ॥

**खे वाद्येषु ध्वनत्सु प्रमुदितहृदयैर्देववृंदैः स्तुवद्भि**
**र्वर्षद्भिः पुष्पवृष्टिं दिवि मुनिनिकरैरीड्यमानः समंतात् ।**
**रामः श्यामः प्रसन्नः स्मितरुचिरमुखः सूर्यकोटिप्रकाशः**
**सीतासौमित्रिवातात्मजमुनिहरिभिः सेव्यमानो विभाति ॥१**

इति रा० रा० यु० कां० पंचदशः सर्गः ॥ १५ ॥

---

श्रीमहादेव उवाच । श्रीरामेऽभिषिक्ते वसुधा सस्यसंपन्ना महीरुहाः फलवंतश्च बभूवुः । गंधहीनानि पुष्पाणि गंधवंति चकाशिरे । रामो ब्राह्मणेभ्योऽश्वानां तथा गवां सहस्रशतं वृषभाणां शतानि तथा सुवर्णानां त्रिंशत्कोटीर्वस्त्राभरणानि च ददौ । अथ स भक्तवत्सलः सुग्रीवाय सूर्यकांतिसमप्रख्यां सर्वरत्नमयीं स्रजमंगदाय दिव्ये अंगदे सीतायै चंद्रकोटिप्रतीकाशं मणिरत्नविभूषितं हारं च प्रीत्या ददौ । जानकी स्वकंठाद्धारमुत्तार्य सर्वान्हरीन्भर्तारंच मुहुर्मुहुरवैक्षत । रामस्तां विलोकयन्निंगितज्ञ आह वैदेहि यस्मिंस्तुष्टासि तस्मै हारो दीयतां । तदातिहृष्टा सा राघवस्य पश्यतो हनुमते हारं ददौ । तेन हा

रेण तया कृतेन गौरवेणच मारुतिस्तुतोष । रामोऽपि तं कृतांजलिमुपस्थितं दृष्ट्वा तस्य परमया भक्त्या तुष्टोऽब्रवीद्धनूमंस्ते प्रसन्नोऽस्मि कांक्षितं वरं वरय । देवैरपि भुवनत्रये यद्दुर्लभं तद्दास्यामि ते । मारुतिः प्रहृष्टधीर्नत्वा प्राह रामत्वन्नाम स्मरतो मम मनो न तृप्यति । अतस्तदेव सततं स्मरन्भूतले स्थास्यामि । राजेंद्र यावत्तव नाम लोके स्थास्यति तावन्मम कलेवरं तिष्ठत्वयं मेऽभिकांक्षितो वरो दीयतां । रामस्तथेति तं प्राह त्वं मुक्तोऽसि यथासुखं तिष्ठ कल्पांते मम सायुज्यं प्राप्स्यसि । जानकी प्रीता तमाह मारुते यत्र कुत्रापि स्थितं त्वां ममाज्ञया सर्वे भोगा अनुयास्यंति । ताभ्यामित्युक्तो मारुतिरानंदाश्रुपरीताक्षो तौ भूयोभूयः प्रणम्य हिमवंतं तपस्तप्तुं ययौ । ततो रामः प्रांजलिं गुहमब्रवीत्सखे रम्यं शृंगवेरपुरं गच्छ । नित्यं मां चिंतयन्निजार्जितान्भोगान्भुंक्ष्व । त्वमंते मम सायुज्यं प्राप्स्यसीत्युक्त्वा तस्मै दिव्यान्याभरणानि विपुलं राज्यं विज्ञानंच ददौ । रामेणालिंगितो हृष्टो गुहः स्वभवनं ययौ । ये चान्ये वानरश्रेष्ठा अयोध्यां समुपागतास्तान्राघवोऽमूल्याभरणैर्वस्त्रैश्च पूजयामास । सुग्रीवप्रमुखाः सर्वे यथार्हं पूजिताः प्रहृष्टमनसो यथागतं किष्किंधां प्रययुः । बिभीषणो निहतकंटकं राज्यं संप्राप्य रामेण पूजितः प्रीत्या लंकां ययौ ॥

रामचंद्रोऽतिवत्सलः सर्वं राज्यं न्यायेन शशास । लक्ष्मणोऽनिच्छन्नपि रामेण यौवराज्येऽभिषिक्तः परया भक्त्या ग्रजस्य सेवापरोऽभवत् । रामस्तु परमात्मा कर्तृत्वादिविहीनोऽपि लोकानामुपदेशकृद्विपुलदक्षिणैरश्वमेधादियज्ञैरियाज । रामे राज्यं प्रशासति न कापि विधवा पर्यदेवयत् । सर्वे रामपूजापरा रामचिंतका आसन् । मेघा यथाकालं तोयं ववृषुः । प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विता बभूवुः । सर्वलक्षणसंयुक्तः सर्वधर्मपरायणः श्रीरामो दशवर्षसहस्राणि राज्यमुपास्त ॥

राम एव परं ब्रह्म तस्मिंस्तुष्टेऽखिलात्मनि ॥
धमार्थकाममोक्षाणां यद्यदिच्छति तद्भवेत् ॥ १ ॥

इति० ग० रा० यु० कां० षोडशः सर्गः ॥ १६ ॥

युद्धकांडः समाप्तः

---

# इतिगद्यात्मकं रामायणं संपूर्णम्

# शुद्धिपत्रं

| पृष्ठे | पंक्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| १२ | १८ | प्राग्रात् | प्रादात् |
| १३ | २० | वसिष्ठादान् | वसिष्ठादीन् |
| ” | २२ | पातिव्रय | पातिव्रत्य |
| १५ | २ | युगले | युगल |
| ” | १६ | निर्विकरो | निर्विकारो |
| ” | २१ | पुरजिरे | पुराजिरे |
| १७ | ३ | षोडशा | षोडश |
| ” | १२ | कक्ष्या | कक्षा |
| ” | २९ | राज्येऽश्वो | राज्ये श्वो |
| २१ | २४ | द्रष्टु | द्रष्टु |
| २३ | ६ | च्चतुर्दश | क्चतुर्दश |
| २६ | ११ | सक्ष्मण | लक्ष्मण |
| ३६ | २४ | द्वारौत्म्यं | दौरात्म्यं |
| ४० | २४ | समागतो | समागमो |
| ४२ | १ | सवा | सेवा |
| ४३ | १२ | मिच्छमि | मिच्छामि |
| ४४ | १ | राजन | राजन् |
| ४९ | ४ | टीयु | टायु |
| ” | २० | र्दुःखं | र्दुःखं |
| ५२ | ३ | त्फुलांबुज | त्फुल्लांबुज |
| ५७ | ७ | रघुत्तम | रघूत्तम |
| ५९ | १६ | ब्र | ब्रू |
| ६० | १४ | अगदेन | अंगदेन |
| ६३ | ८ | यास्यतीति | यास्यसीति |
| ६६ | ४ | उन्मालय | उन्मील्य |
| ६७ | २४ | क्षिपापि | क्षिपामि |
| ६९ | ७ | सगारो | सागरो |

| पृष्ठे | पंक्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| ७१ | ४ | त्वदथः | त्वदर्थः |
| ,, | २९ | तैलाभक्तः | तैलाक्तः |
| ७२ | १४ | माबला | महाबला |
| ,, | २४ | स्थारयंति | स्थास्यंति |
| ७५ | ११ | ञ्च्छुत्या | ञ्च्छुत्वा |
| ७८ | ४ | कांशिता | कांशिता |
| ८१ | २७ | समुद्र | स्मुद्र |
| ८६ | १६ | ज्ञावयत् | ज्ञापयत् |
| ,, | २१ | सुयिस्तृतं | सुविस्तृतं |
| ८९ | २९ | पर्वत | पर्वत |
| ९० | २३ | सव | सर्वे |
| ,, | २४ | निकुंभ | निकुंभ |
| ९४ | ६ | शत्वा | शप्त्वा |
| ९६ | १४ | मामां | मायां |
| ९७ | २ | महाच्छब्दो | महाञ्छब्दो |
| ,, | २७ | आशाशे | आकाशे |
| ,, | २९ | रतुष्ट | स्तुष्ट |
| ९८ | २५ | सद्गुरौ | सद्गुरो |
| ९९ | १२ | लोकाहलं | कोलाहलं |
| १०० | १ | वचन | वचनं |
| १०४ | १३ | रैजनैः | रैजनैः |
| ,, | २७ | तथेवि | तथेति |
| १०५ | १ | ध्यात्वा | ध्यात्वा |
| १०६ | ८ | र्नामस्य | नीमस्य |
| १०७ | २० | मूवादिं | मूकाद्रिं |

बोले यांणीं केलेलीं दुसरीं पुस्तकें
...यांत विक्रीस तयार आहेत तीं:—

...कार मोठी, उत्कृष्ट, ऐतिहासिक कादंबरी. द-
...करून २०० रुपये बक्षीस दिले. ह्या प्रकार-
...डीचा ग्रंथ नाहीं. ह्यांत पेशवाईच्या अखेरची
...बद्दल इंग्रजींतील राज्यपद्धति वगैरे अनेक गो-
...लेलें आहे. अनेक ठिकाणचे सृष्टिसौंदर्याचे दे-
...भे रहात असे वर्णिले आहेत ग्रंथाची भाषा सु-
...मराठी. आहे. ग्रंथ वाचण्यास आरंभ केला ह्म-
...ालीं ठेऊंच नये असें वाटतें. रा० ब० म०
... बापूसाहेब कुरुंदवाडकर या उभयतां विद्वानांनीं
... ह्याची किंमत पहिली अडीच परंतु आतां दोन
... खर्च चार आणे.

...स्वदेशीय राज्यें, संस्थानें, व जाहागिरी यांचा ... बोध—ह्या प्रकारचा मराठींत आजपर्यंत एवढा मोठा एकही ग्रंथ झालेला नाहीं. द० प्रा० कमिटीनें ३५० रुपये बक्षिस दिले. श्रमाच्या मानानें हें बक्षीस थोडें आहे असें कांहीं मेंबरानीं म्हटलें आहे. निजाम, गायकवाड, शिंदे होळकर इत्यादि थोर थोर राजांपासून एक दोन खेडींवाले लहान सरदारापर्यंत पोलिटिकल खात्याच्या नजरेखालीं जीं घराणीं आहेत त्यांची स्थापना झाली कशी, त्यांतील कोणत्या पुरुषांनीं काय काय पराक्रम केले, सध्या त्यांची स्थिति आहे कशी, कोण कोणत्या दरजांत आहे, कोणाला कसा मान मरातब मिळतो इत्यादि गोष्टी आपल्या लोकांस माहीत असणें अवश्य आहे. हा स्वदेशाचा इतिहास कळण्यास हाल्लीं असें दुसरें पुस्तक नाहीं. पुस्तक मोठें असून त्या मानानें किंमत थोडी, दोन रुपये ठेविली आहे. बंगीखर्च चार आणे.

हीं दोन व हें संस्कृत गद्य रामायण अशीं तीन पुस्तकें एकदम घेणारास टपाल खर्च पडणार नाहीं.

व्हाल्यू पेएबलनें मागविलीं असतां रवाना होतील.

म्यानेजर.